Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आगमोद्धारक-ग्रन्थमालाया एकत्रिंशं रत्नम् ।

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

पू० याकिनीमहत्तरासूनु-आचार्यप्रवर-श्रीहरिभद्रसूरिपुरन्दरप्रणीता

# । लोकविंशिका ।

पू० आगमोद्धारक-आचार्यश्रीआनन्दसागरसूरिनिर्मित-
वृत्तिसमन्विता ।

( तस्या अयं द्वितीयः खण्डः )

卐

संशोधकः—
आगमोद्धारक-आचार्यश्रीआनन्दसागरसूरीश्वरपट्टधरः
आचार्यश्रीमन्माणिक्यसागरसूरिः

प्रतय : ५०० ] [ मूल्यम् २-००

वीर सं० २४९१ — वि० सं० २०२१ — आगमोद्धारक सं० १६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आगमोद्धारक-ग्रन्थमालाया एकत्रिंशं रत्नम् ।

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

पू० याकिनीमहत्तरासूनु-आचार्यप्रवर-श्रीहरिभद्रसूरिपुरन्दरप्रणीता

# । लोकविंशिका ।

पू० आगमोद्धारक-आचार्यश्रीआनन्दसागरसूरिनिर्मित-
वृत्तिसमन्विता ।

( तस्या अयं द्वितीयः खण्डः )

卐

संशोधकः—
आगमोद्धारक-आचार्यश्रीआनन्दसागरसूरीश्वरपट्टधरः
आचार्यश्रीमन्माणिक्यसागरसूरिः

प्रतय : ५०० ] [ मूल्यम् २-००

वीर सं० २४९१ — वि० सं० २०२१ — आगमोद्धारक सं० १६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकाशक :—
आगमोद्धारक-ग्रन्थमालाना एक कार्यवाहक
शा. रमणलाल जयचंद
कपडवंज ( जि. खेडा )

द्रव्यसहायक—

५०० पू. आचार्यश्रीदेवेन्द्रसागरसूरिजी म. ना उपदेशथी
चाणस्मा जैन संघ.

७०० पू. मुनिराजश्रीसौभाग्यसागरजी म. ना उपदेशथी
इन्दौर जैन संघ.

मुद्रक :
मंगळभाइ वहेरीभाइ पटेल
मॅनेजर
सहकारी छापखानु वडोदरा लि.
रावपुरा, वडोदरा.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# । उपक्रमः ।

॥ नमः श्रीजिनशासनाय ॥

श्रीमज्जिनशासनाम्बरनभोमणिभिः सच्छास्त्रतत्त्वमर्मस्पर्शिधीषणावधीरितसुरगुरुभिः श्रीहरिभद्रसूरिवर्यैः विहितस्य नैकातिगूढतत्त्वरत्नखनितुल्यविंशिकाऽऽख्यप्रकरणरत्नस्याऽनुपलभ्यमानवृत्ति–व्याख्या–विवेचनादेः दुरूहतरसदर्थमर्मव्रातस्य जिज्ञासुभव्यजनोपचिकीर्षया प्रवचनप्रभावकोत्तंसैः आगमानां पठनपाठनादि सौकर्यापादनमूलकवाचना-मुद्रण-शिला-ताम्रपत्रोत्कृत्यादिनानाऽव्युच्छित्तिप्रकारैः स्मारितप्राक्कालीन–स्कन्दिलाचार्य–देवर्द्धिगणिभिः ध्यानस्थस्वर्गतैराचार्याऽऽनन्दसागरसूरीशैः तैलबिसर्पिबुद्धिप्रतिभादिसनाथैः विहितव्याख्यायाः पुस्तकद्वयप्रकाशनादूर्ध्वं द्वितीयो ह्ययं खण्डः तत्त्वानुसारिप्रज्ञाविभूषितविदुषां कुशेशयानुकारिकरेषु समुपदीक्रियते ।

व्याख्यायामस्या हि लोकविंशिकायाः अष्टमगाथान्तं विवेचनमस्ति अष्टमगाथात ऊर्ध्वं कालानुभावत ऐदंयुगीनास्मादृशदुर्भाग्यतो वाऽज्ञातहेतोरेषा व्याख्याऽपूर्णैव विद्यमानाऽस्ति 'अकरणान्मन्दकरणं श्रेय' इत्याप्तोक्तिमनुसृत्य श्रीमद्भिर्पूज्यगच्छाधीशैः स्वशिष्यरत्नश्रीलाभसागरजित्पार्श्वे मुद्रणयोग्यप्रतिं सज्जयित्वा संशोध्यैषाऽपूर्णाऽपि व्याख्या प्रकाशं नीताऽस्ति ।

स्याद्धि यस्य कस्यचन पटिष्ठबुद्धिमतो विदुष एतदपूर्णतावलोकनेनाभिनवग्रन्थव्याख्याकरणमनोरथ इति शुभाशयोऽप्यपूर्णव्याख्याया अस्या प्रकाशने ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आगमोद्धारकग्रन्थमालाया उत्पत्तिरेतादृशमहत्त्वपूर्णग्रन्थरत्न-प्रकाशनोपज्ञैव भूयोभूयः धन्यवादपात्रमेषा यदनयैतादृशग्रन्थरत्नानि पूज्यगच्छाधीशाचार्यतत्त्वावधाने प्राकट्यं नीयन्ते ।

क्षयोपशममान्द्यात् सीसकाक्षरसंयोजकदोषाद्वा जातक्षतीनां परिमार्जनाय सूचयितव्यरीतिनिर्देशपूर्वं ग्रन्थरत्नस्यास्योपक्रमलिखन-सौभाग्यदानार्थं पूज्यगच्छाधीशानां कृपाकटाक्षमभिनन्दमानो विरमेऽहम्—

लि०

का. सु. १४ श्रीश्रमणसङ्घसेवकः

कपडवंज पू. धर्मसागरगणिवरचरणोपासकोऽभयः ।

—×—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# प्रकाशकीय–निवेदन ।

प० पू० गच्छाधिपति आचार्यश्रीमाणिक्यसागरसूरीश्वरजी महाराज आदि ठाणा वि. सं. २०१० ना वर्षे कपडवंज शहेरमां मीठाभाई गुलालचंदना उपाश्रये चतुर्मास बीराज्या हता । आ अवसरे विद्वान् बालदीक्षित मुनिराजश्री सूर्योदयसागरजी महाराजनी प्रेरणाथी आगमोद्धारकग्रंथमालानी स्थापना थएली हती, आ ग्रन्थमालाए त्यारबाद प्रकाशनोनी ठीकठीक प्रगति करी छे ।

सूरीश्वरजीनी पुण्यकृपाए आगमोद्धारक–आचार्यश्री–आनन्दसागरसूरीश्वरजी निर्मित वृत्तिसहित आ 'लोकविंशिका' नो बीजो खंड आगमोद्धारकग्रंथमालाना ३१ मा रत्न तरीके प्रगट करतां अमोने बहु हर्ष थाय छे.

आनी प्रेस कोपी पू. मुनिराजश्री सौभाग्यसागरजी म० साहेबे करी छे अने आनुं प्रुफ संशोधन विगेरे प० पू० गच्छाधिपति आ० श्री माणिक्यसागरसूरीश्वरजी म० नी पवित्र दृष्टि नीचे शतावधानी मुनिराजश्री लाभसागरजीए करेल छे ते बदल तेओश्रीनो तेमज जेओए आना प्रकाशनमां द्रव्य सहाय करी छे ते बधानो आभार मानीए छीए ।

लि०

प्रकाशक.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# शुद्धिपत्रकम् ।

| पृ. | पं. | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २ | १६ | वद्धत्य | वद्वृत्य |
| ५ | २१ | वशिष्टादौ | वशिष्ठादौ |
| १० | २३ | गता० | गतो० |
| १२ | २० | निमित० | निमित्त |
| १९ | १७ | लाक० | लोक० |
| २३ | ५ | मात्मान | आत्मान |
| २५ | १४ | दीनान्। | दीनाम्। |
| २६ | ७ | नारम० | चारम० |
| ३० | १ | तसं० | तमृगचर्मव-स्तुसं० |
| ३७ | ५ | ०बाल० | ०काल० |
| ,, | ५ | कारणं | जायते |
| ,, | १४ | मासस्य | माषस्य |
| ३८ | १८ | यस्य कर्म | तस्य यस्माद् |
| ३९ | १ | न | च |
| ३९ | १३ | कुवन्ति | कुर्वन्ति |
| ४४ | ८ | ०भोम्यानां | ०भोग्यानां |
| ,, | २३ | कारीस | कारिस |
| ४७ | १० | विपयय | विपर्यय |
| ५१ | ५ | अस्मादा० | अस्मदा० |
| ५७ | १३ | गमिकत्व | गमिकत्व |
| ७१ | ८ | व्यक्तततापि | व्यक्ततापि |
| ७४ | २० | घटा० | घटा |
| ७५ | ४ | घटा० | घटा |
| ८१ | १ | दाण्ह | दोण्ह |
| ७३ | २ | वाच्छामि | वोच्छामि |
| ,, | १४ | पञ्चभ्यो | पञ्चभ्यः |
| ८४ | ४ | तपन्न | तपन्नं |
| ८८ | २० | पुव्वमव | पुव्वभव |
| ९५ | १९ | सम्यक् | सम्यग् |
| ९७ | १४ | मार्गणास्तस्य | मार्गणा तस्य |
| ९८ | ५ | प्रयाजन | प्रयोजन |
| ११८ | १३ | नयाः | नयोः |
| १२६ | ८ | उर्ध्वं | ऊर्ध्व |
| ,, | १६ | पोषा० | पोषणा० |
| १२८ | १ | तामित | तामितं |
| १३० | ६ | वक्रि | वैक्रि |
| १३३ | १ | प्रयाजन | प्रयोजन |
| १३४ | ४ | उर्ध्वं | ऊर्ध्वं |
| ,, | १३ | नाक्तो | नोक्तो |
| १३६ | १५ | आद्दता | आद्दतो |
| १३९ | १४ | प्राणा | प्राणो |
| १४१ | ४ | तआ | तओ |
| ,, | १४ | ग्रहणं | गहणं |
| १५२ | ३ | पार्थः | पाथः |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पृ. | पं. | अशुद्धम् | शुद्धम् | पृ. | पं. | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|---|---|---|
| १५२ | ९ | नवलाक० | नवलोक० | १९५ | १६ | इत्युचिवांस। | इत्यूचिवांस० |
| १५३ | १६ | संचिते | संचिंते | | | | |
| १५७ | ११ | भवगन्नेधि | भगवन्नेधि | १९८ | ५ | स्वमाव० | स्वभाव० |
| १७० | १४ | वद्गीताः | वद्गीताः | ,, | १० | जैने | जैनै |
| १७६ | १० | वबका | वैवका | १९९ | १४ | कर्तृवादा | कर्तृवादो |
| १८२ | १४ | यत्त्त्व | यत्तत्व | २०१ | ५ | सप्ताह | सप्ताहं |
| ,, | २० | दुःखयाः | दुःखयोः | २०२ | ३ | त्मन | त्मान |
| १८३ | ६ | विशेषणं | विसेसणं | २०४ | २३ | अनै० | अने० |
| १८६ | १ | तता | ततो | २०६ | १ | सता | सतो |
| ,, | १८ | साऽपि | सोऽपि | ,, | २२ | लागु | लोगु |
| १९० | २२ | तथा | तदा | २०७ | ११ | लागा० | लोगा० |
| १९१ | ९ | रतां ज्ञा० | रताज्ञा० | २०८ | ८ | निर्दैष्टो | निर्दिष्टो |
| ,, | ११ | कायात् | कायान् | २१६ | ५ | ०हीँनता | हीनता |
| १९२ | २२ | यता | यतो | २२३ | ८ | पर्याप्त | पर्याप्तं |
| १९२ | २३ | ०कायं० | ०कार्यं० | २३० | १६ | परमेश्वरप्य | परमेश्वरस्य |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# विषयानुक्रमः


| पृष्ठम् पङ्क्तिः | विषयः |
|---|---|
| १– १ | मङ्गलम् । |
| १–१२ | उपक्रमः । लोकस्वरूपनिर्देशप्रतिज्ञा पञ्चावयवात्मकत्व-पक्षहेतोरैक्याभावत्वप्रदर्शनम् । |
| २– ५ | ' पंचत्थिकायमइओ लोगो ' गाथाखण्डस्य पदानां व्युत्पत्तिः परमाणोः प्रदेशाभावत्वेनास्तिकायलक्षणा-सङ्गतिमुद्भाव्य कालस्याऽप्रदेशित्वप्रतिबन्द्या परमाणावस्तिकायलक्षणसङ्गतिः । |
| ३–११ | पञ्चास्तिकायमयपदस्य तात्त्विकी व्युत्पत्तिः । |
| ३–२१ | ' लोक 'पदेन द्रव्यलोकविवक्षोपपत्तिः । |
| ४– ५ | ' अणाइमं ' इति गाथापदस्य व्याकरणशैल्या रहस्योद्घट्टनम् । |
| ४–१० | ' वट्टए इमो ' इति गाथाखण्डरहस्यम् । |
| ५– ८ | अनादिमत्त्वसाध्येऽप्रतीतत्वधर्मोऽभावाऽऽशङ्कानिरसनम् । |
| ५–१४ | ' वट्टइ ' इति गाथापदस्य रहस्यगर्भनिरूपणे उद्भावितसिद्धसाध्यतादोषसमाधानम् । |
| ६– ४ | ' अय 'मितिगाथागतपदेन भूभूधरादेर्लोकपदवाच्यतानिरूपणम् । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| पृष्ठम् पङ्क्तिः | विषयः |
|---|---|
| ६–११ | 'वट्टइ' इति गाथापदेन ब्रह्मादित्रिपुटीविधीयमान-जगत्सर्ग–पालन–संहृतितत्त्वासारतानिर्वचनम् । |
| ६–१९ | 'लोक' पदस्य भूभूधरादिवाच्यत्वपक्षे हेत्वसिद्धि-दोषोपपत्तिनिरासनिरूपणम् । |
| ७–११ | हेतौ व्यर्थविशेषणत्वाऽऽशङ्का तन्निरासश्च । |
| ७–१८ | गाथायाः पक्षान्तरेण व्याख्यां कृत्वा साध्य–हेतु-गतदोषनिरासः । |
| ८–१० | 'ण परमपुरिसाइकओ' इति गाथाखण्डव्याख्यो-पक्रमः । |
| ८–१३ | परमपुरुषस्य परमैश्वर्यनिर्वचने सिद्धयष्टकस्वरूपम् । |
| ११– १ | 'अप्रतिघ पुरुष' आदिपदानां तात्पर्यम् । |
| ११–१६ तः<br>४०– ६ पर्यन्तम् | जगत्कर्तृत्ववादस्याऽऽगमवादेनोपपत्ति-पूर्वपक्षः । |
| ११–१६ | जगत उपादानरूपेण निमित्तरूपेण वा ईश्वरं प्रकृतिं च मन्तॄणां निरूपणम् । |
| १६– १ | सृष्टेर्विनाशस्य उत्पत्तेश्च निरूपणम् । |
| १७– ४ | सृष्टिवादसमर्थकभिन्नभिन्नश्रुती उपन्यस्य ब्रह्मण जगदुपादानत्वसिद्धिः । |
| १९– ४ | ब्रह्मणो जगन्निमित्तत्वमभिमन्यमानवादिभिः भिन्न-भिन्नश्रुतीनां प्रमाणत्वेनोपन्यासः । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| पृष्ठम् पङ्क्तिः | विषयः |
| --- | --- |
| २५– ५ | ब्रह्मणो जगन्निमित्तत्वे श्रुतिवाक्यानां हेतुत्वेन स्फुटपरामर्शः । |
| २६– ९ तः ३४–१५ पर्यन्तम् | सृष्टिवादे भिन्नभिन्नमतनिरूपणम् । |
| २६– ९ | श्रुत्यभिमतं साङ्ख्यानुगुणं च यथारुचि जगदुत्पत्तिं प्रतिपादयतां ' केचित्तु 'नां मतम् । |
| २९–२० | सृष्टिवादे पौराणिकानां मतम् । |
| ३०–१० | महाभारतानुसारेण जगदुत्पत्तिनिर्वचनम् । |
| ३१–१५ | जगदुत्पत्तिविषये क्रिश्चीयनापराऽऽख्ययवनानां मतम् । |
| ३४– ८ | मुसल्लमीनाऽऽख्ययवनानां जगत्कर्तृत्ववादः । |
| ३४–१७ | गाथागत ' ण परमपुरिसाइकओ ' पदस्थादिपदस्य साफल्यनिर्देशः । |
| ३४–२२ | जगतः साङ्ख्याभिमतस्य प्रकृतिजातत्वस्य निर्देशविवेचने । |
| ३६–१३ | निरीश्वरवादि–साङ्ख्यमते सर्वज्ञादिपदानामनुपपत्तिमुद्भाव्य तदीयमतानुसारेणैव सङ्गतिनिरूपणम् । |
| ३७– ४ | प्रसङ्गतोऽनीश्वरवादिनां काल–स्वभाव–नियति–पूर्वकृतवादिनामुपन्यासस्तदभिमतोपन्यासपूर्वकं विधाय तेषामपि गाथागत ' ण परमपुरिसाइकओ ' पदगतादिपदकुक्षिनिविष्टत्वं निर्दिश्य निषेध्यकोटौ व्यवस्थापनम् । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| पृष्ठम् पङ्क्तिः | विषयः |
| --- | --- |
| ४०– ७ | अनुमानबलेन जगत्कर्तृत्वसिद्धेरसारतानिर्देशः । |
| ४३–२२ | जगत्कर्तृत्वसाधकानुमाने हेतोर्व्यभिचारित्वाद्या-शङ्कानिरासः । |
| ४९–२० | उद्योतकरमतेन जगत्कर्तृत्वनिरूपणे " कार्यायो-जन० " कारिकाविवेचनम् । |
| ५२– ४ | जगद्वैचित्र्येऽदृष्टमुपन्यस्येश्वरस्य कर्तृत्वनिरासः । |
| ५२– ६ | ईश्वरस्य सर्वज्ञत्वानुपपत्तिः । |
| ५२–१७ | वचनस्य प्रमाणत्वसङ्गतिः । |
| ५४– ९ | द्वितीयगाथोपक्षेपः । |
| ५४–११ | द्वितीयमूलगाथा । |
| ५४–१३ | धर्मास्तिकायस्वरूपम् । |
| ५५– २ | गोविन्दाचार्य-वाचस्पत्या-ऽऽनन्दगिर्यादिभिः कृतस्य धर्मास्तिकायप्रतिक्षेपस्यासारतानिर्देशः । |
| ५५–१४ | धर्मास्तिकायसिद्धिः । |
| ५६– २ | धर्मास्तिकायस्यामूर्त्तत्व–निष्क्रियत्व–सावयवत्वत्व-निरूपणम् । |
| ५६–१३ | अधर्मास्तिकायस्वरूपम् । |
| ५७– ६ | आगमिकत्वेन धर्माधर्मास्तिकाययोः युक्तिप्रसारस्य तत्रोपपन्नत्वं नवेति सहेतुकं निरूपणम् । |
| ५८–१५ | आकाशास्तिकायस्वरूपम् । |
| ५८–२३ | आकाशास्तिकायसिद्धिः लोकालोकपदवाच्यतास-ङ्गतिश्च । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| पृष्ठम् पङ्क्तिः | विषयः |
|---|---|
| ६०- १ | गोविन्दाचार्यप्रभृतिजैनेतरदार्शनिकैराकाशास्तिकायसम्बन्धि–यद्वातद्वाऽनभिमतवस्तुनिर्दिष्टं तस्यासारत्वनिर्देशः । |
| ६०-२३ | द्वितीयगाथा-द्वितीपादव्याख्यारहस्योद्घट्टनं च । |
| ६३- ६ | जीवास्तिकायनिरूपणम् । |
| ६३-२२ | उपयोगयुतत्वरूपजीवलक्षणनिर्देशेनात्मसिद्धिर्नैरात्म्यनिराससूचनम् । |
| ६४- २ | जीवद्रव्यस्य मुख्यं लक्षणम् । |
| ६४- ६ | जीवानस्तित्ववादिनः पूर्वपक्षः । |
| ६४-२२ | जीवास्तित्वप्रतिपादकाचार्यवचनम् । |
| ६५-१८ तः<br>८१-२१ पर्यन्तम् | चैतन्यस्य भूतधर्मत्वनिरासस्य विविधानेकाऽकाट्ययुक्तिपूर्वकं निरूपणम् । |
| ८१-२२ | आत्मसिद्धौ प्रत्यक्षकिञ्चित्करत्वनिरसनम् । |
| ८२-२१ | आगमतः जीवास्तित्वनिरूपणे आगमप्रामाण्यव्यस्थापनम् । |
| ८४-२० | प्रसङ्गतः चैतन्यस्य परलोकगामित्वसिद्धिः । |
| ८५-१४ | चैतन्यविशिष्टकायोदाहृत्यात्मास्तित्वप्रतिपादनम् । |
| ८६- ६ | क्रियाणां सकर्तृकत्वाच्चैतन्यसिद्धिः । |
| ८८-२१ | चैतन्यसिद्धौ जातिस्मरणज्ञानस्य हेतुत्वेनोपन्यासः । |
| ९१-१६ | जातमात्रस्य प्रथमस्तन्यपानेच्छानुसारेण चैतन्यसिद्धिः । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| पृष्ठम् पङ्क्तिः | विषयः |
|---|---|
| ९३–१८ | जीवानामुपयोगवत्त्वसिद्धौ श्लोकैकोनचत्वारिंशती समुल्लेखः । |
| ९६– ६ | जीवानां ज्ञानतारतम्यत्वसङ्गतिः । |
| ९७–१४ | उपयोगस्वरूपम् । तस्यागमिकसिद्धिः । |
| ९९–१२ | जीवानां द्वैविध्यम् । |
| ९९–२२ | प्रसङ्गतः सर्वदर्शनसङ्ग्रहकार–शारीरिकभाष्यवृत्तिकारादिभिः जैनमतस्य विहिताक्षेपपूर्णखण्डनस्यासारत्वप्रतिपादनम् । |
| १०१–१० | पञ्चमद्रव्यस्य पुद्गलास्तिकायस्य निरूपणम् । |
| १०१–२३ | पुद्गलानां वर्णादिचतुर्नैयत्यं जलादिष्वपि वर्णादिमत्त्वं प्रतिपाद्य प्रतिपक्षन्यायेन आत्मस्वरूपज्ञापकश्रुतीनामुपन्यासेन पारिशेष्यतः पुद्गलेषु वर्णादिमत्त्वनियमप्रतिपादनम् । |
| १०३– ७ | पुद्गलशब्दनिरुक्तिं आगमिकव्युत्पत्तिं च प्रकारान्तरितां प्रदर्श्य वर्णादिचतुष्करूपमूर्तिमत्त्वलक्षणप्रतिपादनम् । |
| १०४–१६ | गाथागत 'ज्ञेया' इति पदरहस्योद्घट्टनप्रसङ्गे पुद्गलानां हेयतया ज्ञानस्य धर्मादीनां ज्ञेयतया ज्ञानस्याऽऽवश्यकतां प्रदर्श्य प्रसङ्गेन छान्दोग्योपनिषदो सप्तमाष्टमनवमदशमैकादशमद्वादशमखण्डीयपाठैः आत्मनः सुदृढविज्ञानायान्यथान्ययोपदेशप्रदर्शनस्यासारत्वप्रतिपादनम् । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| पृष्ठम् पङ्क्तिः | विषयः |
|---|---|
| १०९-१३ | पुद्गलानां गुणस्वरूपम् । तत्र प्रसङ्गतः शब्दस्य पौद्गलिकत्वप्रतिपादने शब्दस्याकाशगुणत्वाभावेऽकाट्यप्रबलतर्काः । |
| ११२- ५ | शब्दस्य पौद्गलिकत्वसिद्धिप्रस्तावे शब्दद्वैविध्यप्रतिपादनम् । भाष्यमाणभाषारूपशब्दस्य निक्षेपचतुष्कं प्रदर्श्य द्रव्यभाषास्वरूपम् । |
| ११४- ३ | भावभाषास्वरूपम् । प्रसङ्गतः दशविधसत्यभाषास्वरूपं सोदाहरणं निरूप्य षोडशवचनविधिस्वरूपम् । |
| ११७- ४ | असत्यामिश्रव्यवहारभाषाणां प्रत्येकं दशविधत्वं प्रतिपाद्याराधना-विराधनास्वरूपम् । |
| ११९- ९ | शब्दद्वितीयभेदध्वनिस्वरूपव्यावर्णनमुखेन शब्दपौद्गलिकत्वसिद्धिः । |
| ११९-२३ | पुद्गलस्वरूपाधिकारे बन्धस्वरूपम् । मात्रबन्धप्रत्ययस्निग्धत्व-रूक्षत्वयोर्निर्वचनं स्थौल्यसौक्ष्म्यप्रतिपादनं च । |
| १२३-१७ | विभागापराह्वभेदस्य पञ्चविधत्वप्ररूपणया तस्यापि पौद्गलिकत्वसिद्धिः । |
| १२५- ९ | शरीराणां पुद्गलमयत्वात् शरीरपदस्य व्युत्पत्तिं प्रदर्श्य तद्भेदपञ्चकमुपन्यस्य परमाण्वौदारिकस्य स्वरूपम् । |
| १२६- २ | वैक्रियस्वरूपम् । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| पृष्ठम् पङ्क्तिः | विषयः |
|---|---|
| १२७-१३ | आहारकस्वरूपम् । तत्र च आहारकशरीरकरणप्रयोजनव्यावर्णनप्रसङ्गे प्रश्ननिरचिकीर्षाया एव हेतुत्वेनोपन्यास 'अनागमिक' इति प्रतिपाद्य सपूर्वपक्षमन्यहेतूनुपन्यस्याऽऽहारकपदव्युत्पत्त्यादिकम् । |
| १२९-२२ | तैजसस्वरूपम् । |
| १३०-२४ | शीतलेश्यायाः तैजसशरीरप्रभवत्वसङ्गतिः । |
| १३१- ८ | कार्मणशरीरस्वरूपम् । प्रसङ्गतः कर्मण आवारकत्वसिद्धि–बन्धविचार–कार्मणनामाभिधाननिमित्तत्वादिविचारः । |
| १३२-२२ | शरीरपञ्चकस्य परस्परं विशेषविचारोपक्रमः हेतुनवकेन च शरीराणां मिथः विभक्ततरत्वविचारः । |
| १३८-२१ | औदारिकशरीरस्यासङ्ख्यातप्रमाणत्वसङ्गतिः । |
| १३९-१२ | पुद्गलाधिकारप्रसङ्गेन वाचः पौद्गलिकत्वविचारः । |
| १४०- ७ | वाचः स्वरूपप्रसङ्गे भाषाद्रव्यग्रहणनिसर्गविधिमतान्तरैदम्पर्यादिस्वरूपम् । |
| १४२-२३ | भाषाद्रव्याणां व्यापकत्व–श्रुतिगोचरत्व–सङ्घातभेदस्वरूपम् । |
| १४५- ९ | भाषासमुद्घातीयलोकपूरण–मर्मोद्भेदपूर्वक – त्रिचतुःपञ्चसमयेषु लोकव्याप्तिप्रकाराणामुपन्यासः । |
| १४६-२३ | सम–विषम श्रेणिगतशब्दपुद्गलस्वरूपवैषम्यमुपदर्श्य ग्रहणं कायिकयोगेन निसर्गश्च वाग्योगेनेति कथमितिशङ्काऽपाकरणपूर्वं वाचः योगत्वसिद्धिः । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| पृष्ठम् पङ्क्तिः | विषयः |
|---|---|
| १४९-१६ | मनसः पौद्गलिकत्वविचारे मनोयोगस्वरूप–कार्यविचारः । |
| १५०-११ | आप्तप्राचीनगाथाऽऽधारेण सञ्ज्ञा – ऽसञ्ज्ञित्वविचारः । |
| १५१-२१ | मनोद्रव्यवत्त्वे सर्वेषां सत्यपि दीर्घकालिकीसञ्ज्ञानिबन्धनसञ्ज्ञित्वव्यपदेशविचारः । |
| १५५-११ | मनसोऽणुत्वादिविचारः। मनसः सर्वगतत्वसिद्धिः। |
| १५६-२१ | प्राणापानयोः पौद्गलिकत्वविचारः । |
| १५८-१४ | इन्द्रियायुराहारादीनां पौद्गलिकत्वे सत्यप्यत्र कथं न तेषामुपन्यास इति प्रतिपादनम् । |
| १५९- २ | पुद्गलव्याख्याप्रसङ्गे शरीर–प्राणापान–वाङ्मनांसीति क्रमः कथं न स्वीकृतः इत्यस्य सोपपत्तिकं निर्वचनम् । |
| १५९-११ | पुद्गलानां नैमित्तिकोपकारप्रदर्शनप्रसङ्गे सुखदुःखादीनां स्वरूपव्यावर्णनोपक्रमः । |
| १५९-२० | सुखस्य पौद्गलिकत्वस्वरूपम् । |
| १६०-१० | दुःखस्य पौद्गलिकत्वस्वरूपम् । |
| १६१-१२ | प्रशमरतिगाथाधारेण प्रसङ्गतः वैषयिकसुखस्य दुःखरूपत्ववर्णनम् । |
| १६२-२३ | जीवितस्य पौद्गलिकत्वविचारः । |
| १६३-२३ | मरणस्य पौद्गलिकत्वविचारः । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| पृष्ठम् पङ्क्तिः | विषयः |
|---|---|
| १६४– ६ | प्रसङ्गतः सोपक्रमायुष्कादिविचारः । |
| १६५–१८ | प्रकारान्तरेण 'धम्माधम्मागासे' इति द्वितीयगाथाव्याख्या । |
| १६६–१० | धर्मादीनां त्रयाणामेकतरत्वस्थानसङ्गतिः । |
| १६७– ९ | जीवबहुत्वविचारः । |
| १६७–१३ | जीवानां ब्रह्मप्रतिबिम्बत्वनिरासः । |
| १७२–२१ | प्रसङ्गतोऽद्वैतवादस्वरूपमुपदर्श्य तस्य निराकरणम् । |
| १७४–१६ | पञ्चास्तिकायवर्णनात्मकद्वितीयगाथाव्याख्या समाप्तिप्रशस्तिः । |
| १७४–२२ | तृतीयगाथागत 'एए अणाइणिहणा' इति पदव्याख्या । |
| १७५–१२ | पञ्चास्तिकायस्यानादिनिधनत्वस्य उत्पादादित्रययुक्तसत्त्वधर्मेण सह सङ्गतिः । |
| १७५–१७ | प्रसङ्गतः नयानां परस्परसापेक्षत्वं प्रतिपाद्य प्रमाणवाक्यत्वसङ्गतिविचारः । |
| १७७–१५ | प्रसङ्गतः द्रव्येभ्यो द्रव्योत्पादविचारासारत्वविमर्शप्रसङ्गे आत्मन आकाशोत्पत्तिप्रभृतिपरिकल्पितवादपरिफल्गुत्वव्यवस्थापनम् । |
| १७९–१८ | जीवस्यानादिनिधनत्वसिद्धेः धर्मसङ्ग्रहणीगाथाभिः विशदतरं विविधयुक्तिगर्भं प्रतिपादनम् । |
| १८९–१२ | वस्तुविचारे परीक्षायाः महत्त्वविचारः । |
| १८९–१८ | पुद्गलानामप्यनादिनिधनत्वसिद्धिः । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| पृष्ठम् पङ्क्तिः | विषयः |
|---|---|
| १९०– ७ | गाथायाः प्रकारान्तरेण शब्दार्थः । |
| १९०–१४ | वस्तुविचारे नित्यानित्यत्ववादविचारमहत्ता । |
| १९१–२० | प्रसङ्गतः स्याद्वादप्राधान्यम् । |
| १९२–१७ | गाथागत ‘ वर्त्तते ’ पदरहस्यम् । |
| १९३– ७ | प्रसङ्गतः तत्तद्विचित्रकार्यजनकत्वे अदृष्टे तत्सञ्चालकत्वमीश्वरादेर्न किन्तु स्वभावस्यैव मुख्यत्वमिति प्रतिपादनम् । |
| १९५–१६ | सर्वद्रव्याणां कार्यकारणभावेन वृत्तिस्वरूपम् । |
| १९९– २ | सर्वपदार्थानां कार्यकारणभावेन सापेक्षवर्त्तनेन हेतुना कथञ्चित् कर्तृत्ववादसङ्गतिः । |
| २०२–१० | चतुर्थगाथोपक्रमः । |
| २०२–२० | सर्वभावानामनादिनिधनताव्याख्यानम् |
| २०३– २ | गाथाया व्याख्यान्तरं प्रसङ्गतश्चाभावस्य भावाभावात्मकत्वविचारः । |
| २०४– ६ | गाथाद्वितीयचरणव्याख्या । तत्र च विविधव्याख्याप्रकारनिदर्शनम् । |
| २०६–११ | अस्तिकायस्वरूपनिगमनम् । तत्र चानादित्वनिर्वचनम् । |
| २०८– ४ | एकान्तनित्यवादप्रमाणाकरणाय चतुर्थपादनिर्वचनम् । |
| २०९–२० | चतुर्थपादगत ‘ परिणति ’ पदगर्भार्थव्यावर्णनद्वारा-वैशेषिकमतापाकृतिसूचनम् । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| पृष्ठम् पङ्क्तिः | विषयः |
|---|---|
| २१०–१९ | तथातथापरिणतिस्वरूपम् । |
| २१२– ४ | पञ्चमगाथोपक्रमः । |
| २१२– ७ | गाथाव्याख्या । |
| २१३– ५ | तथास्वभावत्वेन हेतुनाऽनादित्ववत् पञ्चास्तिकायानामादित्वमपि कथं नेति प्रतिबन्द्या सूचितम् । |
| २१४–१८ | व्याख्यान्तरेण साङ्ख्याभिमतप्रकृतिवादनिरसनम् । |
| २१६– ७ | षष्ठगाथोपक्रमः । |
| २१७– ४ | गाथाव्याख्या । |
| २१७– ६ | गाथागत 'परमपुरुष' पदविशिष्टव्याख्याप्रकाराः । |
| २१९– ५ | अस्तिकायानां परमपुरुषप्रभवत्वाभावत्वस्योपक्रमः विशदतरचर्चाप्रारम्भः । |
| २१९–१४ | परमेश्वरस्याऽस्तिकायसर्गे प्रयोजनाभाव इत्यस्य विवेचनम् । |
| २२०–१२ | सृष्टिरचनाभावे सुष्ठुः कृतकृत्यत्व–स्वतन्त्रत्वहेतुनिरूपणम् । |
| २२०–२० | जगन्निर्माणे संसार्यदृष्टप्रेरणायाः क्रीडायाश्च हेतुत्वेन निरासः । |
| २२१–२० | सरागतानिर्वचनम् । वीतरागे जिनेश्वरेऽपि सरागतादूषणस्यापाद्यमानस्य परिहारः । तत्र च प्रसङ्गतः कर्मबद्धानां जीवानां मोक्षणाय जगदीशस्य सर्गप्रवृत्तिरित्यादिविचारः । |
| २२५– १ | ईश्वरस्य जगत्कर्तृत्व–दलाभावरूप–द्वितीयदूषणनिरूपणम् । |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## पू० आगमोद्धारक-आचार्यप्रवरश्रीआनन्दसागरसूरीश्वर-

# गुण-स्तुतिः ।

प्रवर्त्तमानतीर्थेशं वन्दित्वा ज्ञातनन्दनम् ।
स्तवीमि सूरिराजं सद्-गुरुमानन्दसागरम् ॥१॥

१९३१
देशे मनोहारिणि गूर्जराख्ये, श्रीविक्रमाद् भूगुणनन्दचन्द्रे ।
वर्षे पुरं कप्पडवञ्जसञ्ज्ञं, व्यधात् पवित्रं निजजन्मना यः ॥२॥

नेमावणिग्वंशभवोऽभवत् पिता, श्रीमग्नलालेत्यभिधो यदीयः ।
माता सुशीला यमुनाभिधाना, भ्राता सुधीः श्रीमणिलालनामा ॥३॥

संसारनैर्गुण्यविदौ यदीयौ, वृद्धः पिता ज्येष्ठसहोदरश्च ।
प्रपन्नवन्तौ विनयाभिधान-गुरोः पदाब्जे चरणं जिनोक्तम् ॥४॥

१९४७
मुन्यब्धिनिध्यब्जसमे गणीनां, जह्वेरवारांनिधिसद्गुरूणाम् ।
पादारविन्दे ललनादिसङ्गं, हित्वा व्रतं यः स्व्यकरोत् युवत्वे ॥५॥

यः शब्दतर्कागमशास्त्रवेत्ता, विशुद्धपञ्चाचरणैः पवित्रः ।
आपञ्चमाङ्गं विधिनोढयोगः, सद्देशनाकारिषु चाग्रगण्यः ॥६॥

धैर्येण गाङ्गेयगिरिः सुधांशुः, सौम्येन गीर्वाणगुरुः सुबुद्ध्या ।
परार्थकारित्वगुणेन मेघः, सिन्धुश्च गम्भीरतयाऽभवद् यः ॥७॥

यः तत्त्वप्रश्नोत्तर-जैनगीते, सिद्धप्रभानामकशब्दशास्त्रम् ।
न्यायावतारे द्वयविंशिकायां, वृत्तिं तथाऽन्या व्यदधात् कृतीश्च ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१९७४

यं वत्सरे वेदहयाङ्कचन्द्रे, सूर्ये पुरे सूरिपदेन पूज्यम् ।
व्यभूषयत सङ्घकृतोत्सवेन, गुणोदधिः श्रीकमलाख्यसूरिः ॥९॥

वाचंयमानां च परःशतानां, श्रुतार्थिनां पत्तनमुख्यपुर्षु ।
षाण्मासिकीः सप्त जिनागमानां, यो वाचना अर्पितवान् श्रुतज्ञः ॥१०॥

१९७१

तत्रादिमा संवति वैक्रमीये, भूम्यश्वनन्देन्दुमिते वितीर्णा ।
सुचारुजैनेन्द्रगृहेऽणहिल्ल–पुरे प्रतीते श्रुतवाचनैका ॥११॥

द्रङ्गे तथा कप्पडवञ्जसञ्ज्ञे, स्वजन्मना पूततमे द्वितीया ।
अहम्मदावादपुरे तृतीया, सद्वाचना जैनपुरीतिवित्ते ॥१२॥

जिनालयैरागममन्दिराद्यै–र्विभूषिते सूर्यपुरे प्रसिद्धे ।
दत्ते चतुर्थी किल पञ्चमी च, मनोहरे आगमवाचने द्वे ॥१३॥

षष्ठी च शत्रुञ्जयतीर्थभूमौ, श्रीपादलिप्ताभिधरम्यपुर्याम् ।
दत्तान्तिमा मालवदेशरत्ने, ख्याते पुरे श्रीरतलामसञ्ज्ञे ॥१४॥

अन्यान्यसङ्घाटकसन्मुनीनां, सिद्धान्तबोधस्य विवर्धनाय ।
एवं वितीर्य श्रुतवाचनाली–मनुग्रहं यो व्यदधन् महान्तम् ॥१५॥

निर्युक्तिभाष्यादियुतं कृतान्त–माचारमुख्यं गणभृद्प्रणीतम् ।
यः शोधयित्वा स्वयमेव सम्यक्, प्राकाशयत शासनबद्धरागः ॥१६॥

सूर्यात पुरात सिद्धगिरेः सुसङ्घं यन्निश्रया जीवनचन्द्र इभ्यः ।
१९७६
चकर्ष षट्सप्तनिधीन्दुवर्षे, रीषट्कपालं बहुसाधुश्राद्धम् ॥१७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्आज्ञया पोपटलालश्रेष्ठी श्रीजामपूर्वान् नगरात् सुपुण्यः ।
१९९४
अकर्षयन् सिद्धगिरेः सुसङ्घं षड्रीयुतं वेदनवाङ्कगोऽब्दे ॥१८॥

न्यवारयन् मालवदेशसैला–नेशं हरिश्चन्द्रनृपं प्रबोध्य ।
अजादिहिंसां तदधीनदेशे, घस्रेषु यः पर्युषणादिकेषु ॥१९॥

सुदीर्घकालस्थितये श्रुतस्य, शुभोपदेशं समवाप्य यस्य ।
मनोरमे देवविमानतुल्ये, जाते शुभे आगममन्दिरे द्वे ॥२०॥

शत्रुञ्जयाद्रेस्तलहट्टिकायां, शीलासमुत्कीर्णकृतान्तमेकम् ।
द्वैतीयिकं सुन्दरताम्रपत्रो–त्कीर्णागमं सूरतबन्दिरे च ॥२१॥

भोपावराख्यं जिनशान्तिनाथ–विभ्राजितं विश्रुतसुप्रभावम् ।
यस्योपदेशादगमत् प्रसिद्धिं, तीर्थं शुभं मालवमण्डलस्थम् ॥२२॥

अन्यान्यपीत्थं सुकृतानि जैन–बिम्बप्रतिष्ठाप्रमुखानि सूरिः ।
२००६
विधाय षट्शून्यनभोऽक्षिवर्षे ध्यानस्थितः सूर्यपुरेऽगमद् द्याम् ॥२३॥

इत्थं स्तुतः श्रुतधरः शुचिसंयमादि–
माणिक्यसिन्धुरनगारगणाऽऽनतांघ्रिः ।
जहवेरसागरगणीश्वरपट्टदीप,
आनन्दसागरगुरुर्जयतात् स सूरिः ॥२४॥

— × —

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

पू. आगमोद्धारक–आचार्यश्री–आनन्दसागरसूरिनिर्मितवृत्तियुता
याकिनीमहत्तरासूनु–आचार्यश्रीहरिभद्रसूरिपुरन्दरप्रणीता

# लोकविंशिका ।

( द्वितीयः खण्डः )

नत्वा वीरं सुवर्णाद्रि–धीरं स्याद्वादवादिनम् ।
उपजीव्य यदीयोक्ती–र्मन्ये सुधां वृथा भुवि ॥१॥

निरस्य संस्कारमनादिलीनं, श्रुतिर्यदीया व्यदधात् सुबोधम् ।
कुवासश्रृङ्गिविशरारुताऽशनिं, नमामि तं सार्वगुरुं त्रिशुद्ध्या ॥२॥

गूढा गिरो यत्प्रभवात् प्रभावात्, सत्तर्कशून्येन मया श्रमेण ।
बुद्ध्यन्त एताः प्रबलप्रभस्य, प्रभाभरादर्थभरो यथा कौ ॥३॥

अप्रस्तुतनिराकरणपूर्वकप्रस्तुतपरिज्ञानहेतुकलोकनिक्षेप–तद्भेदानुभेदविवरणादि विधाय प्रस्तुतं व्याख्यायते । तत्र–

" पंचत्थिकायमइओ अणाइमं वट्टए इमो लोगो "त्ति

शास्त्राभिधेयमुद्दिश्य निर्गलितार्थोऽभ्यधायि प्रसङ्गानुप्रसङ्गेनाप्येतदेव सिषाधयिषितमत्र । यद्वा–प्रतिज्ञादिनिर्देशोऽनेन अकारि आचार्यवर्येण । स चैवम्–अयं लोकोऽनादिमान् पञ्चास्तिकायात्मकत्वादिति । दृष्टान्ता अत्र व्यतिरेकिणो घटपटादयः । तत्तद्रूपेण व्यवह्रियमाणलोकस्य पक्षत्वात् जीवाद्यस्तिकायावयवमयत्वस्य पारमार्थिकस्वरूपस्य हेतुत्वाच्च न पक्षहेत्वोरैक्यम् । सामान्यरूपेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पक्षता विशेषरूपेण हेतुता च 'प्रमाणं वस्तुनिश्चायी' त्यादौ सर्ववादिसम्मतैवेत्यलम्। अधुना पुरत एतस्यैव विस्तारेणाभिधास्यमानत्वात्।

अत्र पञ्चेति सङ्ख्या। अस्तयश्च प्रदेशाः। पारिभाषिको ह्ययमस्ति प्रदेशवाचकः। "असूच् क्षेपणे" इति दैवादिको धातुः। अस्यते–क्षिप्यते–विविच्यते वस्तु अनेनेत्यौणादिको 'हमुषिकुषिरिषी' [ ६५१ ] त्यादेर्विहितस्तिः बाहुलकाद् बहुवचनज्ञापितात्तौ। यद्वा– "बहुल" मितिवचनात् स्त्रैणोऽपि क्तिरत्राऽत्र। तेषां कायः–'चिंगट् चयने' इति सौवादिकात् चिति–देहावासोपसमाधाने कश्चादे' [ सि० ५–३–७९ ] रित्यनेन चेर्घञि चस्य कत्वे च, काय इति। तथा च प्रदेशसमूहवानिति फलितोऽर्थः।

ननु चैवं परमाणोर्न स्याल्लोकता, तस्य नास्ति यतः प्रदेशसमूहो "नाणो" रिति वचनात्, परमाणुत्वव्याहतेश्च अन्यथा, प्रदेशमात्रेण सङ्ग्रहे च कायशब्दवैयर्थ्यम्, कालस्याप्यस्तिकायत्वापत्तिः, तस्यापि समयलक्षणत्वेन प्रदेशरूपत्वादिति चेत्। सत्यं, प्रदेशसमूहवद्वृत्त्यसाधारणतत्तद्धर्मवत्त्वेन परमाणोर्ग्रहात् कालस्य चोपेक्षणात्। यद्वा–न केवलः परमाणुरनादितः कोऽपि, किन्तु स्कन्धादिपरिणतपूर्व एवानन्तशः, असङ्ख्यकालातिक्रमे अवश्यं परमाणोः केनापि परमाण्वादिना संयोजनान्न नास्त्यस्तिकायता। न चैवं कालस्य समयलक्षणस्य। यद्वा–प्रकृष्टो देशः प्रदेश इति व्युत्पत्तेः परमाणोरप्यव्याहतमेव प्रदेशत्वम्। न च समयस्यावयवता कथञ्चनापि, अतीतानागतयोर्विनष्टानुत्पन्नत्वात्। यद्वा–प्रदेशानां समूहस्य सञ्ज्ञेयम्, कायशब्दस्य च राश्यादिवद् बहुपदार्थवाचकत्वेन बहुत्वेऽपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न बहुवचनान्तता। तथा प्रदेशत्वात् परमाणोरस्तित्वं तथा द्व्यणुकादीनामप्यस्तयः तेषां सर्वेषां परिणतानां च कायः—अस्तिकायः। न चैवं काले व्यापत्तिः, कायत्वाभावात्। प्रतिस्कन्धं चैवं सति पुद्गलास्तिकायता प्रतिजीवं चास्तिकायता, प्रदेशसमूहभावात् अस्तिकायत्वम्। तथा च "आऽऽकाशादेकद्रव्याणि" तथा "अजीवकाया धर्माऽधर्माऽऽकाशपुद्गला" [ तत्त्वार्थ० ] इति "धर्माधर्माकाशान्येकैकमतः परं त्रिकमनन्तं। कालं विनाऽस्तिकाया" [ प्रशमरतिः ] इत्यादि च सर्वमुपपद्यते। तत्त्वतस्तु परिणतप्रदेशराशीनामस्तिकायता, परमाणूनां तु परिणामार्हत्वेन तथात्वमिति। पञ्च अस्तिकाया अस्मिन्निति पञ्चास्तिकायमयः "अस्मिन्" [सि० ७–३–२] इति मयट्, अपूपमयं पर्वेतिवत्। न चाधिकरणभेदाभावादयुक्तमिति मयट्प्रत्ययकरणं, लोकशब्दवाच्यसमुदायस्य तथाविवक्षयाऽविरोधात्, तन्तुमयः पट इतिवत्। नहि तत्र प्राचुर्ये प्राधान्ये वा प्रकृतार्थरूपे मयट्। किन्तु 'अस्मिन्' इत्यनेनाव्यतिरेकेऽपि। यथा तन्तुपटयोर्भेदेन विवक्षा मयट् च, एवमत्रापि, अवयवावयविभावस्तु उभयत्रापि समान एव। प्रत्येकं तन्तोः पटत्वाभाववत् प्रत्येकमस्तिकायस्य लोकत्वाभावो वर्तते एव। मयटय्इर्वा [५०] इति प्राकृतसूत्रेण च 'मइउ'त्ति। के अस्तिकायाः पञ्च? कथं चैषां सिद्धिरिति प्रकरणकारा यदाऽऽख्यास्यन्ति क्रमेणैतांस्तदा भविष्यति स्पष्टमिति न त्वरणीयम्। कोऽयमित्याह–"लोउ"त्ति। पूर्वमष्टधा प्रतिपादितेषु लोकभेदेषु द्रव्यलोकस्य जीवाजीवद्रव्यात्मकस्येहाधिक्रियमाणत्वात् स एव ग्राह्यः। नाम-स्थापना-भव-भाव-पर्यायलोकानां द्रव्यलोकाव्यतिरेकात् तत्रानादित्वनियमानभ्युपगमाच्च।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षेत्रकालौ तु द्रव्यलोकान्तर्गतावेव वैशद्यायैव च पृथगुक्ताविति तद्व्याख्यान एव प्रतिपादितं तन्न तयोरपि ग्रहः। यद्वा–लोकशब्द-वाच्यो भुवनादिरविवृत एव लोकशब्देन ग्राह्य इति पूर्वं प्रतिपादितमेव पक्षहेत्वोर्भेदायेति। कीदृशोऽयम्? इत्याह–"अणाइमं"ति। आदीयते इति आदिः। "उपसर्गादः कि" [५–३–८७] रिति कौ सिद्धिरिष्टरूपस्य। आदिरस्यास्तीति आदिमान् "तदस्यास्त्यस्मिन्निति मतु [७-२-१] रिति मतुः। असतो लब्धजन्मत्वं प्रागभावप्रतियोगित्वमित्यर्थः। न तथा अनादिमान्। अन्यथाकरणे तु "न तत्पुरुषान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर" इति नियमेन मतोरनुचितत्वप्रसङ्गः। न चानादिरिति पदार्थवर्त्ती धर्मः, यतो भवेन्मत्वर्थीयः। भावप्रत्ययलोपेन विधानेऽपि समाधानस्य कथञ्चित् पूर्वोक्तनियमबाधस्तु दुर्वार एव। किमित्याह–"वट्टए"त्ति। वर्तते–प्रवर्तते स्वस्वानुभावेन। अनेन द्रव्यत्वेनाऽवस्थितस्याऽपि पञ्चास्तिकायात्मकलोकस्य नवनवपर्यायोत्पाद–प्राक्तनपर्यायविनाशौ नापलप्येते इति ज्ञाप्यते, ज्ञाप्यते च तेषामप्येककर्तृत्वाभाववत्त्वमिति। यद्वा–'वर्तते' इत्यनेन यथा वृत्तिर्लोकस्य तथैवाख्यायते, नत्वसदभिनिवेशादिना कुतर्कादिनेति ध्वन्यते। तादृशो वक्तुस्तत्त्वावबोधपथप्रतिबन्धकत्वप्रतिज्ञानात्। व्यवहृतलोकस्य विशेषेण पक्षत्वमितिज्ञापनायाऽऽहुः–'इमो'त्ति। अयं लोक इति पूर्वं व्याख्यातम्। इदन्ता च प्रत्यक्षवर्तिन्येव।

"इदमस्तु सन्निकृष्टे समीपतरवर्ति चैतदो रूपम्।
अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयाद्"॥

इतिनियमात् पक्षश्च मुख्यतया प्रमाणसिद्ध एव ग्राह्य इति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नियमाच्च । अन्यथाविधस्य तु लोकस्य पक्षत्वे कल्पनासिद्धः पक्षः, प्रत्यक्षता च हृद्वर्तितयेति समवसेयम् । अत्रेदमैदम्पर्यम्–अस्तिकायानाम् " नासतो विद्यते भावो नाऽभावो विद्यते सत " इति " नित्यावस्थितानी " [ तत्त्वार्थ० ] ति ' द्रव्याणां नाशाभावः ' इति नियमाच्च अस्तिकायानां नित्यत्वमस्तिकायपञ्चकात्मकत्वाच्च लोकस्यापि नित्यत्वमित्यनादिमत्ताऽस्य ।

न च वाच्यम् अप्रतीतमेव साध्यं स्याद्, द्रव्यापेक्षया च लोकस्य परैरप्यनादिताऽभ्युपगतेति तेषां प्रतीतैव, धर्माऽधर्मयोरनभ्युपगमेऽपि आकाशजीवपुद्गलानामनादित्वाभ्युपगमात्तैरिति । कैश्चिदाकाशादीनामप्युत्पत्तिमत्त्वाभ्युपगमात् । यैरपि चाभ्युपगता आकाशादीनां नित्यता, तैरपि न भवानुभावस्य नित्यताभ्युपगता क्षेत्रपरिणामादेश्च, तावपि च द्रव्यलोकान्तर्गततया प्रवाहनित्यावेवेति स्पष्टमेवैषां प्रतीतत्वाभावः । यदि वा " वर्त्तते " इत्यनेन वर्तमानकालीनप्रत्ययान्तेन साम्प्रतीनव्यवस्थायुक्तलोकस्यानादिवर्तनासाधनायोपक्रम इति ध्वन्यते ।

न च वाच्यं कथमेतद्युज्यते ?, अवसर्पिण्युत्सर्पिण्योर्वर्तमानव्यवस्थाविलोपस्य कालविशेषे भवदभियुक्तैस्तदनुसारिभिर्भवद्भिरङ्गीकारात् । प्रवाहानादितायाश्चान्यैरपि " उपपद्यते चाप्युपलभ्यते चे "ति, " यदा यदा हि धर्मस्ये "ति, "सम्भवामि युगे युगे"इति, "सूर्याचन्द्रमसोधाता यथा पूर्वमकल्पयत्" इति, मन्वन्तरासङ्ख्याधिकारश्रवणाच्च ब्रह्मसूत्र–भगवद्गीता–ऋक्संहिता–योगवशिष्ठादौ स्वीकृतैवेति का विप्रतिपत्तिः ? यन्निरसनाय युज्येत प्रस्तुतप्रकरणं प्रस्तुतं ध्वननं चेति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नहि सर्वत्र कालविशेषः, किन्तु महाविदेहादाववस्थित एव कालः। न च तत्र कदाचनापि विलोपो व्यवस्थायाः, तद्योग्यतामर्हत्येव प्रकरणमारम्भस्य। किञ्च–अयमित्यनेनेदमपि ध्वन्यते–यत् प्रत्यक्षमीक्ष्यमाणं भूभूधरादिकमिति। न चेदमनादितया अभ्युपगम्यते तैः। न च वाच्यं भूभूधरादिकं कथं लोकशब्दवाच्यमिति, तथा सति स्यात् विस्मरणशीलता देवानुप्रियाणाम्। यतः क्षेत्रलोकावसरे य ऊर्ध्वादितया विभक्तः, तत्र किं न्यूनं यत् शङ्क्यते एतत्। यदि वा "खित्तपज्जवे" त्यत्र किं भरतादीनां क्षेत्राणामनुभावा नोद्दिष्टाः? येन शङ्काशीलैः शङ्क्यतेऽस्थाने। "वत्तेत" इत्यनेनेदमपि ज्ञापयन्त्याचार्या यदुत–यथा परे प्रतिपादयन्ति यद् ब्रह्मा उत्पादयत्यवन्यादि, महेश्वरो ध्वंसयति, पालयति च विष्णुरिति प्रभव–लय-पालन–लक्षणकार्यत्रयमीश्वरत्रयकृतमिति। तत्र अनादिमत्ताऽऽख्यानेनोत्पादव्ययौ परतीर्थिकप्रकल्पितौ प्रत्याख्यातौ, तथाभावे दृश्यमानप्रपञ्चान्वितलोकस्यानादित्वाभावात्। प्रत्याख्यातयोरपि च तयोर्यदि ब्रूयात्–मा भूतां विश्वव्यवस्थायुक्तविश्वाविर्भावतिरोभावौ, परं पालनाभावे दृश्यमानवर्त्तनाभावादवश्यं पालकत्वं स्वीकार्यमेवेश्वरविहितमिति, तन्निरसनाय स्वभावेनैव वर्त्ततेऽयं लोकः, नत्विमं कोऽपि वर्त्तयति। न च वाच्यं भूभूधरादेर्लोकत्वेनाभिप्रेयस्य पक्षत्वे कथं तत्र वर्ती भवेद् हेतुः, तस्य केवलपुद्गलात्मकत्वादिति चेत्। न, यत्र हि पुद्गलाः स आकाशो लौकिकः। लौकिके चाकाशेऽवश्यंतया धर्माऽधर्माद्याः। उच्यते चार्षेऽप्यतः–"किमिणं भंते! गामेत्ति पवुच्चइ?। गोयमा! जीवा चेव अजीवा चेव"त्ति। न च वाच्यं अस्तिकायात्मकतया साध्यमाना

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनादिता किं परमाण्वादौ द्व्यणुकादावस्ति, नास्ति अनादितापीति चेद्, द्रव्यरूपेण, न तु पर्यायरूपेण, पर्यायाणां च नैवाभ्युपगम्यते अनादिता, न च साध्यतेऽपि । विवर्त्तमानो लोकस्तु पर्यायरूप इति कथमनादिमान् भवतीति चेत् ? सत्यम्, नास्ति विवक्षितानां पर्यायाणामनादिता, परं द्रव्यस्याऽविच्छिन्नप्रवाहापेक्षया अनादिमत्त्वे द्रव्यस्य च पर्यायव्यतिरेकेणाभावात्, पर्यायत्वेन पर्यायाणामप्यनादिता अविच्छिन्नैव । न च सकर्तृकत्वे विश्वस्य भवति पर्यायाणामविच्छिन्ना वृत्तिरनादिमती, तदभावे च स्पष्टैव द्रव्यत्वक्षतिः, क्षतेश्चास्य स्पष्टमेवास्तिकायताव्याघातः, प्रदेशानामद्रव्याणामप्रदेशस्य चास्तिकायत्वाभावात् । न च वाच्यं व्यर्थविशेषणो हेतुः, अस्तिकायत्वमात्रेणाऽनादितासिद्धेः, न पञ्चशब्दः प्रयोज्य इति । हेत्वपेक्षया व्यर्थत्वेऽपि लोकस्वरूपोद्देशेनैव तथाकरणात् । न च लोकेऽस्त्येकोऽपि प्रदेश आकाशस्य तादृक्, यत्राऽस्तिकायपञ्चकं न समाविष्टम्, का वार्ता तिर्यग्लोकस्येति । न च भूभूधरादिर्लोकेऽप्येकस्य पुद्गलादेरभिधावान्, तद्वृत्त्यसुमदादीनामपि तेनैव व्यपदेशादिति सामान्यवाक्यार्थापेक्षया 'पञ्चे'ति । हेतुतावस्थायां परित्याज्यं पञ्चेति ।

अन्ये तु व्याचक्षते–नायमनुमानसूचको वाक्यप्रयोगः, किन्त्वभिधेयतात्पर्यार्थः । तथा च पञ्चास्तिकायमयत्वविशेषणविशिष्टो दृश्यमानो, मनसा व्यपदिश्यमानो वा लोकोऽनादिमान् इत्युपदिष्टम् । विशेषणं च यद्यपि व्यवच्छेदकं "सम्भवव्यभिचाराभ्यां स्याद् विशेषणमर्थवदि "तिवचनात् । तथाप्यनाविर्भूतस्वभावस्य भावस्याविर्भावनायाऽपि विशेषणस्य सम्मतत्वाद् 'आपो द्रवा उष्णोऽग्नि'-रित्यादि । न च ज्ञातं परैर्लोकस्वरूपं यथार्थतया, भूभूधरादेः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुद्गलस्यैव सजीवस्य वा लोकत्वेनाऽभ्युपगमात् । भवतु वा व्यवच्छेदकमपि, लोक्यमानो लोक इति व्युत्पत्त्याऽलोकस्यापि केवलार्चिषोद्योत्यमानत्वेन लोकत्वाऽव्याघातात्, न चात्राभिप्रेतः प्रज्ञाप्यतया स इति युक्तं विशेषणम्, तस्य केवलाकाशमयत्वात्, न पञ्चास्तिकायात्मकतेति तु स्पष्टमेव । अस्तु वा आकाशस्याऽप्यस्तिकायतया तस्याऽपि पञ्चास्तिकायाऽन्तर्गततया लोकशब्दवाच्यतया प्रज्ञाप्यत्वमनादिश्च सोऽपि । न केवलो लोकोऽत्र जनावन्यादिकोऽनादितयाऽभिप्रेतो लोकाभिप्रेतः, किन्तु पञ्चास्तिकायात्मक इति विशेषणमिति । उभयत्रापि व्यवच्छेद्यमाहुः–" न परमपुरिसाइकओ "-त्ति । तत्र नेति निषेधे । निषेधश्च पराभिमततया लोकस्य सकर्तृकत्वाभावात् । किं निषेधनीयम् ?, इत्याहुः–" परमे "ति । तत्र परमः–उत्कृष्टः, उत्कृष्टत्वं च परैरणिमाद्यैश्वर्यसम्पन्नतया स्वीकारात् । यत उच्यते तैः–" ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः ।
ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टय " ॥१॥ मिति । ऐश्वर्यं चाष्टधा,

यदाहुः–" लघिमा वशितेशित्वं, प्राकाम्यं महिमाणिमा ।
यत्र कामावसायित्वं प्राप्तिश्चैश्वर्यमष्टधा " ॥१॥ इति

तत्र लघोः " पृथ्वादेरिमन् " [ ७–१-५८ ] इतीमनि " त्र्यन्त्यस्वरादेः " [ ७–४–४३ ] इत्योर्लुकि च लघिमेति । यतः सूर्यरश्मीनप्यालम्ब्य सूर्यलोकादिगमनसमर्थो भवति स लघिमा । अनेन च न यावल्लोके कार्यकरणेऽपि सामर्थ्योऽभावः, अन्यथा हस्तिनेव सूच्याऽऽदानादि न महच्छरीरादिमानपि सर्वत्र क्रियासमर्थः स्यात् । तथा गमनादिशक्त्यभावात् । स च न परप्रेरणयाऽनात्मवशंवदतया वेत्याहुः–तथा " वशिता " । यया सर्वाणि चरा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चराणि भूतानि वशे वर्त्तन्ते, स तानि प्रयोजयति यथा न तैः प्रयुज्यते, तान्यधितिष्ठति नासावधिष्ठीयते तैः । सापि कथञ्चिदेव शिष्यादीनामिव गुर्वादीनां न, किन्तु सर्वथेत्याहुः-" ईशित्वं " प्रभव-लय-पालनसामर्थ्यम्, यथा यथा हि रोचते स्वस्मै, तथा तथा भूतान्युत्पादयति विलयति स्थापयति च । न तत् सामर्थ्यमन्तरेणेच्छामन्तरेण वा तस्य भवति, कस्यापि किञ्चिद्, तदपि न कदाचिद्, देशतो वेत्याहुः—

" प्राकाम्य "मिति । न भवति कदाचनाऽप्यस्येच्छाव्याघातः । यद्वा-न अमूर्त्तत्वोद्भूतकार्यक्रमविधायकः किन्तु यथेच्छं मूर्त्ताऽमूर्त्तयोः । न च जगदनुभवसिद्धो नियमोऽपि विघातकतयाऽस्येच्छासिद्धावुपतिष्ठते । यतो गच्छत्येवासौ उपात्तशरीरोऽपि अप्सु इव भूमावुन्मज्जन् । नह्यन्यथा भूमावुन्मज्जनादि साध्यं, जल एव तद्भावात् । नहि केवलमेतदेव, किन्त्वन्यदपि, तत एवाहुः—अन्ये अप्यैश्वर्ये " महिमाऽणिमे "ति ।

तत्र महिमा—महत्त्वं, 'सत्यो मन्युर्महिकर्म करिष्यत' इतिवचनात् यद्वा—" मह पूजाया "मिति चौरादिकोऽदन्तः परस्मैपदी ( धातुः ) तस्मात् ' स्वरेभ्य इ ' [ ६०६ ] रित्यौणादिक औ महिर्महानित्यर्थः । महेर्भावश्च महिमा, पृथ्वाद्यन्तर्गतत्वान् महेरिमन् 'ञ्यन्त्यस्वरादे'रिति लुक् चेः । एतच्च पृथुमृदुपटुमहितनुलध्वित्यादौ महेः पाठात् । महतो भावो वा महिमा, अन्तस्वराद्टि लोपोऽत्राऽपि । महिमा च यतः परमसूक्ष्मतमोऽपि विद्युत्प्रकाशवेगातिक्रान्तवेगेन नगादिमानो भवति । तथा च यावन्महत्कार्यविधानमपि न दुष्करम् ।

तथा अणिमा-अणोर्भावोऽणिमेत्येवं व्युत्पत्त्या अणुत्वाऽऽपत्तिः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येनाणिम्ना परमाणुसूक्ष्मशरीरोऽपि सम्पद्यते, येन परमाणुसंयोजनादिकां निवर्त्तयितुमलं स्यात् क्रिया नैकत्र, तत्करणसामर्थ्यं तु लघिमासम्पादितमित्युक्तमेव । अनेन च कथं महान् शरीरेण कुर्यात् क्रियामणोरणुर्वा महीधरादिघटनक्रियामिति निरस्तम् । शक्तयश्चैताः सहैवेति नैकदैककार्यविधानेन कालह्रास इतरविधानेषु । तथा च न कथञ्चिदपि विविधकार्यनिलयीभूतभवनोद्भावनादिविधानानर्हताऽस्य । न चेदमीश्वरप्रभावादेव केवलाच्चिन्तामण्यादेरिव निर्धनतानिधनादिर्भवति, अगदाद्वाऽचेतनादामयोपशान्तिवदित्याहुः—

" यत्रकामावसायित्व "मिति । कमनं कामः—सङ्कल्पः, अवस्यतीत्यवसायी-निश्चायकः, सङ्कल्पस्याऽवसायी सङ्कल्पावसायी । यद्वा—सङ्कल्पेन सङ्कल्पमात्रेणावसायी सङ्कल्पावसायी । यत्र यादृशे यस्मिँश्च कार्येऽसौ सङ्कल्पावसायी तादृशं तद् भवति यतस्ततो यत्रकामावसायी । मयूरव्यंसकादेराकृतिगणत्वेन समासः तत्त्वम् । यद्वा—यस्मिन् सङ्कल्पयतीति यत्रसङ्कल्पः तदनुसारेणावसायी कारको निश्चायको यत्रकामावसायी तत्त्वम् । अव्ययस्य बाहुलकात् सङ्कल्पेन समासः, अन्यथा वा परिभावनीयम् । यथा यथा सङ्कल्पयति तथा तथैव सम्पादकत्वमस्य । सङ्कल्पमात्रेणैव पदार्थानामुद्भवादिरिति तत्त्वम् । तथा च कथं कुर्याद् एकोऽनेकां परस्परविरुद्धरूपां प्रतिक्षणं क्रियामिति निरस्तम् । न च वाच्यं किं तर्हि अणिमादिवर्णनं शरीराश्रितं हि तदिति । एतदैश्वर्यमस्य यदुत—सङ्कल्पेन क्रियया वा यथारुचि सर्वं सर्वथा विधत्ते । अत एवाष्टममैश्वर्यमुच्यते—

" प्राप्ति "रिति । प्राप्तिमान् हि तथाविधो भवति यथा स्वयमवनितलगताऽपि अङ्गुल्यग्रेण गगनस्थादि वस्तु प्राप्नोति-स्पृशति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रवर्त्तयति वेति । अष्टविधैश्वर्यं परमेशितुरप्रतिघं च तदपीति तु माला-दवरकन्यायेन अप्रतिघपदस्यात्रापि सम्बन्धात् । यद्यपि च सन्त्येव ज्ञानवैराग्यधर्मा अप्रतिघास्तस्य परमेश्वरस्योत्कृष्टत्वहेतवः, तथाप्यसाधारण्यादैश्वर्यस्य, तैरेवात्र परमताभिमता ( उत्कृष्टता ) तथाविधश्चासौ पुरुषः, पुरि शयनात् । यथारुचि शरीरस्वीकारापेक्षया हि पुरि शयनमस्य । व्युत्पत्तिमात्रं वैतत् । प्रवृत्तिनिमित्तं तु चेतनावत्त्वमेव, जीवमात्रस्यैतेनाभिधानात् । यतः आचार्यपादाः- " क्षेत्रज्ञ आत्मा पुरुष " [ अभिधान० ] इति । तथा च परमपुरुषशब्देन परमात्मैवाभिहितोऽत्र, तस्यैवोक्तलक्षणत्वात् । आदिशब्दाच्च प्रकृतिदेवादिग्रहः, तैः कृतो-विहितो, नाऽयं लोक इति बोध्यमनुवर्त्त्य । तथा च पञ्चास्तिकायमयोऽयं लोकः स्वयं वर्त्तते अनादिमान् । न च परमपुरुषादिकृतः । परमपुरुषादिकृतत्वं च परैः प्रोच्यते एवेति नानङ्गीकृतोपालम्भः । तत्राऽप्यनेकाः प्रकाराः सृष्टिसर्जनवादिनामपि ।

तत्र एके ईश्वरमुपादानतयैव जगत उदाहरन्ति, उदाहरन्ति च यथा 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' वृत्त्येकदेशोऽस्य भाष्यगः- पूर्वपक्षितं तत्र ब्रह्मणो निमित्तकारणतया जगतो यथाऽवतारयितुमुक्तं ' ब्रह्म जिज्ञास्य ' मिति । ब्रह्म च ' जन्माद्यस्य यत ' [ ब्र० ] इति लक्षितम् । तच्च लक्षणं घटरुचकादीनां मृत्सुवर्णादिवत् प्रकृतित्वे कुलाल-सुवर्णकारादिवत् निमित्तत्वे च समानमिति । अतो भवति विमर्शः-किमात्मकं पुनर्ब्रह्मणः कारणत्वं स्यादिति । तत्र निमित्तकारणमेव तावत् केवलं स्यादिति प्रतिभाति । कस्मात् ? ईक्षापूर्वककर्तृत्वश्रवणात् । ईक्षापूर्वकं हि ब्रह्मणः कर्तृत्वमवगम्यते-' स ईक्षा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऋके ' ( प्र० ६–३ ) ' स प्राणमसृजत ' ( प्र० ६–४ ) इत्यादि श्रुतिभ्यः। ईक्षापूर्वकं च कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु दृष्टम्। अनेककारकपूर्विका च क्रियासिद्धिर्लोके दृष्टा। स च न्यायः आदिकर्त्तर्यपि युक्तः सङ्क्रमयितुम्। ईश्वरत्वप्रसिद्धेश्च। ईश्वराणां हि राज–वैवस्वतादीनां निमित्तकारणत्वमेव केवलं प्रतीयते, तद्वत् परमेश्वरस्यापि निमित्तकारणत्वमेव युक्तं प्रतिपत्तुम्। कार्यं चेदं जगत् सावयवमचेतनमशुद्धं च दृश्यते, कारणेनापि तस्य तादृशेनैव भवितव्यम्, कार्यकारणयोः सारूप्यदर्शनात्। ब्रह्म च नैवंलक्षणमवगम्यते, ' निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं ' (श्वे० ६–१९) इत्यादिश्रुतिभ्यः। पारिशेष्याद् ब्रह्मणोऽन्यदुपादानकारणमशुद्ध्यादिगुणकं स्मृतिप्रसिद्धमभ्युपगन्तव्यम्, ब्रह्मकारणत्वश्रुतेर्निमित्तत्वमात्रे पर्यवसानादिति।

एवं प्राप्ते ब्रूमः–प्रकृतिश्चोपादानकारणं, 'च' ब्रह्माभ्युपगन्तव्यं निमित्तकारणं च। न केवलं निमित्तकारणमेव। कस्मात्? प्रतिज्ञादृष्टान्तानुपरोधात्। एवं प्रतिज्ञादृष्टान्तौ श्रौतौ नोपरुध्येते। प्रतिज्ञा तावत्–' उत तमादेशमप्राक्ष्यो येनाऽश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातं ' ( छां० ६–१–२ ) तत्र चैकेन विज्ञातेन सर्वमन्यदविज्ञातमपि विज्ञातं भवतीति प्रतीयते। तच्च उपादानकारणविज्ञाने सर्वं विज्ञानं सम्भवति, उपादानकारणाऽव्यतिरेकात् कार्यस्य। निमितकारणाऽव्यतिरेकस्तु कार्यस्य नास्ति, लोके तक्ष्णः प्रासादव्यतिरेकदर्शनात्। दृष्टान्तोऽपि–' यथा सौम्य! एकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' ( छां० उ० ) इत्युपादानकारणगोचर एवाऽऽम्नायते। तथा ' एकेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यात्' ( छां० ६–१–४–५–६ ) तथा अन्यत्रापि 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' ( मुंड० १–१–३ ) इति प्रतिज्ञा। यथा पृथिव्यामौषधयः सम्भवन्ति (मुंड० १-१-७) इति दृष्टान्तः। तथा "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितं इति प्रतिज्ञा। स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयाद् ग्रहणाय, दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः" ( बृ० ४–५–६–८ ) इति दृष्टान्तः। एवं यथासम्भवं प्रतिवेदान्तं प्रतिज्ञादृष्टान्तौ प्रकृतित्वसाधनौ प्रत्येतव्यौ। 'यत' इतीयं पञ्चमी। 'यतो वा इमानि भूतानि जायन्ते' इत्यत्र 'जनिकर्तुः प्रकृति'रिति विशेषस्मरणात् प्रकृतिलक्षण एवाऽपादाने द्रष्टव्या। निमित्तत्वं चाधिष्ठात्रन्तराभावादधिगन्तव्यम्। यथा हि लोके मृत्सुवर्णादिकमुपादानकारणं कुलालसुवर्णकारादीन् अधिष्ठातॄन् अपेक्ष्य प्रवर्तते, नैवं ब्रह्मण उपादानकारणस्य सतोऽन्योऽधिष्ठाता अपेक्ष्योऽस्ति, प्रागुत्पत्तेः "एकमेवाऽद्वितीय"मित्यवधारणात्। अधिष्ठात्रन्तराऽभावोऽपि प्रतिज्ञादृष्टान्तानुपरोधादेवोदितो वेदितव्यः। अधिष्ठातरि हि उपादानादन्यस्मिन्नभ्युपगम्यमाने पुनरप्येकविज्ञातेन सर्वविज्ञातस्याऽसम्भवात् प्रतिज्ञादृष्टान्तोपरोध एव स्यात्। तस्मादधिष्ठात्रन्तराभावादात्मनः कर्तृत्वमुपादानान्तराभावाच्च प्रकृतित्वम्। कुतश्चात्मनः कर्तृत्वप्रकृतित्वे? 'अभिध्योपदेशाच्च' (ब्रह्म० १-४-२४) अभिध्योपदेशश्चात्मनः कर्तृत्वप्रकृतित्वे गमयति। 'सोऽकामयत बहु स्यां प्रजायेय' ( तै० उ० २–६ ) इति 'तदैक्षत बहु स्यां प्रजायेय' ( छां० )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति च । तत्राभिध्यानपूर्विकायाः स्वातन्त्र्यप्रवृत्तेः कर्तेति गम्यते । 'बहु स्या 'मिति प्रत्यगात्मविषयत्वाद् बहुभवनाभिध्यानस्य प्रकृतिरित्यपि गम्यते । 'साक्षाच्चोभयाम्नानात्' ( ब्रह्म० १–४–२५ ) प्रकृतित्वस्यायमभ्युच्चयः । इतश्च प्रकृतिर्ब्रह्म, यत्कारणं साक्षाद् ब्रह्मैव कारणमुपादाय उभौ प्रभवप्रलयावाम्नायेते । 'सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति' ( छां० १–९–१ ) इति । यद् हि यस्मात् प्रभवति यस्मिंश्च प्रलीयते तत्तस्योपादानं प्रसिद्धम् । यथा व्रीहियवादीनां पृथिवी । 'साक्षादि'ति चोपादानान्तरानुपादानं दर्शयति आकाशादेवेति प्रत्यस्तमयश्च नोपादानादन्यत्र कार्यस्य दृष्टः । 'आत्मकृतेः परिणामात् '(ब्र० १-४-२६) इतश्च प्रकृतिर्ब्रह्म, यत् कारणं ब्रह्मप्रक्रियायां 'तदात्मानं स्वयमकुरुत' ( तै० २–७ ) इत्यात्मनः कर्मत्वं कर्तृत्वं च दर्शयति । आत्मानमिति कर्मत्वम्, स्वयमकुरुतेति कर्तृत्वम् । कथं पुनः पूर्वसिद्धस्य सतः कर्तृत्वेन व्यवस्थितस्य क्रियमाणत्वं शक्यं संपादयितुं 'परिणामादि'ति ब्रूमः । पूर्वसिद्धोऽपि हि सन्नात्मा विशेषेण विकारात्मना परिणमयामासाऽऽत्मानमिति । विकारात्मना च परिणामो मृदाद्यासु प्रकृतिषूपलब्धः । स्वयमिति च विशेषणात् निमित्तान्तरानपेक्षत्वमपि प्रतीयते । 'परिणामादि 'ति वा पृथक् सूत्रम् । तस्यैषोऽर्थः–इतश्च प्रकृतिर्ब्रह्म, यत्कारणं ब्रह्मण एव विकारात्मना परिणामः सामानाधिकरण्येनाऽऽम्नायते 'सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च' ( तै० २–६ ) इत्यादिनेति । 'योनिश्च हि गीयते' (ब्र० १ ४-२७) इतश्च प्रकृतिर्ब्रह्म, यत्कारणं ब्रह्मयोनिरित्यपि पठ्यते वेदान्तेपु–'कर्तारमीशं पुरुषं ब्रह्मयोनिम्' ( मुं० ३–१–३ ) इति, 'यद् भूत-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योनिं परिपश्यन्ति धीराः ' ( मुं० उ० १-१-६ ) इति च । योनिशब्दश्च प्रकृतिवचनः समधिगतो लोके—पृथिवी योनिरौषधिवनस्पतीनाम् इति । स्त्रीयोनेरप्यस्त्येव अवयवद्वारेण गर्भं प्रत्युपादानकारणत्वम् । क्वचित् स्थानवचनोऽपि योनिशब्दो दृष्टः—' योनिष्ट इन्द्र निषदे अकारि ' (ऋ० सं० १-१०४-१) इति । वाक्यशेषात् त्वत्र प्रकृतिवचनता परिगृह्यते—' यथा उर्णनाभिः सृजते गृह्णते च ' ( मुं० उ० ) इत्येवं जातीयकात् । एवं प्रकृतित्वं ब्रह्मणः प्रसिद्धम् । यत्त पुनरिदमुक्तम्-ईक्षापूर्वकं कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु लोके दृष्टं, नोपादानेष्वित्यादि । तत्प्रत्युच्यते—न लोकवदिह भवितव्यम् । नहि अयमनुमानगम्योऽर्थः, शब्दगम्यत्वात् त्वस्याऽर्थस्य यथाशब्दमिह भवितव्यम् । शब्दश्च ईक्षितुरीश्वरस्य प्रकृतित्वं प्रतिपादयतीत्यवोचाम । पुनश्चैतत् सर्वं विस्तरेण प्रतिवक्ष्यामः " ।

अत्र यद्विस्तरेण निमित्तकारणताया ऐश्वर्याः प्रतिविधानं प्रतिज्ञातं तद् द्वितीयाध्यायीयप्रथमपादीयचतुर्थसूत्रेण " न विलक्षणत्वादस्य तथात्वं च शब्दादि "तिलक्षणेन पूर्वपक्षयित्वा " अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् । दृश्यते तु । असदिति चेत् ?, न प्रतिषेधमात्रत्वात् । अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् । न तु दृष्टान्ताभावात् । स्वपक्षदोषाच्च । तर्काऽप्रतिष्ठानादप्यन्यथानुमेयमिति चेद्, एवमप्यनिर्मोक्षप्रसङ्गः " इत्यादिसूत्रकदम्बेन समर्थितम्, आगमैक चक्षुष्कत्वाच्च भिन्नमधिकरणम् ।

निमित्तकारणवादिनस्तु ईश्वरः कारणं पुरुषकर्मफलदर्शनादिति पूर्वपक्षयित्वा उपादानतामीश्वरस्य न पुरुषकर्माऽभावे फलाऽनिष्पत्तेस्तत्कारितत्वादहेतुरिति प्रतिपादयाञ्चक्रुः वात्सायनभाष्यादौ । तथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्राह्मेण मानेन वर्षशतान्ते वर्तमानस्य ब्रह्मणोऽपवर्गकाले संसारखिन्नानां सर्वप्राणिनां निशि विश्रामार्थं सकलभुवनपतेर्महेश्वरस्य सञ्जिहीर्षासमकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्मगतानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छाऽऽत्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यः तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशः। तथा पृथिव्युदकज्वलनानामपि महाभूतानामनेनैव क्रमेण उत्तरस्मिन्नुत्तरस्मिन् सति पूर्वस्य पूर्वस्य विनाशः। ततः प्रविभक्ताः परमाणवोऽवतिष्ठन्ते धर्माऽधर्मसंस्कारानुविद्धा आत्मानस्तावन्तमेव कालम्। ततः पुनः प्राणिनां भोगभूतये महेश्वरसिसृक्षाऽनन्तरं सर्वात्मगतवृत्तिलब्धाऽदृष्टापेक्षेभ्यस्तत् संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति। तदनन्तरं तस्मिन्नेव वायौ आप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरुत्पन्नः पोप्लूयमानस्तिष्ठति। तदनन्तरं तस्मिन्नेव पार्थिवेभ्यः परमाणुभ्यो महापृथिवी संहताऽवतिष्ठते। तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिप्रक्रमेण उत्पन्नो महाँस्तेजोराशिः केनचिदनभिभूतत्वाद्देदीप्यमानस्तिष्ठति। एवं समुत्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्याभिध्यानमात्रात् तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुसहितेभ्यो महदण्डमारभ्यते। तस्मिँश्चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्माणं सकलभुवनसहितमुत्पाद्य प्रजासर्गे विनियुङ्क्ते। स च महेश्वरेण विनियुक्तो ब्रह्मा अतिशयज्ञानवैराग्यैश्वर्यसम्पन्नः प्राणिनां कर्मविपाकं विदित्वा कर्मानुरूपज्ञानभोगायुषः सुतान् प्रजापतीन् मानसान् मनुर्देवर्षिपितृगणान् मुखबाहूरुपादतश्चतुरो वर्णान् अन्यानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च उच्चावचानि भूतानि च सृष्ट्वाऽऽशयानुरूपैर्धर्मज्ञानवैराग्यैश्वर्यैः संयोजयतीति ।

उभयेऽप्येते समवलम्बयन्ति श्रुतीर्विविधार्थावतारपदवीभिर्वाग्भिः स्वमन्तव्यानुरोधेन । यथा ॐ ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत् । तथा यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामौषधयः सम्भवन्ति । यथा सतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वं ( १–१–७ ) । तदेतत् सत्यं यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः तथा अक्षराद् विविधाः सौम्यभवाः प्रजायन्ते तत्र चैवापि यन्ति ( २–१–१ ) तदात्मानं स्वयमकुरुत । तस्मात् सुकृतमुच्यते इति । तैत्तिरीये ७ । सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यान्ति आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् । (छान्दोग्ये० १–१–९) सर्वं खल्विदं ब्रह्म तज्जलानिति शान्तमुपासीत ( ३–१४ ) । स यथोर्णनाभिस्तन्तुनोच्चरेद् यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मदात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यं ( २–१–२० ) द्वे वा ब्रह्मणो रूपे मूर्तं चैवाऽमूर्तं च मर्त्यं चाऽमृतं च स्थितं च यच्च सच्च त्यच्च ( २–३–१ ) ब्रह्म तं परादाद्योऽन्यत्राऽऽत्मनो ब्रह्म वेद क्षत्रं तं परादाद्योऽन्यत्राऽऽत्मनः क्षत्रं वेद । लोकास्तं परादुर्योऽन्यत्राऽऽत्मनो लोकान्वेद देवास्तं परादुर्योऽन्यत्राऽऽत्मनो देवान्वेद भूतानि तं परादुर्योऽन्यत्राऽऽत्मनो भूतानि वेद सर्वं तं परादाद्योऽन्यत्राऽऽत्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोका इमे देवा इमानि भूतानि इदं सर्वं यदयमात्मा (६) स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयाद् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः (७) स यथा शङ्खस्य (८) स यथा वीणायै (९) स यथा आर्द्रैधाग्नेरभ्याहितात् पृथग्धूमा विनिश्चरन्ति एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राणि अनुव्याख्यानानि व्याख्यानानि अस्यैवैतानि सर्वाणि निःश्वसितानि (२–४) बृहदारण्यके वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं (३-९) इत्यादिकाः समालम्बयन्तः श्रुतीर्ब्रह्मण उपादानतामुपाददते वेदान्तिनः प्रतिपादयन्ति च–यतो नास्त्येव ब्रह्मणो परं, भवति च द्वितीयाद् भयं, सिद्धान्तितं च श्रुतिभिः 'स्याम् प्रजायेये'त्यादिना ब्रह्मण एव जगतामुपादानता । तथा च ब्रह्मविकारभूत एवायं प्रपञ्चः । तत एव च प्रलयोऽपि तस्मिन्नेव वर्ण्यते । भिन्नत्वे हि न तस्मिन् प्रलयो वर्णितो युक्तः स्यात् । नहि भवति मृन्मयस्य घटस्य पटे प्रलयः । पञ्चमीविभक्त्यन्तनिर्देशोऽपि तस्योपादानतामेवाह । नहि कर्तरि पञ्चमी प्रयोक्तुं युक्ता युक्ताऽयुक्तशब्दविभक्तिविभागकुशलानाम् । आस्तामन्यत्, गीयमानं जगतो ब्रह्मयोनित्वं तु स्पष्टमेव स्पष्टयति जगतां ब्रह्मोपादानताम् । नहि कर्तुर्निमित्तकारणभूतस्य योनित्वं प्रयुज्यमानं प्रयोक्तुर्योग्यताऽऽधायकम् । स्पष्टं निरटङ्कि च मूर्त्तस्यापि ब्रह्मरूपता 'द्वे वा ब्रह्मणो रूपे मूर्त्तं चाऽमूर्त्तं चे'त्यादिना परमर्षिभिः । चेतनस्वरूपस्य ब्रह्मणोऽचेतनस्य कथमुपादानतेति नोशं तु पुरुषप्रभवकेशादिदृष्टान्तेन स्पष्टमेव नुन्नपूर्वम्, अस्ति च सत्यमसाधारणं, येन निर्वाहो भविष्यति एतेषां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कार्यकारणभावानां दुग्धादीनां दध्यादिवत् परिणामभूतोऽयं प्रपञ्चो ब्रह्मण इति तत्त्वम् ।

अन्ये तु ब्रह्मणो निमित्ततामाम्नायमाना युक्त्या प्रथमं तावद्‌वलम्बयन्ति श्रुतिनिश्रेणिम्–अथ कबन्धी कात्यायन उपेत्य पप्रच्छ- भगवन् ! कुतो ह वा इमाः प्रजाः प्रजायन्त इति । तस्मै स होवाच प्रजाकामो वै प्रजापतिः स तपोऽतप्यत, स तपस्तप्त्वा स मिथुन-मुत्पादयते रयिं च प्राणं चेत्येतौ मे बहुधा प्रजाः करिष्यत इति, आदित्यो ह वै प्राणो रयिरेव चन्द्रमा रयिर्वा एतत् सर्वं यन्मूर्तं च तस्मान्मूर्तिरेव रयिः । अथ आदित्य उदयन् यत् प्राचीं दिशं प्रविशति. तेन प्राच्यान् प्राणान् रश्मिषु सन्निधत्ते यद्दक्षिणां यत् प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशो यत्सर्वं प्रकाशयति, तेन सर्वान् प्राणान् रश्मिषु सन्निधत्ते । स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयते तदेतद् ऋचाभ्युक्तं विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम् । सहस्ररश्मिः शतधा वर्त्तमानः प्राणः प्रजानामुदयत्येष सूर्यः । संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च । तद्ये ह वै तदिष्टापूर्त्ते कृतमित्युपासते ते चान्द्रमसमेव लोकमभिजयन्ते । त एव पुनरावर्त्तन्ते तस्मादेते ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यन्ते एष ह वै रयिर्यः पितृयाणः । अथ उत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयन्ते । एतद्वै प्राणानामायतनमेतदमृतमभयमेतत् परायणमेतस्मान्न पुनरावर्तन्ते इत्येष निरोधस्तदेष श्लोकः । पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् । अथेमे अन्य उ परे विचक्षणं सप्त चक्रे षडर आहुरर्पितम् । मासो वै प्रजापतिः तस्य कृष्णपक्ष एव रयिः शुक्लः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राणस्तस्मादेते ऋषयः शुक्ले इष्टिं कुर्वन्ति इतर इतरस्मिन् । अहोरात्रो वै प्रजापतिः तस्य अहरेव रयिः । प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ब्रह्मचर्यमेव तद्यद् रात्रौ रत्या संयुज्यन्ते । अन्नं वै प्रजापतिः ततो ह वै तद्रेतस्तस्मादिमाः प्रजाः प्रजायन्त इति । प्रश्न० १ ।

भगवन् ! कत्येव देवाः प्रजां विधारयन्ते, कतर एतत् प्रकाशयन्ते, कः पुनरेषां वरिष्ठ इति । तस्मै स होवाचाकाशो ह वा एष देवो वायुरग्निरापः पृथ्वी वाङ्मनश्चक्षुःश्रोत्रं च । ते प्रकाश्याभिवदन्ति वयमेतद् बाणमवष्टभ्य विधारयामः [ प्रश्न० ] । ॐ ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ( १–१–१ ) यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः प्राणैश्च सर्वैः (२–२–५) आत्मा वा इदमेक एवाऽग्र आसीन्नान्यत् किञ्चन मिषत् । स ईक्षत लोकान्नु सृजा इति ।१। स इमाँल्लोकानसृजत अम्भो मरीचिर्मरमापोदोम्भः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आपः ।२। स ईक्षते मे नु लोका लोकपालान्नु सृजा इति । सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् ।३। तमभ्यतपत् तस्याभितप्तस्य मुखं निरभिद्यत । यथाऽण्डं मुखाद् वाग्वाचोऽग्निर्नासिके निरभिद्येतां, नासिकाभ्यां प्राणः, प्राणाद् वायुरक्षिणी निरभिद्येतामक्षिभ्यां चक्षुश्चक्षुष आदित्यः, कर्णौ निरभिद्येतां, कर्णाभ्यां श्रोत्रं, श्रोत्राद्दिशस्त्वक् निरभिद्यत, त्वचो लोमानि, लोमभ्य औषधिवनस्पतयो, हृदयं निरभिद्यत, हृदयात् मनो मनसश्चन्द्रमा, नाभिर्निरभिद्यत, नाभ्या अपानोऽपानान्मृत्युः, शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः । इति प्रथमः खण्डः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ता एता देवताः सृष्टा अस्मिन् महत्यर्णवे प्रापतन् तमशनाया पिपासाभ्यामन्ववार्जत् ता एवमब्रुवन्मायतनं नः प्रजानीहि यस्मिन प्रतिष्ठिता अन्नमदाम इति । ताभ्यो गामानयत् ता अब्रुवन् न वै नोऽयमलमिति । ताभ्योऽश्वमानयत्ता अब्रुवन् न वै नोऽयमलमिति । ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं बतेति पुरुषो वाव सुकृतं ता अब्रवीद् यथायतनं प्रविशतेति ( १-२-३ ) स ईक्षते मे नु लोका लोकपालाश्चान्नमेभ्यः सृजा इति ।१। सोऽपोऽभ्यतपत् ताभ्योऽभितप्ताभ्यो मूर्तिरजायत, या वै सा मूर्तिरजायतान्नं वै तत् ।२। इत्यैतरेये । प्रजापतिर्लोकान् अभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयी विद्या सम्प्रास्रवत् तस्या अभितप्ताया एतान्यक्षराणि सम्प्रास्रवन्त भूर्भुवः स्वरिति ॥१॥ तान्यभ्यतपत्, तेभ्योऽभितप्तेभ्य ॐकारः सम्प्रास्रवत्, तद्यथा शङ्कुना सर्वाणि पर्णानि सन्तृण्णानि एवमोंकारेण सर्वा वाक् सन्तृण्णा ॐकार एवेदं सर्वमोंकार एवेदं सर्वमिति । ( छां० २-२३ ) आदित्यो ब्रह्मेत्यादेशः तस्योपव्याख्यानमसदेवेदमग्र आसीत् तत् सदभवत् तत् सदासीत् तत् समभवत् तदाण्डं निरवर्त्तत, तत् संवत्सरस्य मात्रामशयत तन् निरभिद्यत ते आण्डकपाले रजतं सुवर्णं चाभवताम् ( ३-१९ ) प्रजापतिर्लोकानभ्यतपत्, तेषां तप्यमानानां रसान्प्रावृहदग्निं पृथिव्या वायुमन्तरिक्षादित्यं दिवः ( ४-१७ ) सदेव सौम्य ! इदमग्र आसीदेकमेवाद्वितीयं तद्धैक आहुः-असदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत ।१। कुतस्तु खलु सौम्य ! एवं स्यादिति होवाच कथमसतः सज्जायेतेति ?। सत्त्वेव सौम्य ! इदमग्र आसीदेकमेवाद्वितीयम् ।२। तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत, तत्तेज ऐक्षत, बहु स्यां प्रजायेयेति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदपोऽसृजत, तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्ते।३। ता आप ऐक्षन्त बह्व्य स्याम प्रजायेमहीति। ता अन्नमसृजत तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवति, अद्भ्य एव तदध्यन्नाद्यं जायते।४। द्वितीयः। तेषां खल्वेषां भूतानां त्रीण्येव वीजानि भवन्ति, अण्डजं जीवजमुद्भिज्जमिति। सेयं देवता ऐक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणीति (छांदोग्ये० ६-३-२)। नैवेह किञ्चनाग्र आसीन् मृत्युनैवेदमावृतमासीत् अशनाय याऽशनाया हि मृत्युस्तन्मनोऽकुरुताऽऽत्मन्वी स्यामिति (१-२-१)। सोऽकामयत द्वितीयो म आत्मा जायेतेति। समनसाघाचं मिथुनं समभवद् अशनाया मृत्युस्तद्यद्रेत आसीत् स संवत्सरोऽभवत्, न ह पुरा ततः संवत्सर आस तमेतावन्तं कालमबिभः यावान् संवत्सरस्तमेतावतः कालस्य परस्तादसृजत तं जातमभिव्याददात् स भाणऽकरोत्सैव वागभवत् (१-२-४) स ऐक्षत यदि वा इममभिमंस्ये कनीयोऽन्नं करिष्ये इति। स तया वाचा तेनात्मनेदं सर्वमसृजत (१-२-५) आत्मैवेदमग्र आसीत् पुरुषविधः सोऽनुवीक्ष्य नाऽन्यदात्मनोऽपश्यत् सोऽहमस्मीत्यग्रे व्याहरत् ततोऽहं नामाभवत् तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र उक्त्वाऽथाऽन्यन्नाम प्रब्रूते यदस्य भवति। स यत्पूर्वोऽस्मात् सर्वस्मात् सर्वान् पाप्मन औषत् तस्मात् पुरुष औषतिह वै स तं योऽस्मात् पूर्वो बुभूषति य एवं वेद।१। सोऽबिभेत् तस्मादेकाकी बिभेति सहायमीक्षाञ्चक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति। तत एवास्य भयं वीयाय कस्माद् व्यभेष्यत् द्वितीयाद्वै भयं भवति।२। स वै नैव रेमे तस्मा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देकाकी न रमते स द्वितीयमैच्छत् स हैतावानास यथा स्त्रीपुमांसौ सम्परिष्वक्तौ स इममेवात्मानं द्विधाऽपातयत्, ततः पतिश्च पत्नी चाभवताम्, तस्मादिदमर्धबृगलमिव स्व इति ह स्माह याज्ञवल्क्यः तस्मादयमाकाशः स्त्रिया पूर्यत एव तां समभवत् ततो मनुष्या अजायन्त ।३। सा हेयमीक्षाञ्चक्रे कथं नु मात्मान एव जनयित्वा सम्भवति हन्त तिरोऽसानीति सा गौरभवद् ऋषभ इतरस्तां समभवत् ततो गावोऽजायन्त वडवेतराभवद् अश्व वृष इतरो गर्दभीतरा गर्दभ इतरस्तां समेवाभवत्। तत एकशफमजायताऽजेतराऽभवद् बस्त इतरोऽविरितरा मेष इतरस्तां समेवाभवत्, ततोऽजावयोऽजायन्तैवमेव यदिदं किञ्च मिथुनमापिपीलिकाभ्यस्तत् सर्वमसृजत ।४। सोऽवेदहं वाव सृष्टिरस्म्यहं हीदं सर्वमसृक्षीति। ततः सृष्टिरभवत् सृष्ट्यां हाऽस्यैतस्यां भवति य एवं वेद ।५। अथेत्यभ्यमन्थत् स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत, तस्मादेतदुभयमलोमकमन्ततोऽलोमका हि योनिरन्तरतः तद्यदिदमाहुः अमुं यजाऽमुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा अथ यत् किञ्च इदमार्द्रं तद्रेतसोऽसृजत तदु सोम एतावद्वा इदं सर्वमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः सैषा ब्रह्मणोऽतिसृष्टिः यच्छ्रेयसो देवानसृजत। अथ यन्मर्त्यः सन्नमृतानसृजत तस्मादतिसृष्टिः ।६। ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मीति। तस्मात् तत् सर्वमभवत्, तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत् तथा ऋषीणां तथा मनुष्याणां तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदेहं मनुरभवं सूर्यश्चेति। तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति। तस्य ह न देवा ना भूत्या ईशते ।१०। तथा ब्रह्म वा इदमग्र आसीत्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकमेव तदेकं सन्नव्यभवत् तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवत्राक्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति। तस्मात् क्षत्रात् परं नास्ति तस्माद् ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधाति सैषा क्षत्रस्य योनिर्यद् ब्रह्म तस्माद् यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिं य उ एनं हिनस्ति स्वां सयोनिमृच्छति स पापीयान् भवति यथा श्रेयांसं हिंसित्वा ।११। स नैव व्यभवत् स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुतः इति ।१२। स नैव व्यभवत् स शौद्रं वर्णमसृजत पूषणमियं वै पूषेयं हीदं सर्वं पुष्यति यदिदं किञ्च ।१३। आत्मैवेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यात् अथ प्रजायेय अथ वित्तं मे स्यादथ कर्म कुर्वीयेत्येतावान् वै कामो नेच्छँश्च नातो भूयो विन्देत् तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यात् अथ प्रजायेय अथ वित्तं मे स्यादथ कर्म कुर्वीयेति । स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्याकृत्स्नता इत्यादि (१–४–१७) आप एवेदमग्र आसुः । ता आपः सत्यमसृजन्त, सत्यं ब्रह्म, ब्रह्म प्रजापतिं, प्रजापतिर्देवाँस्ते देवाः सत्यमेवोपासते ( ५–५–१ ) बृहदारण्यके यो देवानां प्रभवश्च उद्भवश्च विश्वाधिपो रुद्रो महर्षिः हिरण्यगर्भं जनयामास। पूर्वं स नो बुद्ध्या शुभया संयुनक्तु (३–४) इत्येवं रूपां, सिद्धान्तयन्ति च–स्पष्टैव स्पष्टितागमप्रधानवादिनां वेदान्तिनयानुसारिणां महन्महिमस्थानपरमर्षिवाक्याभिः श्रुतिभिर्निमित्तता। यापि चोच्यते युक्तिश्रेणिरस्मदुपपदीयाख्यातश्रवणादिका, सापि न बाधाधायिनी नः, कथमन्यथा तेषामेषा श्रुतिश्रेणिर्निमि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तानिश्रेणिर्न भविष्यति बाधिका । तथा श्रुतिस्मृत्यनवकाशदोषस्तू-भयत्रापि तुल्यः स्याद् । यदि च सम्यग् निरूप्यतेऽपक्षपातनिरीक्षणया न निमित्तकारणतामपवदति ब्रह्मणः श्रुतिश्रेणिः ।

तथाहि–ब्रह्मणि कुर्वति जगद् 'अनेन जीवेनात्मनानुप्रविश्ये'ति श्रुत्या जीवात्मसत्ता निरदेशि । सा च न तत्पार्थक्यमन्तरा, जीवात्मता च नादृष्टाद्यन्तरेण । तथा च जीवात्मानोऽदृष्टं च न ब्रह्मविहितम् । सति चैवं कुतस्तरामुपादानता, भवति चोपादानता स्वानुरूपस्य कार्यस्य । न चानुरूपकार्यनियमः पुरुषात् प्रसूतिं केशानां दृष्ट्वापसरति, तत्रापि पुद्गलादेवोपचीयमानात्तद्भावात् । न च मृतशरीरात् कथं न, तत्रापि पुद्गलत्वसत्त्वात् । न हि तत्रोपचयोऽस्ति । न च परिणामकारणं जाठरोऽग्निः, न च कार्यशरीराज्जीवाद् दृष्टा केशाद्युद्भूतिः, मुक्तात्मभ्योऽपि तदुद्भवापत्तेः । साक्षाद् ब्रह्मणोऽपि च केशनखाद्युत्पत्तिप्रसङ्गात् । परिणामितापि च स्वानुरूपैव, न तु क्षीराद् भवति परिणामो घटपटादीनाम् । यदपि च श्रुत्या प्रतिपाद्यते–' आत्मन आकाशः सम्भूत आकाशाद् वायुर्वायोरग्निरग्नेराप इत्यादि । तत् क्वचिदुपचारेण, क्वचिदाधाराधेययोरभेदबुद्ध्या, अन्यथान्तरेणाऽऽकाशं काऽवस्थानमेव स्याद् ब्रह्मणोऽपि, कथं वाऽऽकाशाद्वायोरुत्पत्तिरुपादानिकी युक्तियुक्ता भवेत्, सर्वत्र तद्भावेन तत्सम्भवस्य सर्वत्र प्राप्तेर्वाय्वादीनाम्, विरुद्धं चेतन प्रत्यक्षेणैव । यच्च–सर्वस्य भूतादेर्ब्रह्मात्मकत्वं जेगीयते श्रुत्या, तदपि ज्ञानज्ञेययोरभेदारोपेणैव । कथमन्यथा 'तेनेद'मित्यादौ तत्तेदन्तानिर्देशः स्याद् युक्तियुक्तः । न केवलमेतदेवाभिप्रेतं किन्तु एष ब्रह्म एष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वायुराकाश आपो ज्योतींषि इत्येतानीमानि च क्षुद्रमिश्राणि बीजानीतराणि चेतराणि चाण्डजानि च जरायुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत् किञ्चेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरं सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञाप्रतिष्ठा प्रज्ञानं ब्रह्मेत्यादौ जेगीयमानं प्रज्ञानान्यत्वस्यापि औपचारिकेण विधिना सङ्गमनीयत्वाद्, अन्यथा स्पष्ट एव योगाचारमतावेशः आपद्येतेति ।

केचित्तु–आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥१॥ ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम् । महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥२॥ योऽसावतीन्द्रियग्राह्यः, सूक्ष्मोऽव्यक्तः सनातनः । सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ॥३॥ सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु बीजमवासृजत् ॥४॥ तदण्डमभवद् हैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥५॥ आपो नारा इति प्रोक्ता, आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥६॥ यत् तत्कारणमव्यक्तं नित्यं सदसदात्मकम् । तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते ॥७॥ तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम् । स्वयमेवात्मनो ध्यानात् तदण्डमकरोद् द्विधा ॥८॥ ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे । मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतम् ॥९॥ उद्बबर्हात्मनश्चैव मनः सदसदात्मकम् । मनसश्चाप्यहङ्कारमभिमन्तारमीश्वरम् ॥१०॥ महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च । विषयाणां गृहीतणि शनैः पञ्चेन्द्रियाणि च ॥११॥ तेषां त्वव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यवान सूक्ष्मान्, षण्णामप्यमितौजसाम्। संनिवेश्यात्ममात्रासु सर्वभूतानि निर्ममे ॥१२॥ यन्मूर्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयन्ति षट्। तस्माच्छरीरमित्याहु-स्तस्य मूर्तिं मनीषिणः ॥१३॥ तदा विशन्ति भूतानि महान्ति सह कर्मभिः। मनश्चावयवैः सूक्ष्मैः सर्वभूतकृदव्ययम् ॥१४॥ तेषामिदं तु सप्तानां पुरुषाणां महौजसाम्। सूक्ष्माभ्यो मूर्तिमात्राभ्यः सम्भवत्यव्ययाद् व्ययम् ॥१५॥ आद्या-द्यस्य गुणं त्वेषामवाप्नोति परः परः। यो यो यावतिथश्चैषां, स स तावद्गुणः स्मृतः ॥१६॥ सर्वेषां स तु नामानि कर्माणि च पृथक् पृथक्। वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥१७॥ कर्मात्मनां च देवानां सोऽसृजत प्राणिनां प्रभुः। साध्यानां च गणं सूक्ष्मं यज्ञं चैव सनातनम् ॥१८॥ अग्निवायुरविभ्यस्तु, त्रयं ब्रह्म सनातनम्। दुदोह यज्ञसिद्ध्यर्थमृगयजुःसामलक्षणम् ॥१९॥ कालं कालविभक्तीश्च नक्षत्राणि ग्रहाँस्तथा। सरितः सागरान् शैलान् समानि विषमाणि च ॥२०॥ तपो वाचं रतिं चैव कामं च क्रोधमेव च। सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन्निमाः प्रजाः ॥२१॥ कर्मणां च विवेकार्थं धर्माऽधर्मौ व्यवेचयत्। द्वयोरयोजयच्चेमाः सुख-दुःखादिभिः प्रजाः ॥२२॥ अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः। ताभिः सार्धमिदं सर्वं, सम्भवत्यनुपूर्वशः ॥२३॥ यं तु कर्माणि यस्मिन् स न्ययुङ्क्त प्रथमं प्रभुः। स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः ॥२४॥ हिंस्राऽहिंस्रे मृदुक्रूरे धर्माऽधर्मावृता-नृते। यद्यस्य सोऽदधात् सर्गे तत्तस्य स्वयमाविशत् ॥२५॥ यथर्तुलि-ङ्गान्यृतवः स्वयमेवर्तुपर्यये। स्वानि स्वान्यभिपद्यन्ते तथा कर्माणि देहिनः ॥२६॥ लोकानां तु विवृद्ध्यर्थं मुख-बाहूरु-पादतः। ब्राह्मणं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षत्रियं वैश्यं शूद्रं च निरवर्त्तयत् ॥२७॥ द्विधा कृत्वाऽऽत्मनो देह-मर्धेन पुरुषोऽभवत् । अर्धेन नारी तस्यां च विराजमसृजत्प्रभुः ॥२८॥ तपस्तप्त्वाऽसृजद्यं तु स स्वयं पुरुषो विराट् । तन्मां वित्ताऽस्य सर्वस्य स्रष्टारं द्विजसत्तमाः ॥२९॥ अहं प्रजाः सिसृक्षुस्तु तपस्त-प्त्वा सुदुश्चरम् । पतीन् प्रजानामसृजं महर्षीनादितो दश ॥३०॥ मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् । प्रचेतसं वशिष्ठं च भृगुं नारदमेव च ॥३१॥ एते मनूंस्तु सप्ताऽन्या-नसृजन् भूरितेजसः । देवान् देवनिकायाँश्च महर्षींश्चामितौजसः ॥३२॥ यक्षरक्षःपिशा-चाँश्च गन्धर्वाप्सरसोऽसुरान् । नागान् सर्पान् सुपर्णांश्च पितृणां च पृथग्गुणान् ॥३३॥ विद्युतो शनिमेघाँश्च रोहितेन्द्रधनूंषि च । उल्कानि-र्घातकेतूँश्च ज्योतिंष्युच्चावचानि च ॥३४॥ किन्नरान् वानरान् मत्स्यान् विविधाँश्च विहङ्गमान् । पशून् मृगान् मनुष्याँश्च व्यालाँश्चोभय-तोदतः ॥३५॥ कृमिकीटपतङ्गाँश्च यूकामक्षिकमत्कुणम् । सर्वं च दंशमशकं स्थावरं च पृथग्विधं ॥३६॥ एवमेतैरिदं सर्वं, मन्नियो-गान्महात्मभिः । यथाकर्म तपोयोगात् सृष्टं स्थावरजङ्गमम् ॥३७॥ येषां तु यादृशं कर्म, भूतानामिह कीर्तितम् । तत्तथा वोऽभिधास्यामि क्रमयोगं च जन्मनि ॥३८॥ पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः । रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः ॥३९॥ अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याश्च कच्छपाः । यानि चैवंप्रकाराणि स्थलजान्यौदकानि च ॥४०॥ स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम् । उष्मणश्चोपजा-यन्ते यच्चान्यत् किञ्चिदीदृशम् ॥४१॥ उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः । औषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ॥४२॥ अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः । पुष्पिणः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



फलिनश्चैव वृक्षास्तूभयतः स्मृताः ॥४३॥ गुच्छगुल्मं तु विविधं तथैव तृणजातयः । बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव च ॥४४॥ तमसा बहुरूपेण वेष्टिताः कर्महेतुना । अन्तःसञ्ज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥४५॥ एतदन्तास्तु गतयो ब्रह्माद्याः समुदाहृताः । घोरेऽस्मिन् भूतसंसारे नित्यं सततयायिनि ॥४६॥ एवं सर्वं स सृष्ट्वेदं मां चाचिन्त्यपराक्रमः । आत्मन्यन्तर्दधे भूयः कालं कालेन पीडयन् ॥४७॥ यदा स देवो जागर्ति तदेदं चेष्टते जगत् । यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥४८॥ तस्मिन् स्वपिति सुस्थे तु कर्मात्मानः शरीरिणः । स्वकर्मभ्यो निवर्त्तन्ते मनश्च ग्लानिमृच्छति ॥४९॥ युगपत्तु प्रलीयन्ते यदा तस्मिन् महात्मनि । तदायं सर्वभूतात्मा सुखं स्वपिति निर्वृतः ॥५०॥ तमोऽयं तु समाश्रित्य यदा तिष्ठति सेन्द्रियः । न च स्वं कुरुते कर्म तदोत्क्रामति मूर्तितः ॥५१॥ यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च । समाविशति संसृष्टस्तदा मूर्त्तिं विमुञ्चति ॥५२॥ एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम् । सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः ॥५३॥ इत्यादिना पूर्वं तमोरूपतां जगतः स्वमूलकतां च ज्ञापयन्तः किञ्चिच्छ्रुत्यनुगुणं किञ्चिच्च साङ्ख्यानां सङ्ख्यावन्मुख्यानामनुगुणं प्रतिपादयन्तो यथारुचि प्रतिपादयन्ति जगत उत्पत्तिम

पौराणिकास्तु विहायौपनिषदमध्वानं स्मार्त्तं चान्यथैव प्रतिपादयाञ्चक्रुः । यथाहुः—तस्मिन्नेकार्णवीभूते, नष्टस्थावरजङ्गमे । नष्टामरनरे चैव, प्रणष्टोरगराक्षसे ॥१॥ केवलं गह्वरीभूते महाभूतविवर्जिते । अचिन्त्यात्मा विभुस्तत्र शयानस्तप्यते तपः ॥२॥ तत्र तस्य शयानस्य, नाभौ पद्मं विनिर्गतम् । तरुणार्कमण्डलनिभं हृद्यं काञ्चनकर्णिकम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥३॥ तस्मिँश्च पद्मे भगवान् दण्डकमण्डलुयज्ञोपवीतसंयुक्तः । ब्रह्मा तत्रोत्पन्नस्तेन जगन्मातरः सृष्टाः ॥४॥ अदितिः सुरसङ्घानां, दितिरसुराणां मनुर्मनुष्याणां । विनता विहङ्गमानां माता विश्वप्रकाराणाम् ॥५॥ कद्रूः सरीसृपाणां सुलसा माता तु नागजातीनां, सुरभिश्चतुष्पदानामिला पुनः सर्वजातीनाम् ॥६॥ प्रभवस्तासां विस्तरमुपागतः केचिदेवमिच्छन्ति । इत्यादि । तथैव भागवताः शाक्ता इत्यादयोऽनेके स्वस्वपरमेश्वर–परमैश्वर्यंचिख्यापयिषवः कल्पयित्वा यथारुचि निगदन्ति स्वस्वाभिमतेश्वरादिकां सृष्टिम् ।

भारतानुसारिणोऽपि स्वाभ्युगतपरमेश्वर–पारमैश्वर्याख्याने न कथञ्चनापि पश्चात् पतन्ति । यदूचुस्तेऽपि श्रीकृष्णमुखेन–मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम् । सम्भवः सर्वभूतानां ततो भवति भारत ! ॥१॥ सर्वे योनिषु कौन्तेय ! मूर्त्तयः सम्भवन्ति याः । तासां ब्रह्म महद्योनि–रहं बीजप्रदः पिता ॥२॥ तथा–ब्रह्मणो हि प्रतिष्ठाह–ममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ' ॥१॥ तथा ' न तद् भासयते सूर्यो न शशाङ्को न पावकः । यद्गत्वा न निवर्त्तन्ते, तद्धाम परमं मम ॥१॥ ममैवांशो जीवलोके जीवभूतः सनातनः । मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥२॥ पुनः–' यदादित्यगतं तेजो, जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१॥ गामाविश्य च भूतानि धारयाम्यहमोजसा ' पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥२॥ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥३॥ सर्वस्य चाहं हृदि सन्निविष्टो, मत्तः स्मृतिर्ज्ञानमपोहनं च । वेदैश्च सर्वैरहमेव वेद्यो, वेदान्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृद्वेदविदेव चाहम् ॥४॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥५॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥६॥ यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च, प्रथितः पुरुषोत्तमः ॥७॥ अग्रतश्च–तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभा–नासुरीष्वेव योनिषु ॥८॥ उपसंहारेऽपि–" सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः । मत्प्रसादादवाप्नोति शाश्वतपदमव्यय " [गीता] मित्यादिना कृष्णमूलतामेवोररीचक्रुर्जगन्निर्माणस्य । एवं सत्यपि परस्परमहमहमिकाधृतात्मतायामपि पूपूजयिषायां जगद्रञ्जनप्रवीणैः समाहितं वैद्यगान्धिकन्यायेन ब्रह्मणो जगत उत्पत्तिं, विष्णोः पालनं, महेश्वरस्य च शिवपुराणादिमताखिलविश्वविधानविधुरस्यापि जगतः संहारकत्वमभिमत्योदरनिर्वाहमात्रभक्तजनमनोरञ्जननिष्णातैः ।

यवनैरपि स्वस्वाभ्युपगतेश्वरमहत्त्वाख्यानाय स्वस्वेश्वरविहितत्वेन सृष्टेः कर्तृताऽभ्युपगम्यते । तत्र यस्तावत् क्रीश्चनाख्यो मरीयमकुक्षिजातोऽपितृको य इसुनामधेयः परमेश्वर–प्रतिनिधिः, तमनुवर्तमानो वरीवर्तते पन्थाः, तदनुसारिभिश्चाख्यायते एवं–देवेनादौ उत्पादितमाकाशं क्षितिश्चोत्पादिता, सा च तदा रिक्ताऽस्तव्यस्तीभूतोपरि च जलनिधेरभूदन्धतमसं स्पन्दितश्चात्मा परमात्मन उदकसमूहस्योपरि क्वचिवांश्चासौ–भवत्विहोद्योतः, जातः स निरीक्षितो देवेन रुचितश्चासौ तस्मै, पृथक्कृतमन्धकारोद्योतद्वयम्, उद्योतस्य कृताभिख्या दिवस इति, संतमसस्य तु क्षपेति प्रदोषो व्यूष्टं चाभूतामिति प्रथममहः । उदितमिसृपित्रा – भवतु यदुदकमध्येऽन्तरीक्षं सञ्जायतां विभिन्नं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्रोत्पादितमाकाशं कृतं चोपरितनाज्जलादधस्त्यं पृथक् तस्यान्तरीक्षस्याभिधा चक्रे तेनाकाशमिति । अभूतां च प्रदोष व्यूष्टे इति द्वितीयं दिनम् । व्याकृतमीशेन—भवन्तु उदकान्यधस्त्यान्येकत्रैकधा दृष्टिपथमायातु चाक्लिन्ना भूर्बभूव च चिन्तितं विहिताभिधा रूक्षायाः क्षितेर्भूमिरिति । समुद्र इति चैकत्रीभावापन्नाम्भःसमुदायस्य । व्यलोकि चानेन प्रतिभातं चारुतया बभाण च परमेश्वरस्तृणानि बीजप्रभवानि व्यञ्जनानि फलिनो वृक्षाँश्च यथास्वं सत्फलिनः उत्पादयत्विलातलं यतः सन्ति तेषां बीजानि गोत्रायां तस्यां आविर्भूतान्युक्तानुसारेण सर्वाणि लब्धजन्मानो निरीक्षिता वृक्षा व्यलोकिषत चावाप्तजनूंषि तृणानि व्यञ्जनानि च तेन रुचितं च सर्वमेतस्य बभूवतुः प्रदोषो विभातं चेति तृतीयो घस्रः । अभाणि च देवेन—अहोरात्रयोः पार्थक्याय विस्तरन्तु नभसोऽन्तरीक्षे विविधानि विद्योतकानि ज्योतींषि जायन्तां च तानि केतुभ्य ऋतुभ्यो दिवसेभ्योऽब्देभ्यश्च प्रभवन्तु च महीतल उद्योतकारकतया । सम्पन्नं यथाचिन्तितं देवस्य व्यरचि चादिदेवेनाज्ञापकं दिवसस्य महज्ज्योतिः क्षपायाश्चापरं लघुज्योतिरूपकल्पिताश्च विगतमानास्तारकाः प्रतिष्ठापिताश्च स्थैर्येणाहोरात्रस्याज्ञापकं ज्योतिष्मद्युगलं मेघपथान्तरीक्षे दृष्टं च दूरदर्शिशिरःशेखरेण तत् अभिमतं अवरीवृतेतां प्रदोषः कल्यश्चेति चतुर्थो दिवसः । अभाणि च देवेन—यथा जनयन्तु जलानि नैकजातीञ्जन्तून् पुष्कलान उत्पतन्तु च क्षैतीयेऽन्तरीक्षे पतत्त्रिण इति । तथा च तत्क्षणमेवोत्पादिताऽम्भोभिर्मत्स्या उरःपरिसर्पाश्च विविधा जन्मिनो यथा स्वजातीयाः पतत्त्रिणो विविधजातियाँश्च चकार विभुः स्वयमेव विभावितं च प्रभुणा रुचिरमिति प्रतिभातं दत्ता चाशीः सर्वशक्तिमता तेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सफलयन्तु स्व–जनिं वर्धयन्तु दकपूरं पूरयन्तु चाब्धिपाथांसि प्रचुरीभवन्तु च भूवलये विहङ्गमा इति आस्तां सन्ध्या विभातं चेति पञ्चमहः। प्रत्यपादि सम्पन्नशक्तिना तेन यथाविर्भावयतु मही यथा स्वजातीयं ग्राम्यपशून् उरःपरिसर्पान् वन्यपशूंश्च वरिवृत्तं च तथा जनिताश्चास्खलितसामर्थ्येनानतिक्रम्य जातीयार्हतां वन्यपशवो ग्राम्यपशव उरःपरिसर्पा निभालितमीशेन अभिमतं च सुन्दरतयाचीकश्च यथा वयं यथाऽस्मत्स्वरूपं यथाऽस्मदाकृति च जनयामो नरान् ये सामुद्रीयानां मत्स्यानां विहायोगमानां विहङ्गमानां ग्राम्यपशूनां समग्राया इलाया उरःपरिसर्पाणां कुर्युराधिपत्यादीनि तथा चाचिन्त्यमहिमनिलयेनानुल्लङ्घ्य स्वस्वरूपमाविर्भाविता मनुष्या यथा स्वस्वरूपमेवाविश्चकार स मनुष्यान् द्विप्रकारान् पुरुषेतरान् दत्ता चाशीरेभ्यः सफलयन्तु स्वजनुर्वर्धयन्तु प्रकामं बिभ्रतु पृथ्वीं समन्तात् स्थापयन्त्वायत्ते, मत्स्यानां सामुद्रीयाणां विहगानामाकाशीयानां महीगानां चाखिलानां तिरश्चां विदधत्वाधिपत्यं, शिक्षिताश्च ते तेन समस्तासुभृन्मान्यशासनेन मनुजा 'यथा प्रादायिषत मया युष्मभ्यमिमान्यवलोकयन्त्वेतानि यानि बीजार्पकाणि व्यञ्जनानि वृक्षबीजयुतवृक्षवृन्दानि भविष्यन्ति चैतानि युष्माकमशनायायामुपयोगीनि भूवलयवर्त्तिनः पशवो नभोगाश्च पतत्त्रिण आदातारश्च श्वासानां ये केचनान्येऽपि प्राणिनस्तेषामप्यशनायायामुपयोज्या निर्मापिता मया विविधा वनस्पतयो' जातं च तदीयशासनानुसारि निखिलं व्यलोकि लोकलोकेन लष्टमनीषितेनाऽनुपममबभातं समग्रं प्रदोषो व्युष्टं चाभवतामिति षष्ठो घस्रः। एवं च क्षितिरन्तरीक्षं च चकार चातुर्यरञ्जितचतुरतरनायकचित्तश्चराचरविभुः सर्वां च तदुपयोगिनीं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सामग्रीं, समापितं च सप्तमेऽह्नि, अस्थाच्च तत्र स्वस्थो दत्तं चाशीर्वचनं तस्मै प्रतिष्ठापितश्च पूततया यतो निष्ठितं तस्मिन्नखिलं क्षितिवलयजननादि, जातश्च कृतकृत्यः सोऽस्मिन्नहनि, तथा च सप्तमोऽयं रविवासराख्यमह इति व्यावर्ण्य स्वकपोलकल्पनया हास्यास्पदमेवेहितमाविष्कृतं च पुरतो वाटिकाज्ञानफलभक्षणशापवितरणादिवृत्तान्तेनेत्यलमतिप्रसङ्गेन ।

मुसह्लमीनाख्याध्वानुयायिभिरप्याख्यायते स्वाभिमत-खुदाभिधानपरमैश्वर्यराजित-परमेश्वरप्रवर्तितया जगदिदम् । यश्च विधत्त अस्मै नत्यादि, कुरुते चाङ्गीक्रियामन्त्यदिवसविधेयाया न्यायसत्तायाः पारमैश्वर्याः, प्राप्नोत्यसावरमप्रत्यूहं निवारिताखिलानिष्टदुःखाभिधानमपि स्वःपदं, परमेश्वरपरमकृपास्पदतया तदीयाज्ञैव ततः शिरःशेखरकल्पा धार्या सततमेवमनेकधा धाविता अधीतान्तरात्मानो लोकसञ्ज्ञानुसारिणो मिथ्यात्वलुप्तस्वपरविवेकक्षमयथार्थदर्शनलोचनाः ।

तदेवं विविधकर्तृवादसत्त्वाद्याऽऽदिशब्द उपात्तोऽत्र सूरिभिः । ' न परमपुरुषादिकृत ' इत्यत्र परमपुरुषो हि ब्रह्माऽभिधीयतेऽन्यैस्तदाद्याश्चाखिला अन्ये आदिशब्दतो मता अन्यमतानुगैः स्वस्वेश्वरास्तेऽपि ग्राह्या इत्यादिशब्दः । यद्वा-यथा पञ्चास्तिकायात्मकत्वेन लोकस्यानादित्वं, ततश्च न परमेश्वरविहितत्वं लोकस्य, तथैव प्रकृत्युद्भवत्वमपीत्यादिशब्दनिवेश आदृतः आचार्यैः । प्रकृतिजातत्वमपि जगत उदाहरन्त्येव केचन । ननूदाहरन्ति परं नात्मनां प्रकृतिजातत्वमभिमन्वते ते इति चेत् । सत्यम्, परमात्मगुणतयानुभवसिद्धाया बुद्धेस्तज्जत्वेन प्रतिज्ञानात कथञ्चित्तत्वात । यद्वा-कर्तृत्वादि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मनोऽभिमतं तैः प्रकृतिसम्बन्धात्, स्वरूपतस्तु अकर्ता निर्गुणो भोक्ता। तथा–'अन्यस्त्वकर्ता विगुणस्तु भोक्ते' त्यादिवचनात् कृत्यादिशून्य एव स। तथा च कर्तृत्वादिरूपेणात्मनोऽपि प्रकृतिविहितत्वमेवेति न विमर्दोऽत्र कश्चित्। आत्मत्वेनाऽजन्यत्वेऽपि कर्तृत्वादिरूपेण जन्यत्वे सुतरां वैशिष्ट्यरूपेण जन्यत्वाङ्गीकारात्। के चैवंवादिनः? इति चेत्, साङ्ख्याः। ते च 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोऽन्यः'॥ इति श्वेताश्वतरीयं, तथा 'यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठित' इति बृहदारण्यकीयं, तथैव "सोहमस्मीत्यग्रे व्याहरत्ततोऽहं नामाऽभव'दित्यादि बृहदारण्यकीयमेवेत्याद्यालम्ब्य श्रुतिवचःकदम्बकं युक्तिं च चेतनादचेतनोत्पत्तिर्न भवति कारणानुरूपत्वात् कार्यस्येत्यादिकाम् आचक्षतेऽन्यथाविदाम्।

तथा हि–'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहङ्कारोऽहङ्कारात् पञ्च तन्मात्राण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणः' (सांख्य० १–६१) स्थूलात् पञ्च तन्मात्रस्य (६२) बाह्याभ्यन्तराभ्यां तैश्चाहङ्कारस्य (६३) तेनान्तःकरणस्य (६४) ततः प्रकृतेः (६५) तथा महदाख्यमाद्यं कार्यं तन्मनः (७१) चरमोऽहङ्कारः (७२) तत्कार्यत्वमुत्तरेषाम् (७३) तथैव ईश्वरासिद्धेः (९२) मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः (९३) उभयथाप्यसत्करत्वम् (९४) एवमेव चोदितम्–अकार्यत्वेऽपि तद्योगः पारवश्यात् (३–५५) स हि सर्ववित् सर्वकर्ता (५६) ईदृशेश्वरसिद्धिस्सिद्धा (५७) प्रधानसृष्टिः परार्थं स्वतोऽप्यभोक्तृत्वादुष्ट्रकुङ्कुम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वहनवत् (५८) 'अचेतनत्वेऽपि क्षीरवच्चेष्टितं प्रधानस्य' इत्यादिना परोक्तस्वरूपेश्वरनिराकृतिः । श्रुतिप्रतिपादितेश्वरत्वव्याख्यानं तु मुक्तात्मनः प्रशंसोपासासिद्धस्य वेत्याद्याचख्युः । एवमेव च 'नेश्वराधिष्ठिते फलनिष्पत्तिः कर्मणा तत्सिद्धेः (५-२) स्वोपकाराधिष्ठानं लोकवत् (३) लौकिकेश्वरवदितरथा (४) पारिभाषिको वा (५) न रागादृते तत्सिद्धिः प्रतिनियतकारणत्वात् (६) तद्योगेऽपि न नित्यमुक्तः (७) प्रधानशक्तियोगाच्चेत् सङ्गापत्तिः (८) सत्तामात्राच्चेत् सर्वैश्वर्यम् (९) प्रमाणाभावान्न तत्सिद्धिः (१०) सम्बन्धाऽभावान्नानुमानम् (११) श्रुतिरपि प्रधानकार्यत्वस्य (१२) नाविद्याशक्तियोगो निस्सङ्गस्य (१३) तद्योगे सिद्धावन्योन्याश्रयत्वम् (१४) न बीजाङ्कुरवत् सादिसंसारश्रुतेः' (१५) इत्यादि विवेचितमुत्तरत्र ।

ननु च श्रुत्यादिवर्णितानां सर्वज्ञत्वादिविशेषणानां का गतिः तन्मते ? इति चेत्, स्वाभिप्रायानुसारिण्येव । यतस्तैः प्रधानमेव तत्तत्कर्तृस्थलीयशब्दवाच्यमभिधीयते, प्रमाणयन्ति च 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि नैकशः । अहङ्कारविमूढात्मा कर्ताहमिति मन्यते' ॥१॥ इत्यादिस्मृतिभिः । सर्ववित्त्वादिकं सत्त्वप्राधान्यात् स्वीक्रियते तैः, बुद्धिजन्माप्येवमेवाभिमतं तैः । यद्यपि योगाचार्यप्रभृतिभिः साङ्ख्यविशेषैरभिमत ईश्वरः, 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर' इति (१-२३) समाधिपादीयवचनात् । तथापि न तैरपि कर्तृतया अभिरुचितोऽसौ । पुरुषविशेषवचनस्वरसपर्यालोचनं तु गूढतममेव । ईश्वरप्रणिधानमित्यत्रापि च सर्वज्ञत्वान्वितमात्रमेवाभिप्रेतं तैरिति त्वन्यदेव । यत उदाहृतं तत्र निरतिशयं सर्वज्ञबीजमिति 'स पूर्वेषामपि गुरुः कालेनानवच्छेदा' दित्यादि तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वज्ञसम्भवस्यानादितामभिप्रेत्यैव शिष्यगुरुत्वव्यवहारोदित्येतलम-प्रस्तुतेन ।

एवं चेश्वरमनङ्गीकुर्वन्तोऽपि केचित् कालादिवादिन आहुरस्य सचराचरस्य लोकस्य तत्तत्कर्तृत्वम् । यथाहि–कालवादिन आहुः—

न कालव्यतिरेकेण गर्भबालशुभादिकम् । यत् किञ्चित् कारणं लोके तदसौ कारणं किल ॥१॥ कालः पचति भूतानि कालः संहरति प्रजाः । कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥२॥ किञ्च कालादृते नैव मुद्गपक्तिरपीष्यते । स्थाल्यादिसन्निधानेऽपि ततः कालादसौ मता ॥३॥ कालाभावे च गर्भादि सर्वं स्यादव्यवस्थया । परेष्टहेतुसद्भावमात्रादेव तदुद्भवात् ॥४॥ तथा स्वभाववादिन आहुः—

न स्वभावातिरेकेण गर्भबालशुभादिकम् । यत् किञ्चिज्जायते लोके तदसौ कारणं किल ॥१॥ सर्वभावाः स्वभावेन स्वस्वभावे तथा तथा । वर्तन्तेऽथ निवर्तन्ते कामचारपराङ्मुखाः ॥२॥ न विनेह स्वभावेन मुद्गपक्तिरपीष्यते । तथा कालादिभावेऽपि नाश्वमासस्य सा यतः ॥३॥ अतत्स्वभावात् तद्भावेऽतिप्रसङ्गोऽनिवारितः । तुल्ये तत्र मृदः कुम्भो न पटादित्ययुक्तिमत् ॥४॥ एनमेवाश्रित्य पक्षं पूर्वपक्षितं गौतमीये न्यायसूत्रे–' अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शना 'दिति । श्वेताश्वतरोपनिषदि च कालस्वभाववादद्वन्द्वमाश्रित्योदितं निषेध्यतया, यदाह–'स्वभावमेके कवयो वदन्ति, कालं तथाऽन्ये परिमुह्यमाना ' इति । प्रमाणयन्ति च स्वभाववादिनोऽन्यत्रापि—

कः कण्टकानां प्रकरोति तैक्ष्ण्यं, विचित्रभावं मृगपक्षिणां च । स्वभावतः सर्वमिदं प्रवृत्तं, न कामचारोऽस्ति कुतः प्रयत्नः ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बदर्याः कण्टकस्तीक्ष्ण ऋजुरेकश्च कुञ्चितः । फलं च वर्तुलं तस्या वद केन विनिर्मितम् ? ॥२॥ उच्यते च–न कर्तृत्वं न कर्माणि लोकस्य सृजते प्रभुः । स्वकर्मफलसंयोगं स्वभावाद्धि प्रवर्तते ॥३॥ इति

नियतिवादिनोऽप्याहु :—नियतेनैव रूपेण सर्वभावा भवन्ति यत् । ततो नियतिजा ह्येते तत्स्वरूपानुवेधतः ॥१॥ यद्यदैव यतो यावत्तत्तदैव ततस्तथा । नियतं जायते न्यायात् क एतां बाधितुं क्षमः ॥२॥ न चर्ते नियतिं लोके मुद्गपक्तिरपीक्ष्यते । तत्स्वभावादि-भावेऽपि नासावनियता यतः ॥३॥ अन्यथाऽनियतत्वेन सर्वभावः प्रसज्यते । अन्योऽन्यात्मकतापत्तेः क्रियावैफल्यमेव च ॥४॥ उदा-हरन्ति च–प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा । भूतानां महति कृतेऽपि हि प्रयत्ने, नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥५॥

पूर्वकृतवादिनस्त्वाहुः—' न भोक्तृव्यतिरेकेण भोग्यं जगति विद्यते । न चाकृतस्य भोक्ता स्यान् मुक्तानां भोगभावतः ॥१॥ भोग्यं च विश्वं सत्त्वानां विधिना तेन तेन यत् । दृश्यतेऽध्यक्षमेवेदं तस्मा-त्तत्कर्मजं हि तत् ॥२॥ न च तत्कर्मवैधुर्ये मुद्गपक्तिरपीक्ष्यते । स्थाल्यादिभङ्गभावेन यत् कचिन्नोपपद्यते ॥३॥ चित्रं भोग्यं तथा चित्रात् कर्मणोऽहेतुताऽन्यथा । यस्य कर्मविचित्रत्वं नियत्यादेर्न युज्यते ॥४॥ नियतेर्नियतात्मत्वाद् नियतानां समानता । तथाऽ-नियतभावे च बलात् स्यात्तद्विचित्रता ॥५॥ न च तन्मात्रभावादेर्यु-ज्यतेऽस्या विचित्रता । तदन्यं भेदकं मुक्त्वा सम्यग् न्यायाविरोधतः ॥६॥ न च जलस्यैकरूपस्य वियत्पाताद् विचित्रता । ऊषरादिधरा-भेद–मन्तरेणोपजायते ॥७॥ तद्भिन्नभेदकत्वे च तत्र तस्या न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्तृता । तत्कर्तृत्वे न चित्रत्वं तद्वत्तस्याप्यसङ्गतम् ॥८॥ तस्या एव तथाभूतः स्वभावो यदि चेष्यते । त्यक्तो नियतिवादः स्यात् स्वभावाश्रयणान्ननु ॥९॥ स्वो भावश्च स्वभावोऽपि स्वसत्तैव हि भावतः । तस्यापि भेदकाभावे वैचित्र्यं नोपपद्यते ॥१०॥ ततस्तस्याऽविशिष्टत्वाद्युगपद्विश्वसम्भवः । न चासावपि सद्युक्त्या तद्वादोऽपि न सङ्गतः ॥११॥ तत्तत्कालादिसापेक्षो विश्वहेतुः स चेन्ननु । त्यक्तः स्वभाववादः स्यात् कालवादपरिग्रहात् ॥१२॥ कालोऽपि समयादिर्यत् केवलः सोऽपि कारणम् । तत एव ह्यसम्भूतेः कस्यचिन्नोपपद्यते ॥१३॥ यतश्च काले तुल्येऽपि सर्वत्रैव न तत्फलम् । अतो हेत्वन्तरापेक्षं विज्ञेयं तद्विचक्षणैः ॥१४॥ प्रतिपादयन्ति च स्वपक्षमेवमेते आबालगोपालाङ्गनानुभवानुरोधेन —

सुतुष्टानि च मित्राणि सुक्रुद्धाश्चैव शत्रवः । न हि मे तत्करिष्यन्ति यन्न पूर्वं कृतं मया ॥१॥ शुभाऽशुभानि कर्माणि स्वयं कुर्वन्ति देहिनः । स्वयमेवोपकुर्वन्ति दुःखानि च सुखानि च ॥२॥ वने रणे शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा । सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ॥३॥ स्वच्छन्दतो नहि धनं न गुणो न विद्या, नाप्येत्र धर्मचरणं न सुखं न दुःखम् । आरुह्य सारथिवशेन कृतान्तयानं, दैवं यतो नयति तेन पथा व्रजामः ॥४॥ यथा यथा पूर्वकृतस्य कर्मणः फलं निधानस्थमिवोपढौकते । तथा तथा तत्प्रतिपादनोद्यता प्रदीपहस्तैव मतिः प्रवर्त्तते ॥५॥ व्यपदिश्यमानं चान्यत्र विध्यादिशब्दैः तत्र तत्र शास्त्रेषु, तदप्येतदेवेत्याख्यायन्ते, आहुः—' विधिर्विधानं नियतिः स्वभावः, कालो ग्रहा ईश्वरकर्म दैवम् । भाग्यानि कर्माणि यमः कृतान्तः, पर्यायनामानि पुराकृतस्य ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यादिवदन्तः कालादिवादिनोऽप्यत्रोपलक्षिता निषेध्यत्वेन, द्रव्यत्वेन पञ्चास्तिकायात्मकस्य लोकस्यानादिमत्त्वेन विधानाभावादेव । पर्यायविधानेन कृतार्थतामनोरथोऽपि न कृतार्थतासाधनं, केवलेन तेन तृणकुब्जीकरणविधानेऽपि कालादिना तूष्णींभावसमालम्बनात् । एष तावदागमवादं पुरस्कृत्य कर्त्तृवादः ।

अनुमानेनापि च तैः साध्यत एव कर्त्तृवादो यथारुचि, यदाश्रित्योच्यतेऽनुमाय-पृथिव्यादिसंस्थानं बुद्धिमत्कर्तृकं कार्यत्वादिति पुरतो यत्तूक्तं पृथिव्यादिगतस्य कार्यत्वस्याप्रतिपत्तेः न तस्मादीश्वरावगमः पृथिव्यादीनां बौद्धैः कार्यत्वमभ्युपगतं ते कथमेवं वदेयुः । येऽपि चार्वाकाद्याः पृथिव्यादीनां कार्यत्वं नेच्छन्ति, तेषामपि विशिष्टसंस्थानयुक्तानां कथमकार्यता, सर्वं संस्थानवत् कार्यं तच्च पुरुषपूर्वकं दृष्टम् । येऽप्याहुः—संस्थानशब्दवाच्यत्वं केवलं घटादिभिः समानं पृथिव्यादीनां तु न तत्त्वतोऽर्थः कश्चिद् द्वयोरनुगतः समानो विद्यते तेषामपि केवलमत्रानुगतार्थाभावः किन्तु धूमादावपि पूर्वापरव्यक्तिगतो नैव कश्चिदनुगतोऽर्थः समानोऽस्ति । अथ तत्र वस्तुदर्शनायात (न्वयात कल्पनानिमित्तमुक्तम् । अत्र तथाभूतस्य प्रतिभासस्याभावान्नानुगतार्थकल्पना । तथाहि—कस्यचित् घटादेः क्रियमाणस्य विशिष्टां रचनां कर्त्तृपूर्विकां दृष्ट्वा अदृष्टकर्त्तृकस्यापि घटप्रासादादेस्तस्य रचनाविशेषस्य कर्त्तृपूर्वकत्वप्रतिपत्तिः । पृथिव्यादेः संस्थानं तु कदाचिदपि कर्त्तृपूर्वकं नावगतं, नापि तादृशं धर्म्यन्तरे दृष्टकर्त्तृक इव पटादौ तत्पृथिव्यादिगतस्य संस्थानस्य वैलक्षण्यात्, ततो न ततः कर्त्तृपूर्वकत्वप्रतिपत्तिः । एवं हेतोरसिद्धत्वेन नैतत्साधनम् । अयुक्तमेतद्यतो यद्यनवगतसम्बन्धान् प्रतिपत्तृनधिकृत्य हेतोरसिद्धत्वमुच्यते, तदा धूमादितुल्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ गृहीताविनाभावानामपि कार्यत्वदर्शनात्तन्त्वादिप्रतिभासानुत्पत्तेरेवमुच्यते, तदसत् । ये हि कार्यत्वादेर्बुद्धिमत्कारणपूर्वकत्वेन गृहीताविनाभावाः ते तस्मादीश्वरादिपूर्वकत्वं तेषामवगच्छन्त्येव । तस्माद् व्युत्पन्नानामस्त्येव पृथिव्यादि(द्वौ) संस्थानवत्त्वकार्यत्वादेर्हेतोर्धर्मिधर्मतावगमः । अव्युत्पन्नानां तु प्रसिद्धानुमाने धूमादावपि नास्ति । अपि च भवतु प्रासादादिसंस्थानेभ्यः पृथिव्यादिसंस्थानस्य वैलक्षण्यं तथापि कार्यत्वं शाक्यादिभिः पृथिव्यादीनामिष्यते । कार्यं च कर्तृकरणादिपूर्वकं दृष्टम् , अतः कार्यत्वादिसंस्थानबुद्धिमत्कारणपूर्वकत्वानुमानम् । अथ कर्तृपूर्वकस्य कार्यत्वस्य संस्थानवत्त्वस्य च तद्विलक्षणत्वान्न ततः साध्यावगमः । अत एवाधिष्ठातृभावानुवृत्तिमद् यत् संस्थानं तद्दर्शनात् कर्त्रदर्शिनोऽपि तत्प्रतिपत्तिर्युक्तेत्यस्य दूषणस्य कार्यत्वेऽपि समानत्वात् कथं गमकता ? यद्येवमनुमानोच्छेदप्रसङ्गः । धूमादिकमपि यथाऽग्न्यादिसामग्रीभावानुवृत्तिमत् तथाविधमेव यदि पर्वतोपरि भवेत् , स्यात्ततो वह्न्याद्यवगमः । अथाधूमव्यावृत्तं तथाविधमेव धूमादि तर्हि कार्यत्वाद्यपि तथाविधमेव पृथिव्यादिगतं किं नेष्यते ? । अथ पृथिव्यादिगतकार्यत्वादिदर्शिनां तदप्रतिपत्तिः , एवं शिखर्यादिगतवह्न्याद्यदर्शिनां धूमादिभ्योऽपि तदप्रतिपत्तिरस्तु । न चात्र शब्दसामान्यं वस्त्वनुगमो नास्ति इति वक्तुं युक्तम् , धूमादावपि शब्दसामान्यस्य वक्तुं शक्यत्वात् । तन्न शाक्यदृष्ट्या कार्यत्वादेरसिद्धता । नापि चार्वाकमीमांसकदृष्ट्या तेषामपि संस्थानवदवश्यं कार्यं घटादिवत् पृथिव्यादिस्वावयवसंयोगैरारब्धमवश्यंतया विश्लिष्यति । येषामप्यनवगतोत्पत्तीनां भावानां रूपमुपलभ्यते तेषां तन्तुव्यतिषङ्गजनितं रूपं दृष्ट्वा तद्व्यतिषङ्गविमोचनाद्विनाशाद् वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विनश्यतीत्यनुमीयते । अनेन संस्थानवतोऽनुपलभ्यमानोत्पत्तेः समवाय्यसमवायिकारणविनाशाद् विनाशमाह । तथा पृथिव्यादेः संस्थानवतोऽदृष्टजन्मनो रूपदर्शनात् नाशसम्भावना भविष्यति । सम्भाविताच्च नाशात् कार्यत्वानुमितौ कर्तृप्रतिपत्तिः । यथोक्तं न्यायविद्भिः—तत्त्वदर्शनं प्रत्यक्षतोऽनुमानतो वा कार्यत्व—विनाशित्वयोश्च समव्याप्तिकत्वादेकेनापरमनुमानमिष्टं तेन यत्राप्युभौ धर्मावित्यत्र । अतो जैमिनीयानां न कार्यत्वादेरसिद्धता । नापि चार्वाकमते सिद्धत्वे तेषां रचनावत्त्वेनावश्यंभाविनी कार्यताप्रतिपत्तिरदृष्टोत्पत्तीनामपि क्षित्यादीनाम् । अन्यथा वेदरचनाया अपि कर्तृदर्शनाभावात् न कार्यता । यतः तत्राप्येतावच्छक्यं वक्तुं—न रचनात्वेन वेदरचनायाः कार्यत्वानुमानकर्तृभावाऽभावानुविधायिनी, तद्दर्शनाद् लौकिक्येव रचना तत्पूर्विकाऽस्तु, माऽभूद् वैदिकी । अथ तयोर्विशेषानुपलम्भाद् लौकिकीव वैदिक्यपि कर्तृपूर्विका, तर्हि प्रासादादिसंस्थानवत् पृथिव्यादिसंस्थानवत्त्वस्यापि तद्रूपताऽस्तु, विशेषानुपलक्षणात् । तन्न हेतोरसिद्धता । मा भूदसिद्धत्वम् , तथाप्यस्मात् साध्यसिद्धिर्न युक्ता । नहि केवलात् पक्षधर्माद् व्याप्तिशून्यात् साध्यावगमः । ननु किं घटादौ कर्तृकर्मकरणपूर्वकत्वेन कार्यत्वादेर्व्याप्त्यनवगमोऽस्त्येव घटगते कार्यत्वेऽपि विप्रतिपत्तिः तथापि न व्याप्तिः । सा हि सकलाक्षेपेण गृह्यते, अत्र तु व्याप्तिग्रहणकाल एव केषाञ्चिन् कार्याणामकर्तृपूर्वकाणां दर्शनान्न सर्वं कार्यं कर्तृपूर्वकम् , यथा वनेषु वनस्पतीनाम् । अथ तत्र न कर्त्रभावनिश्चयः किन्तु कर्त्रग्रहणम् , तच्च विद्यमानेऽपि कर्तरि भवतीति कथं साध्याभावे हेतोर्दर्शनं, क्व पुनर्विद्यमानकर्तृण तदप्रतिपत्तिः, यथा च घटादीनामनवगतोत्पत्तीनां युक्ता तत्र कर्तुर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपत्तिः, उत्पादकालानवगमात्। तत्काले च तत्र तस्य सन्निधानम्, अन्यदाऽस्य सन्निधानाभावादग्रहणम्, वनगतेषु च स्थावरेषु उपलभ्यमानजन्मसु कर्तृसद्भावे तदवगमोऽवश्यंभावी, यथोपलभ्यमानजन्मनि घटादौ। अत उपलब्धिलक्षणप्राप्तस्य कर्तुः तेष्वभावनिश्चयात् तत्र व्याप्तिग्रहणकाल एव कार्यत्वादेर्हेतोर्दर्शनान्न कर्तृपूर्वकत्वेन व्याप्तिः। इतश्च दृष्टहान्यदृष्टपरिकल्पनासम्भवात्। दृष्टानां क्षित्यादीनां कारणत्वत्यागोऽदृष्टस्य च कर्तुः कारणत्वकल्पना न युक्तिमती। अथ न क्षित्यादेः कारणत्वनिराकरणं कर्तृकल्पनायामपि, तद्भावेऽपि तस्यापरकारणत्वकृतेः। तदसत्, यद्यस्यान्वयव्यतिरेकानुविधायि तत्तस्य कारणमितरत् कार्यम्। क्षित्यादीनां त्वन्वयव्यतिरेकावनुविधत्ते तत्राकृष्टजातवनस्पत्यादि नापरस्य, कथम् अतो व्यतिरिक्त कारणं भवेद्। एवमपि कारणत्वकल्पनायां दोष उक्तः चैत्रस्य व्रणरोहणे इत्यादिना। तस्मात् पक्षधर्मत्वेऽपि व्याप्त्यभावादगमकत्वं हेतोः। अथ तेषां पक्षेऽन्तर्भावान्न व्यभिचारः। तदसत्, वास्तिवकं विपक्षत्वं कथमिच्छाकल्पितेन पक्षत्वेनापोद्यते। व्याप्तौ सिद्धायां साध्यतदभावयोरग्रहणे वादीच्छापरिकल्पितं पक्षत्वं कथ्यते सपक्षविपक्षयोर्हेतोः सदसत्त्वनिश्चयाद् व्याप्तिसिद्धिः। एवमपि साध्याभावे दृष्टस्य हेतोर्व्याप्तिग्रहणकाले व्यभिचाराशङ्कायां निश्चये वा व्यभिचारविषयस्य पक्षेऽन्तर्भावेन गमकत्वकल्पने न कश्चिद् हेतुर्व्यभिचारी भवेत्। तस्मान्नेश्वरसिद्धौ कश्चिद् हेतुरव्यभिचार्यस्ति।

अत्राहुः—नाकृष्टजातैः स्थावरादिभिर्व्यभिचारो व्याप्त्यभावो वा, साध्याभावे वर्तमानो हेतुर्व्यभिचारी उच्यते। तेषु तु कर्त्रग्रहणं न सकर्तृकत्वाभावनिश्चयः। ननूक्तमुपलब्धिलक्षणप्राप्तत्वे कर्तुरभाव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निश्चयः तत्र युक्तः, नैतद्युक्तम्, उपलब्धिलक्षणप्राप्ततायाः कर्तुः तेष्वनभ्युपगमात्। यत्तूक्तं—क्षित्याद्यन्वयव्यतिरेकानुविधानदर्शनात् तेषां तद्व्यतिरिक्तस्य कारणत्वकल्पनेऽतिप्रसङ्गदोष इति। एतस्यां कल्पनायां धर्माऽधर्मयोरपि न कारणता भवेत्। न च तयोरकारणतैव, तयोः कारणत्वप्रसाधमात्। नहि किञ्चिद् जगत्यस्ति यत् कस्यचित् न सुखसाधनं दुःखसाधनं वा, न तत्साधनस्यादृष्टनिरपेक्षस्योत्पत्तिः। इयाँस्तु विशेषः—शरीरादेः प्रतिनियताऽदृष्टाऽऽक्षिप्तत्वं, प्रायेण सर्वोपभोग्यानां तु साधारणादृष्टाऽऽक्षिप्तत्वम्। एतत् सर्ववादिभिरभ्युपगमादप्रत्याख्येयम्। युक्तिश्च प्रदर्शितैव। चार्वाकैरप्येतदभ्युपगन्तव्यम्। तान् प्रति पूर्वमेतत्सिद्धौ प्रमाणस्योक्तत्वात्। प्रमाणसिद्धं तु न कस्यचिन्न सिद्धम्। अथाऽदृष्टस्य कार्येणान्वयव्यतिरेकाननुविधानेऽपि नाकारणता न तर्हि वक्तव्यं भूम्यादिव्यतिरेकेण स्थावरादिना कार्येणेश्वरस्यान्वयव्यतिरेकानुविधानादकारणत्वम्। अथ जगद्वैचित्र्यमदृष्टस्य कारणत्वं विना नोपपद्यत इति तत् कल्प्यते। सर्वान् उत्पत्तिमतः प्रति भूम्यादेः साधारणत्वाद्, अतोऽदृष्टाख्यविचित्र कारणकार्यवैचित्र्यम्। एवमदृष्टस्य कारणत्वकल्पनायामीश्वरस्यापि कारणत्वप्रतिक्षेपो न युक्तः। यथा कारणगतवैचित्र्यं विना कार्यगतं वैचित्र्यं नोपपद्यत इति तत् परिकल्प्यते, तथा चेतनं कर्तारं विना कार्यस्वरूपानुपपत्तिरिति किमिति तस्य नाभ्युपगमः ?। न चाकृष्टजातेषु स्थावरादिषु तस्याग्रहणेन प्रतिक्षेपः, उपलब्धिलक्षणप्राप्तत्वाददृष्टवत्। न च सर्वा कारणसामग्री उपलब्धिलक्षणप्राप्ता। अत एव दृश्यमानेष्वपि कारणेषु कारणत्वमप्रत्यक्षं कार्येणैव तस्योपलम्भात्, सहकारीसत्त्वदृश्यमानस्य कारणता केषाञ्चित् सहकारिणां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृश्यत्वेऽप्यदृष्टादेः सहकारिणः कार्येणैव प्रतिपत्तिः । एवमीश्वरस्य कारणत्वेऽपि तत्स्वरूपग्रहणं न प्रत्यक्षेणेति स्थितम् । ततोऽनुपलब्धिलक्षणप्राप्तत्वात् कर्तुरुपलभ्यमानजन्मसु स्थावरेषु हेतोर्वृत्तिदर्शनात् न व्याप्त्यभावः । यतो निश्चितविपक्षवृत्तिर्हेतुर्व्यभिचारी । ननु निश्चितविपक्षवृत्तिर्यथा व्यभिचारी तथा सन्दिग्धव्यतिरेकोऽपि । उक्तेषु स्थावरेषु कर्त्रग्रहणं किं कर्त्रभावाद्, आहोस्विद् विद्यमानत्वेऽपि तस्याग्रहणमनुलब्धिलक्षणप्राप्तत्वेन ? । एवं सन्दिग्धव्यतिरेकत्वे न कश्चिद् हेतुर्गमकः, धूमादेरपि सकलव्यक्त्याक्षेपेण व्याप्त्युपलम्भकाले न सर्वा वह्निव्यक्तयो दृश्याः, तासु चादृश्यासु धूमव्यक्तीनां दृश्यत्वे सन्दिग्धव्यतिरेकाशङ्का न निवर्तते । यत्र वह्नेरदर्शनं तत्र किं वह्नेरदर्शनमभावाद् आहोस्विदनुपलब्धिलक्षणप्राप्तत्वादिति न निश्चयः, अतो धूमोऽपि सन्दिग्धव्यतिरेकित्वात् न गमकः । अथ धूमकार्यं हुतभुजः, तस्य तदभावे स्वरूपानुपपत्तेरदृष्टत्वेऽप्यनलस्य सद्भावकल्पना । ननु तत्कार्यमत्रोपलभ्यमानं किमिति कारणमन्तरेण कल्प्यते ? । अथ दृष्टशक्तेः कारणस्य कल्पनाऽस्तु, मा भूत् बुद्धिमतः वह्न्यादेर्धूमादीन् प्रति कथं दृष्टशक्तिता प्रत्यक्षानुपलम्भोपलम्भाभ्यामिति चेत्, बुद्धिमतोऽपि ताभ्यां कारणत्वक्लृप्तौ वह्न्यादिभिस्तुल्यता, यथा वह्न्यादिसामग्र्या धूमादिर्जन्यमानो दृष्टः स तामन्तरेण कदाचिदपि न भवति, स्वरूपहानिप्रसङ्गात् । तद्वत् सर्वमुत्पत्तिमत् कर्तृकर्मकरणपूर्वकं दृष्टम्, तस्य सकृदपि तथादर्शनात्तज्जन्यतास्वभावस्य । एवं स्वभावनिश्चितौ अन्यतमाऽभावेऽपि कथं भावः । किञ्च–अनुपलभ्यमानकर्तृकेषु स्थावरेषु कर्तुरनुपलम्भः शरीराद्यभावात्, न त्वसत्त्वात् । यत्र शरीरस्य कर्तृता, तत्र कुला-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्ठादेः प्रत्यक्षमुपलम्भः । अत्र तु चैतन्यमात्रेणोपादानाद्यधिष्ठानात् कथं प्रत्यक्षव्यापृतिः । नाप्येतद्वक्तव्यं शरीराद्यभावात् तर्हि कर्तृताऽपि न युक्ता कार्यस्य, शरीरेण सह व्यभिचारदर्शनात् । यथा स्वशरीरस्य प्रवृत्तिनिवृत्तौ सर्वे चेतनः करोति, ते च कार्यभूते, न शरीरान्तरेण शरीरप्रवृत्तिलक्षणं कार्यं चेतनः करोति, तेन तस्य व्यभिचारः । अथ शरीर एव दृष्टत्वात् करोतु नान्यत्र तत्र, अतः कार्यं शरीरेण विना करोति इति नः साध्यं तत्स्वशरीरगतं चेति । नानेन किञ्चिदेतदपि पराकृतम् । यदाहुः एके–अचेतनस्य शरीरादेरात्मेच्छानुवर्तित्वदर्शनात्, न चाचेतनस्य तदिच्छाननुवर्तिनोऽपि प्रयत्नप्रेर्यत्वं परिहार इति वक्तव्यम्, ईश्वरस्यापि प्रयत्नसद्भावे न काचित् क्षतिः । न च शरीराऽभावात् कथं प्रयत्न इति वक्तुं युक्तम्, शरीरान्तराऽभावेऽपि शरीरस्य प्रयत्नप्रेर्यत्वदर्शनात् तत्कर्तुः शरीराभावादकृष्टोत्पत्तिषु स्थावरेष्वग्रहणं, न तत्रादर्शनेन हेतोर्व्यभिचारः । येऽपि प्रत्यक्षानुपलम्भसाधनं कार्यकारणभावमाहुः, तेषामपि कस्यचित् कार्यकारणभावस्य तत्साधनत्वे, यथा इन्द्रियाणामदृष्टस्य च तौ विना कारणत्वसिद्धिः तथा ईश्वरस्याऽपि, अतो न व्याप्त्यभावः । अत एव न सप्रतिपक्षताऽपि, नैकस्मिन् साध्यान्विते हेतौ स्थिते तत्र द्वितीयस्यावकाशः, वस्तुनो द्वैरूप्यासम्भवात् । नाऽपि बाधः, अबुद्धिमत्कारणपूर्वकत्वस्य प्रमाणेनाग्रहणात् साध्याऽभावे हेतोरभावः स्वसाध्यव्याप्तत्वादेव सिद्धः । नाऽपि धर्म्यसिद्धता, कारणसङ्घातस्य पृथिव्यादेर्भूतग्रामस्य च प्रमाणेन सिद्धत्वात्, तदाश्रयत्वेन हेतोर्यथा प्रमाणेनोपलम्भः तथा पूर्वं प्रदर्शितम् । अतोऽस्मादीश्वरावगमे न तत्सिद्धौ प्रमाणाभावः । नाऽपि हेतोर्विशेषविरुद्धता,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्विरुद्धत्वे हेतोर्विशेषणेऽभ्युपगम्यमाने न कश्चिद् हेतुरविरुद्धो भवेत् । प्रसिद्धानुमानेऽपि विशेषविरुद्धादीनां सुलभत्वात् । यथाऽयं धूमो दहनं साधयति, तथैतद्देशावच्छिन्नवह्न्यभावमपि साधयति । नहि पूर्वधूमस्यैतद्देशावच्छिन्नेन वह्निना व्याप्तिः । एवं कालावच्छेदेन हेतोर्विरुद्धता वक्तव्या । अथ देशकालादीन् विहाय हेतोर्वह्निमात्रेण न विरुद्धता व्याप्तेः तर्हि तद्वत् कार्यमात्रस्य बुद्धिमत्कारणपूर्वकत्वेन व्याप्तेः । यद्यपि दृष्टान्तेऽनीश्वरोऽसर्वज्ञः कृत्रिमज्ञानसम्बन्धी सशरीरः क्षित्याद्युपविष्टः कर्ता तथापि पूर्वोक्तविशेषणानां धर्मिविशेषरूपाणां व्यभिचारात् तद्विपर्ययसाधकत्वेऽपि न विरुद्धता । विरुद्धो हि हेतुः साध्यविपर्ययकारित्वाद् भवति । न चैतेषां साध्यता, बुद्धिमत्कारण-पूर्वकत्वमात्रस्यास्माद् हेतोः साध्यत्वेनेष्टत्वात् । यथा च विशेष-विरुद्धादीनामदूषणत्वं तथा सिद्धान्तमभ्युपेत्य ' तद्विरोधी विरुद्ध ' इत्यत्र सूत्रे निर्णीतम् । इतश्च एतद्दूषणं पूर्वस्माद् हेतोः स्वसाध्या-सिद्धावुत्तरेण पूर्वसिद्धस्यैव साध्यस्य किं विशेषः साध्यते ? उत पूर्वहेतोः स्वसाध्यप्रतिबन्धः क्रियते ? । न तावत् पूर्वो विकल्पः, यदि नाम तत्रापरेण हेतुना विशेषाधानं कृतं किन्तु तावता पूर्वस्य हेतोः साध्यसिद्धिविघातः । यथा कृतकत्वेन शब्दस्यानित्यत्वसिद्धौ हेत्वन्तरेण गुणत्वसिद्धावपि न पूर्वस्य क्षतिः, तद्वदत्रापि । अथोत्तरो विकल्पः, तथापि स्वसाध्यसिद्धिप्रतिबन्धो व्याप्त्यभावप्रदर्शनेन क्रियते, व्याप्त्यभावस्य हेतुरूपाणामन्यतमाभावेन । न च धर्मि-विशेषविपर्ययोद्भावनेन कस्यचिदपि रूपस्याभावः कथ्यते । न हेतु-रूपाभावासिद्धावगमकत्वम् । तस्य विशेषविरुद्धताविशेषास्तु धर्मिणः स्वरूपसिद्धावुत्तरकाले प्रमाणान्तरप्रतिपाद्याः, न तु पूर्वहेतुबलाद्-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽभ्युपगम्यते तच्च प्रमाणान्तरमागमः पूर्वहेतोर्हेत्वन्तरं च । तच्च अन्वयव्यतिरेकिपूर्वककेवलव्यतिरेकिसञ्ज्ञं, यथा गन्धाद्युपलब्ध्या तत्साधनकरणमात्रप्रसिद्धौ प्रसक्तप्रतिषेधे करणविशेषसिद्धिः केवलव्यतिरेकनिमित्ता, तथेहापि कार्यत्वाद् बुद्धिमत्कारणमात्रप्रसिद्धौ प्रसक्तप्रतिषेधात् कारणविशेषसिद्धिः केवलव्यतिरेकिनिमित्ता । तथाहि—कार्यत्वाद् बुद्धिमत्कारणमात्रसिद्धौ प्रसक्तानां कृत्रिमज्ञानशरीरसम्बन्धत्वादीनां धर्माणां प्रमाणान्तरेण बाधोपपत्तौ विशिष्टबुद्धिमत्कारणसिद्धेर्व्यतिरेकबलादिति केचित् । अन्ये मन्यन्ते—यत्रान्वयव्यतिरेकिणो हेतोर्न विशेषसिद्धिः, तत्र तत्पूर्वकात् केवलव्यतिरेकिणो विशेषसिद्धिर्भवतु, यथा घ्राणादिषु । यत्र तु पूर्वस्माद् हेतोर्विशेषसिद्धौ तत्र न हेत्वन्तरकल्पना न्याय्या । यथा धूमस्य वह्निनान्वयव्यतिरेकसिद्धावत्र देशे वह्निरिति पक्षधर्मत्वबलात् प्रतिपत्तिर्नान्वयाद्व्यतिरेकाद्वा, तयोर्हि एतद्देशावच्छिन्नेन वह्निनाऽसम्भवात् । यदि व्याप्तिकाले सकलाक्षेपेण तद्देशस्याप्याक्षेपः अन्यथाऽत्र व्याप्तेरसम्भवात् तथापि व्याप्तिग्रहणवेलायां सामान्यरूपतया तदाक्षेपो, न विशेषरूपेणेति विशेषावगमो नान्वयव्यतिरेकनिमित्तः, अपि तु पक्षधर्मत्वकृतः । अत एव प्रत्युत्पन्नकारणजन्यां स्मृतिमनुमानमाहुः । प्रत्युत्पन्नं च कारणं पक्षधर्मत्वमेव । तथा कार्यत्वादेर्बुद्धिमत्कारणमात्रेण व्याप्तिसिद्धावपि कारणविशेषप्रतिपत्तिः पक्षधर्मत्वसामर्थ्यात् । य इत्थम्भूतस्य पृथिव्यादेः कर्त्ता नियमेनाऽसौ अकृत्रिमज्ञानसम्बन्धी शरीररहितः सर्वज्ञ एक एवं यदा पक्षधर्मत्वबलाद् विशेषसिद्धिः, तदा न विशेषविरुद्धादीनामवकाशः, अन्वयसामर्थ्यादपि विशेषसिद्धिमन्ये मन्यन्ते । तथा यथा धूम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मात्रस्य वह्निमात्रेण व्याप्तिः, एवं धूमविशेषस्य वह्निविशेषेणेति धूमविशेषप्रतिपत्तौ न वह्निमात्रेणान्वयानुस्मृतिः, किन्तु वह्निविशेषेणैव। एवं विशिष्टकार्यत्वदर्शनान्न कारणमात्रानुस्मृतिः, किन्तु तथाविधकार्यविशेषजनककारणविशेषानुस्मृतिः, तदनुस्मृतावत्रान्वयसामर्थ्यादेव कारणविशेषप्रतिपत्तिरिति न विशेषविरुद्धावकाशः। तथाऽन्येनापि प्रमाणद्वयेनाभिमतसिद्धिः साध्यते वार्त्तिककृद्भिः—'यथा महाभूतादि व्यक्तं चेतनाधिष्ठितं प्राणिनां सुखदुःखनिमित्तं रूपादिमत्त्वात् तुर्यादिवत्, तथा पृथिव्यादीनि महाभूतानि बुद्धिमत्कारणाधिष्ठितानि स्वासु धारणाद्यासु क्रियासु प्रवर्त्तन्ते अनित्यत्वाद् वास्यादिवत्'।

अविद्धकर्णस्त्वाह इदं प्रमाणद्वयमभीप्सितसिद्धये—'द्वीन्द्रियग्राह्याऽग्राह्यं मत्यधिकरणभावापन्नं बुद्धिमत्कारणपूर्वकं स्वारम्भकावयवसन्निवेशविशिष्टत्वात् घटादिवद्, वैधर्म्येण परमाणव इति। तथा तनुभुवनकरणोपादानानि चेतनाधिष्ठितानि स्वकार्यमारभन्ते इति प्रतिजानीमहे रूपादिमत्त्वात्, यद्यद् रूपादिमत् तत्तच्चेतनाधिष्ठितं स्वकार्यमारभते यथा तन्त्वादि, रूपादिमच्च तनुभुवनकरणादि कारणम्, तस्मात् चेतनाधिष्ठितं स्वकार्यमारभते। योऽसौ चेतनः तनुभुवनकरणादेरधिष्ठाता स भगवानीश्वर' इति।

उद्योतकरस्त्वाह अनुमानमन्यदेव—'भुवनहेतवः प्रधानपरमाण्वदृष्टाः स्वकार्योत्पत्तावतिशयबुद्धिमन्तमधिष्ठातारमपेक्षन्ते, स्थित्वा प्रवृत्तेः, तन्तुतुर्यादिवत्' इति। प्रशस्तमतिस्तूदाजहार अन्यथैव—'यथा सर्गादौ पुरुषाणां व्यवहारोऽन्योपदेशपूर्वकः, उत्तरकालं प्रबुद्धानां



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्यर्थनियतत्वाद्, अप्रसिद्धवाग्व्यवहाराणां कुमाराणां गवादिषु प्रत्यर्थनियतो वाग्व्यवहारो यथा मात्राद्युपदेशपूर्वक इति। यदुपदेशपूर्वकश्च स सर्गादौ व्यवहारः, स ईश्वरः प्रलयकालेऽप्यलुप्तज्ञानातिशय' इति। तथा परमसामर्थ्योपेत–परमेश्वरसाधिका उपलक्षणात् कर्तृत्वसाधनी च कारिका गीयते एवं—

'कार्याऽऽयोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।
वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः॥१॥ इति।

तत्र कार्यं सकर्तृकं कार्यत्वादित्याद्यमनुमानम्। अत्र कार्यत्वाख्यो हेतुः, कालवृत्त्यत्यन्ताभावप्रतियोगित्वे सति सत्त्वं प्रत्यक्षजन्यत्वेच्छाजन्यत्वादिना च साध्यत्वं अदृष्टद्वाराजन्यत्वस्य विशेषतासम्बन्धावच्छिन्नकारणताप्रतियोगिकसमवायावच्छिन्नजन्यत्वं वा साध्यं अनुकूलतर्कानवतार एव सन्दिग्धोपाधिना व्यभिचारसंशयस्योत्पादयितुं शक्यत्वात्। तथा आयोजनं–कर्म। सर्गाद्यकालीनद्व्यणुकारम्भकसंयोगजनककर्म प्रयत्नजन्यं कर्मत्वाद्, अस्मदादिकर्मवत्। अदृष्टं तु नायोजनं दृष्टहेतुमन्तरा प्रयत्नजन्यक्रियात्वस्य च चेष्टात्वान्न सोपाधिकमिदमिति। धृतेश्च। यथा ब्रह्माण्डादिपतनाभावः पतनप्रतिबन्धकप्रयुक्तो, धृतित्वात्, उत्पतत्पतत्रिपतनाभाववत् तत्पतत्रिधृततृणादिवद्वा। आदिशब्दाच्च नाशादपि। ब्रह्माण्डनाशः प्रयत्नजन्यः नाशत्वात्, पाट्यमानपटनाशवदिति। पदाच्च। तत्र पद्यते–गम्यतेऽनेनेति पदम्–व्यवहारः आधुनिकव्यवहारवत् न च कुलालाद्याः तिष्ठन्ति प्रलये। प्रत्ययः–प्रमा, ततोऽपि। यथा वेदजन्यप्रमा कृतयथार्थवाक्यार्थज्ञानजन्या शाब्दप्रमात्वात्, आधुनिकवाक्यजशाब्दप्रमावत्। श्रुतिः–वेदः, तस्मादपि। यथा वेदोऽसंसारी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरुषप्रणीतो वेदत्वादिति । आत्मत्वस्य जातित्वादसंसारिवृत्तित्वसिद्धेर्नासिद्धता परमतेऽपि साध्यस्य । वाक्यादपि । यथा वेदः पौरुषेयो वाक्यत्वात्, भारतवत् । तथा सङ्ख्याविशेषात् । विशेषत्वं च द्वित्वादिग्रहणात्, सा च द्व्यणुकादिपरिमाणजनिका, तस्या अपि । यथा इयं सङ्ख्या बुद्धिजन्या सङ्ख्यात्वाद्, अस्मदाद्यपेक्षाबुद्ध्यजन्यत्वात् अतिरिक्तापेक्षाबुद्धिसिद्धौ तदाश्रयतयेश्वरसिद्धः जन्यपरिमाणत्वाच्च द्व्यणुकपरिमाणस्य सङ्ख्याजन्यत्वसिद्धिः । तदेवं स्वमतिकल्पितकल्पनाविषमाध्वनीनैः साध्यते यथा तथा सचराचरस्य जगतोऽस्य परमपुरुषादिकृतत्वं प्रकृत्युद्भवत्वं च । परं नैतद्युक्तियुक्ततामन्वेति । कुत ? इति चेत्, लोकस्य प्रदेशप्रचयनिष्पन्नत्वात् । यतो न तावत् प्रदेशस्य भवत्युपादानकारणमन्यत्, प्रदेशत्वहानेः । ब्रह्मण उपादानता च जडत्वापत्तेरयुक्तैव । अस्त्येव सत्प्राधान्यता ब्रह्मणि चिदानन्दप्राधान्यतावदिति चेत् । सत्यम्, परं भेदकाभावात् कथं भवेतामन्यान्यप्राधान्यतागौणत्वे, स्पष्टश्च विरुद्धधर्माऽभ्युपगमो ब्रह्मणि । निमित्तकारणतापि च न तस्य युज्यते, प्रदेशानां स्वभावत एवोत्पादादिपर्याययुक्तत्वात् । एतच्च 'वर्त्तत' इत्यनेन ध्वनितम् । प्रकृत्युद्भवत्वं युक्त्यतिरिक्तमेव । यतो नहि गुणेभ्यो द्रव्योत्पादो विरहय्य प्रत्यक्षविरुद्धताभ्युपगमं कल्पयितुं शक्यः । न चाहङ्कारादिर्भवति जडस्वरूपायाः प्रकृतेः, न चाहङ्कारादिभ्यो भवदुपलभ्यते वा किञ्चिदपि मनोबुद्धीन्द्रियादि । न च बुद्धीन्द्रियादिभ्यो भूतोत्पत्तिर्भवन्तीति वक्तुं शक्नोति वादिवदान्योऽपि कदाग्रहमन्तरा । विश्वस्याप्यदारिद्र्यं स्याच्चैव । अनुमानानि च परमेश्वरकृतत्वसाधकानि लोकस्य सर्वाणि प्रागभिहितानि यानि,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तानि घटपटादीनां नवानामपि पुराणादिभावदर्शनतोऽनैकान्तिकानि, अङ्कुरादीनां चोत्पत्तेरप्यक्षसिद्धत्वादकर्तृकाया विरुद्धदोषोपगतानि च। अदृष्टं तु वैचित्र्यहेतुतया समानकारणोपनिपातेऽपि साधयितुं शक्यमेव फलवैचित्र्यस्य प्रत्यक्षसिद्धतया। न चादृष्टं न स्वतन्त्रं फलमुपदधाति। ईश्वरस्येवेश्वरस्यैवोपकारित्वापत्तेः। इष्टापत्तौ च वधकवद् अनिष्टतापत्तेश्चापकारनिपुणत्वाङ्गीकारस्यावश्यंभावात्। भूयांसश्च दुःखिनो दरीदृश्यन्ते लोकेऽस्मिन् जन्तवो यतः, तत आयात्येवानल्पपापकारिता तस्य। किञ्च-किं पापिकां बुद्धिमयं निरोद्धुमलं न वा? अलं चेत् कथं सा, नालं चेत्, किं परमैश्वर्यम्, कथं फलं दद्यात् सर्वेषामसुमताम्। विस्तरतश्च प्रान्ते निराकरिष्यामः श्रुतिप्रभृत्युपदर्शितप्रमाणपारमार्थिकार्थान्वेषणयाऽनुमानोपदर्शितसाध्यपरीक्षणेश्चेति। प्रदर्शनं चाधुनास्याभियुक्तकरणैः प्रदर्शितत्वात् निषेध्यतयाऽत्र। कथं नु निषिध्यते एतत्? न तावत् प्रत्यक्षेण, तद्धि सत्येवोपलम्भार्हत्वे, न चास्ति तत्, विधायकं च तदिति त्वन्यदेव। अनुमादि च तदनुसार्येवेति द्रापयित्वाऽऽहुः—

'प्रमाणमित्थं च वयं त्विति'। तत्र प्रमीयते संशयादिव्यवच्छेदेन यथावस्थितं वस्त्वनेनेति प्रमाणं—प्रमेयव्यवस्थापकम्. क्वेत्याहुः—'अत्र चे'ति। अत्र—लोककर्तृत्वाकर्तृत्वनिरूपणे। चकारस्य विशेषणार्थत्वाद् विशिनष्टयेतत् यदुत—अतीन्द्रिये वस्तुनि न क्रमतेऽध्यक्षादि स्पर्शादिवत् किन्तु वक्ष्यमाणमेव। पश्यते चात एवागमस्यैवातीन्द्रियार्थनिश्चये प्राधान्यम्। ननु चोपपत्तिरप्यवगीता गीयत एव तज्ज्ञप्ताविति चेत्। सत्यम्, गीयते परं तदननुसारिण्येव। अत एव च निरदेशि प्रागागमे 'आगमश्चोपपत्तिश्च सम्पूर्णं दृष्टि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लब्धगम् । अतीन्द्रियाणामर्थानां सद्भावप्रतिपत्तये ' ॥ तथा–' आगमेनानुमानेन ध्यानाभ्यासरसेन च । त्रिधा प्रकल्पयन् प्रज्ञां लभते तत्त्वमुत्तम ' ॥ मित्यादौ । तदननुसारिण्यनुमा च निन्दिता खलु–' ज्ञायेरन् हेतुवादेन पदार्था यद्यतीन्द्रियाः । कालेनैतावता प्राज्ञैः कृतः स्यात्तेषु निश्चयः ॥ इत्यादिना । आश्रित्य चामुमेवाङ्गीकारं प्रतिपाद्यते–' अनुमानप्रधानेन विषमे पथि धावता । अन्धेनान्ध इवाकृष्टौ विनिपातो न दुर्लभः ' ॥ इत्यादि । वक्ष्यन्त्येव चातो वचनपदान् परतोऽपि त्वव्ययेन निश्चयैकहेतुतानिर्णयं वचनस्यैवेति । किं तदित्याहुः–' वचनं 'त्विति । तत्र उच्यते अतीन्द्रियार्थवेदिभिः यत्तद्वचनम् । सामान्यशब्दत्वेऽप्यस्य प्रकरणाभिधेयतात्पर्यवशेनैवं व्युत्पत्तिः । यद्वा–वचनशब्देन सर्वज्ञवचनमेव ग्राह्यम्, तस्यैव प्रमाणत्वादेतादृशे प्रस्तावे । यत उच्यते धर्ममाश्रित्य–' परलोकविधौ मानं वचनं तदतीन्द्रियार्थदृग्व्यक्त 'मिति । तुरवधारणार्थः । अवधारयन्त्यनेन प्रवृत्तिनिवृत्तिकारणतां यथाऽन्यत्र एतन्मूलां शास्त्रकाराः तथाऽतीन्द्रियार्थत्वादस्यागममूलतामेव । यत उच्यते–' यस्मात् प्रवर्त्तकं भुवि निवर्त्तकं चान्तरात्मनो वचनं धर्मश्चैतत्संस्थ ' [षोडशके] इत्यादि । ननु तर्हि सर्वेऽप्यास्तिकाः स्वस्वाभिमतागमानुसारिण इति सर्वेषामप्याराधकता भवन्ती स्वीकार्यैव, प्रस्तुतं लोकविधातृत्वमपीश्वरस्य निषिध्यमानं नाञ्चत्येवौचितिपदवीमागमप्रतिपादितत्वात्, न स्याच्चैवं सम्यक्त्वेतरयोर्विशेष इति चेत् । सत्यम्, वचनस्य केवलस्यैव यदि कृतं स्यात् प्रामाण्यं स्यादेवैवम्, परं न तत्तथा, किन्तु वीतरागस्य भगवतः, इति दर्शितमेव च व्युत्पत्तावेवेदम् । इदमेवातीन्द्रियार्थदृग्व्यक्तं मौनीन्द्रं नेतरदित्यत्र का प्रमेति चेत्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हितोपदेश मुमुक्षुसत्साधुपरिग्रह–पूर्वापरविरोधराहित्यादेः सुतरां निर्णीयमानत्वादस्य सर्वज्ञप्रणीततायाः। इतरेषां तु हिंसाद्यसत्कर्मपथोपदेश–नृशंसदुर्बुद्धिपरिग्रह–सायुधादिकलङ्काङ्कितनुप्रोक्तत्वादिना न तथात्वम्। तथात्वं तेषां कथमिति त्वन्यदेव। दृष्टेष्टाविरुद्धं च वचनं प्रामाणिकमागमव्यपदेश्यमिति निष्कर्षः। यद्वा–तुशब्दोऽप्यर्थः। तथा च यथानुमानमत्र मानं लोकाऽनादित्वेऽस्तिकायरूपत्वात्तस्य, तथा वचनमपीत्यर्थः—

अत्र प्रथमं तावत् पञ्चास्तिकायात्मकत्वं सिसाधयिषवोऽभियुक्ता अस्तिकायपञ्चकं सलक्षणं दर्शयन्ति—

**धम्माधम्मागासा गइ–ठिइ–अवगाहलक्खणा एए।**
**जीवा उवओगजुया मुत्ता पुण पुग्गला णेया ॥२॥**

तत्र 'धृङ् स्थाने' इति तौदादिको धातुः। तस्माद् धारयते –स्थापयति गतिपरिणतान् जीवपुद्गलान् गतिसाहाय्यविधानेनेति ण्यन्तात् कर्त्तरि 'अर्तीरिस्तुसुहुसृधृघृक्षि०' [३३८] इत्यादिना मे धर्म इति। तथा अस्तयः–प्रदेशास्तेषां कायः–समूहोऽस्तिकायो, धर्मश्चासावस्तिकायश्च धर्मास्तिकाय इत्यर्थः। स्वभावतो गतिपरिणता हि जीवपुद्गलाः, ताँस्तथा प्रवृत्तौ करोति साहाय्यकमेष इति। नहि असौ बलात्कारेण गमयति, किन्तु मीनानिवोदकं केवलं विधत्ते साहाय्यमिति नाऽस्य सर्व (लोक) व्यापित्वे सर्वदा गतिपरिणतत्वं जीवपुद्गलयोः। नहि मीना अपि प्रेर्यन्ते पानीयपूरेण, किन्तु साहाय्यमेव क्रियते तेन गद्गतौ, तथाऽत्रापीति न कदाग्रहग्रहिलजनचञ्चूप्रवेशोऽत्र।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतेनानवबुध्य लेशतोऽप्यन्यदीयं मन्तव्यं विकलचेतना इव केवलं खण्डनमण्डनबद्धपरिकरा मिथ्यात्वमदोन्मत्ततान्छादितविवेकविलोचना आचख्युर्जैनमन्तव्योद्देशेन धर्मास्तिकायलक्षणं गोविन्दाचार्य-वाचस्पत्या-ऽऽनन्दगिर्यादयो गेहेनर्दिनो यथा, तथामन्तव्याभावादेव निरस्ताः सुदूरतरं नीतिमार्गदूरवर्तिनस्ते । यथोदाहृतवन्तः शारीरिकभाष्यवृत्तौ स्वस्वविहितायामन्धितधियो द्वितीयाध्याय-द्वितीयपाद-षष्ठाधिकरणीयत्रयस्त्रिंशत्कसूत्रव्याख्यायां-सम्यक्प्रवृत्त्यनुमेयो धर्म इति गोविन्दाचार्याः, धर्मास्तिकायप्रवृत्त्यनुमेय इति वाचस्पतयः, तथा धर्मास्तिकायः सम्यक्प्रवृत्त्यनुमेयः शास्त्रीयबाह्यप्रवृत्त्यान्तरोऽपूर्वाख्यो धर्मोऽनुमीयते इति प्राहुरानन्दगिरयश्च । न चैतैरवबुद्धं लक्षणं जैनमताऽऽमतम् । धर्मास्तिकायानवबोधेऽपि च न न्यायानुयायिनामनुसृतो मार्गः, कथमन्यथा व्याख्यायेरन्नेवम् । ननु धर्मास्तिकायोऽस्तु पूर्वोक्तरूपः, परं किं मानं तत्रेति । मुख्यत आगम एव मानम् । नहि तादृशेऽर्थे क्रमतेऽर्वाग्दृशां मतिः । अनुमीयते चानुमाने यथा-सनिमित्तता जीवपुद्गलानां गतिः, गतित्वाज्जलनिमित्तकमीनगतिवत् । अर्थापत्तिरपि भवत्येवैतत्साधिका यतो न चेत् स्याद्धर्मास्तिकायो न भवेद् दृश्यमानः स्कन्धादिभावः, अनन्तत्वेनाऽऽकाशस्य विप्रकीर्यमाणधान्यपुञ्जवद्, विप्रकीर्णताभावेन संयोगाभावात्, संयोगे च सत्येव स्कन्धता, सत्यामेव च स्कन्धतायां प्रत्यक्षता । नहि भवति परमाणुरर्वाग्दृशां गोचरोऽक्ष्णः । न च जीवानामपि सम्मेलो, यदि न स्याल्लोकेयत्ताकारको धर्मः । अत एवोच्यते अन्यत्र-जीवानां पुद्गलानां च गत्युपष्टम्भकारणं धर्मास्तिकायो, ज्ञानस्य दीपश्चक्षुष्मतो यथेत्युदित्वापि 'तम्हा धम्माधम्मा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोगपरिच्छेयकारिणो जुत्ते 'त्यादि । अमूर्त्तश्चासौ निष्क्रिय एव च । अन्यथा तस्याऽप्यपरसाहाय्यकारकस्वीकारापत्तेः, भवेच्च लोके तच्छून्योऽपि भागः । तथासति तस्य लोकत्वाभावेनानियतो विभागः स्याद् लोकाख्यः । सावयवश्चायं प्रतिनियमितप्रदेशेष्वाकाशस्य विशिष्टक्रियानिवर्त्तनात् । न चावच्छेदकता निरवयवे परमाणोरिव सम्भवति, अवयवारब्धत्वलक्षणसावयवत्वभावात् । निरवयवत्वं चेदुपचरितं तन्न वास्तवं विहाय स्वरूपं तत्त्वाख्यानोपयोगीति । तथा च युक्ता एवासङ्ख्या एव प्रदेशलक्षणा अवयवाः । तस्यानन्तत्वे आकाशवत्तदवयवानां तदङ्गीकारवैयर्थ्यापत्तेः । सङ्ख्यातत्वे च न स्यात् पारमार्थिकी कल्पनांशानां, न भवेच्चासङ्ख्यातप्रदेशपरिमाणलोकसमग्रप्रदेशव्यापिता ।

तथा 'ऽधम्म 'त्ति । धर्मस्य-प्रोक्तस्वरूपस्य धर्मास्तिकायस्य विपक्षोऽधर्मः । विपक्षता च स्थितिपरिणतानां जीवपुद्गलानां स्थितौ साहाय्यकारकत्वात्, निदाघतप्तपान्थानामगच्छायावत् । नहि सा प्रेरयति तान्, किन्तु साहाय्यं विधत्ते । न चानिमित्ता गतिवत् स्थितिरपि भवतीत्यावश्यकी कल्पनाऽधर्मास्तिकायस्यापीति न धर्मास्तिकायसाहाय्याभावमात्रेण तद्वैयर्थ्यम् । कथमन्यथा पुण्याभावमात्रता पापस्य, पुण्यस्य वा पापाभावमात्रता न स्यात् ? । जीवपुद्गलानां परिणामविशेष एव च स्थितिः, न गत्यभावरूपेति वास्तवी भिन्नताऽधर्मास्तिकायस्य । अनेनाप्यपास्ता एव ते, ये अन्यथाप्रलापिनो वावदूकाः खण्डनग्रहग्रहिला य आहुः एवमत्रापि-'यत् उर्ध्वगमनशीलस्य जीवस्य देहे स्थितिहेतुरधर्म इति, उर्ध्वगमनशीलो जीवस्तस्य देहेऽवस्थानेनाधर्मोऽनुमीयते ' इति च । एतदद्वयभावाभाव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृतैव हि लोकालोकेति व्यवस्थाऽभ्युपगन्तव्या । लोकशब्दस्य शुद्धवाच्यत्वात् सविपक्षत्वान्वयात् जीववत् 'लोगत्थत्ति विवक्खो शुद्धत्तणओ घडस्स अघडोव्वे 'त्यादि प्रतिपादितमेव पूर्वपुरुषग्रन्थेषु, समानयोगत्वाच्च धर्मास्तिकायेन समान एवेति । न चाऽऽगमिकमर्थमागमेनैव प्रज्ञापयेन् मतिमाँश्चेत् स्यादाराधक 'आगमे अ आगमिओ 'त्ति वादीन्द्रवचनाद्, आगमिकमेव च धर्माधर्मास्तिकाययुग्मनिरूपणम् । तदर्थमेव चादावभिहितं पूज्यैः—'पमाणमित्थं च वयणं'स्त्विति । तन्नात्र युक्ता युक्तिप्रयुक्तिः, तस्या हेतुकवादार्थे एव योग्यत्वाद्, अन्यथा 'सिद्धंतविराहओ अन्नो 'त्तिवचनाद् विराधकतापत्तेरिति वाच्यम् । युग्मस्यैतस्य सर्वथाऽऽगमिकत्वाभावात्, कथमन्यथा धर्माधर्माद्यमूर्त्तद्रव्यप्रश्न मद्गुकः अव्धिपारगतदेशप्रश्नम् आगमरूपाप्तवचनप्रामाण्यख्यापनाय उदाहरन् गन्धपुद्गलदृष्टान्तमनुमानप्रमाणख्यापकमुदाहरिष्यन् । न च पूज्या अपि सर्वथाऽऽगमिकत्वमस्योदाजह्रुः, किन्तु तदुपगृहीतमेवानुमानप्रथनं प्रथनीयमत्र बुद्धिप्रथावद्भिरिति ज्ञापयाञ्चक्रुः । सत्यमेव चैतत् । यतोऽङ्गीकृत्याऽऽगमोदितं गत्यादिसाहाय्यकारित्वं तस्य निमित्तकारणता साध्यते गतिस्थित्योः, अन्यथा भविष्यति किञ्चिदित्येव पर्यवसानं स्याद् । यद्वा—धर्माधर्मयुगलस्य सावयवत्वादावेव केवलमागमिकत्वम् । तदपि चाऽत्रावेक्षणीयमिति सिद्धान्तसाध्यता स्वीकृता सूरिवर्यैः । यथोचुः सिद्धसेनगणिपादाः—'अर्हत्प्रोक्तेषु जीवादिष्वर्थेषु यथाऽऽत्मलोकाकाशतुल्यप्रदेशौ गतिस्थितिहेतू जीवपुद्गलानां धर्माधर्मावपेक्षाकारणमित्येवमादिः '। अनेकपदार्थोऽत्यन्तसूक्ष्मस्तेषु । अत्यन्तग्रहणाद् लिङ्गाऽगम्येषु, यतः परमाणवः सूक्ष्माश्चातीन्द्रियाश्च तथापि लिङ्गेन कार्येणावगम्यन्ते,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नैवं सङ्ख्येयप्रदेशादय इत्यत्यन्तसूक्ष्माः समुल्लङ्घितचक्षुरादिविषयभावाः। केवलाऽऽगमग्राह्येषु इति तथा अथ आगमपरिच्छेद्येषु प्रज्ञापनीयेष्वर्थेषु यः संशयो भवति–एवं स्यादसङ्ख्येयप्रदेश आत्मा अथनिष्प्रदेशो निरवयवत्वान्नैवं स्यादिति इत्यादि। गणिराजपादाः स्पष्टमत्र स्पष्टयन्ति–आगमगम्यत्वमसङ्ख्यप्रदेशत्वादीनामात्मादीनां न तु धर्माधर्मादिसद्भावस्य। व्याख्याप्रज्ञप्तौ मद्दुकश्रमणोपासकाऽऽख्यानमपि तथैवाख्यानसमीचीनतामाख्याति। न चासत्यः सोऽर्थः, भगवता प्रशंसितत्वाद्, विस्तरार्थिना स एवालापकोऽनुप्रेक्ष्यः। अत एव च न्यायाचार्यचरणा अपि न्यायालोके प्रोक्तयुग्मसिद्धये न्यायपथसिद्धतामशिश्रियन्। अत्र च प्रदेशसङ्ख्यापरिमाणोपयोगवैशिष्ट्याद् आगमोऽग्रतः कृतः, तावन्मात्रेण न केवलाऽऽगमिकताऽनयोः, सद्भावप्रतिपत्तावपि स्वीकर्त्तव्या। तदर्थमेव च तुशब्दस्याप्यर्थतामाश्रित्य व्याख्यातं प्राग् द्वितीयव्याख्ययेत्यलं विस्तरेण।

तथा 'आगास'त्ति। तत्र 'काश दीप्तौ' इति भौवादितः (कः)तस्माद् 'व्यञ्जनान्ताद्०' [५–३–१३२] इति करणाधारे घञि आकाश इति पुंनाम्न्येवम्। अन्यथा तु 'भावाकर्त्रोः' [५–३–१८] इति घञ् अधिकरणे उभयथापि। आङ्–मर्यादया स्वस्वभावापरित्यागेन काशन्ते–शोभन्ते धर्माधर्मादयोऽस्मिन् इत्याकाश आकाशं वा। काशन्ते च धर्माधर्मादयोऽत्रावगाढा अप्यनादिकालात् स्वस्वभावापरित्यागेन। 'लोकाकाशेऽवगाहः धर्माधर्मयोः कृत्स्ने' [तत्त्वार्थ०] इति परमपुरुषवचनाद् धर्माधर्मयोरप्यवगाढत्वे लोकाकाशप्रदेशेष्वभिशङ्कया न विरुद्धता। सिद्धिश्चास्य 'इह पक्षी'ति प्रतीतिबलात्। उद्योतादीनां च परावर्त्यमानत्वाद् भूमिगृहादावपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्तरालेऽपि व्यपदिश्यते इहेति। न च विनाऽऽधारमाधेयम्। तथा परमाणुप्रभृतीनामनन्ताणुस्कन्धानामवश्यमाधारोऽन्वेषणीयः, स एवाकाशः। न च तस्याप्यन्योऽस्त्वाधारः, 'इहाकाश'मिति व्यपदेशात्। तस्यावरणाऽभावमात्रार्थत्वात्। नहि आवरणाभाव आकाशः, अभावस्वरूपापत्तेः, किन्तु पृथग् द्रव्यमेव। न च तस्याधारोऽन्यः प्रदीपप्रकाशकतावत् स्वपराधारत्वात्। न चान्येषामेवाऽस्तु स्वाधारत्वम्, परिमितानां तेषां तथाभावाभावात्। न चेहाकाशमिति भवति प्रामाणिकोल्लेखः, तद्द्रव्यमाश्रित्य मूर्त्तानां च नैव भवति कथञ्चनापि स्वाधारता। न धर्मादीनां तथाभावो भवतु, तेषामाकाशविशेषावच्छेदकत्वेनैव सिद्धेरुपयोगस्य, गतिस्थित्युपग्रहकरा एवैते। सिद्ध एव चावकाशे लोकविभाजकधर्मादेरुपयोगः। तेषां चावगाहोपष्टम्भकत्वे च सर्वव्यापितायां पुनरवच्छेदकमवलोकनीयमन्यत्। न च विना भेदं वैचित्र्यमुपपद्यते। न च विभाजकः जीवपुद्गलयोर्गतिस्थितिनियमः। न चाऽलोके नावगाहदात् विद्यते आकाशमिति, यावद्व्यापित्वात् तस्य, तत्स्वभावत्वाच्च तस्य सावयवं च तत्, घटपटाद्यवच्छेदकत्वाभावादन्यथा। न च कथं निरंशस्य परमाणोरस्त्येव षड्दिगवच्छेदकता?, स्पर्शनयैव तथावच्छेदकता यतस्तस्य, न त्वाधारापेक्षया। घटादेरवच्छेदकता त्वाधारापेक्षयैवोपस्थाप्यते। अत्र द्विविधत्वेऽप्यस्य लोकालोकरूपत्वेन न सोऽत्र निरुरूपयिषितः, आकाशमात्रत्वेनैव प्रस्तुतप्रसङ्गात्, परं लोकाकाशत्वं तस्यैव, यत्रावगाहन्ते धर्माधर्मजीवपुद्गलाः। केवल आकाशश्चालोकः। न च नैव स, लोकस्य सविपक्षत्वाच्छुद्धपदत्वेन घटवत्। न च पटादि तत्, तस्य लोकरूपत्वेन तद्भिन्नत्वाभावात्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनेन ये प्रलेपुर्मिथ्यात्वाध्मातात्मानो निर्विवेकशेखरा गोविन्दाचार्य–वाचस्पतिमिश्रा–ऽऽनन्दगिर्यादयो जैनमन्तव्याधिकारे यत्–'आवरणाभाव आकाश इत्यर्थः, आकाशास्तिकायो द्विविधो लोकाकाशः सांसारिकः, अलोकाकाशो मुक्ताश्रय इति । तथा आकाशास्तिकायो द्वेधा–लोकाकाशोऽलोकाकाशश्च । तत्रोपर्युपरि स्थितानां लोकानामन्तर्वर्त्ती लोकाकाशः, तेषामुपरि मोक्षस्थानमलोकाकाशः, तत्र हि न लोकाः सन्ति तथैव आकाशास्तिकायस्त्वावरणाभावः । आकाशास्तिकायो द्वेधा–लौकिकाकाशोऽलौकिकाकाशश्च लोकानामन्तर्वर्त्ती लोकाकाशः तदुपरि मोक्षस्थानमलोकाकाशः' इति । ते सर्वे निरस्ता अनभ्युपगतोपालम्भकाः । अनभ्युपगमश्चैष 'अजीवकाया धर्माधर्माकाशपुद्गलाः' इति 'लोकाकाशेऽवगाहः' 'धर्माधर्मयोः कृत्स्ने' 'एकप्रदेशादिषु भाज्यः पुद्गलानां' 'असङ्ख्येयभागादिषु जीवाना'मिति 'कृत्स्नकर्मवियोगो मोक्षः तदनन्तरमूर्ध्वं गच्छत्याऽऽलोकान्तात्' [तत्त्वा०] । 'लोकान्तादपि न परं प्लवक इवोपग्रहाभावात् । सिद्धस्योर्ध्वं मुक्तस्याऽऽलोकान्ताद् गतिर्भवति ॥ सिद्धिक्षेत्रे विमले जन्मजरामरणरोगनिर्मुक्तः । लोकाग्रगतः सिद्ध्यति साकारेणोपयोगेन' ॥ 'इह बोंदिं चइत्ता णं तत्थ गंतूण सिज्झइ । तियलोयमत्थयत्था सिद्धा सरणं सुहपसत्थ' ॥ इत्याद्यनल्पस्थलीयातिप्रसिद्धजैनागमाऽनालोकमूलकल्पितस्वरूपविरुद्धतमस्वरूपप्रदर्शकजैनागमसद्भावात् । एषैव च तेषां मदान्धताऽनूना, यदनाकलय्यैवापरमतमीमांसितमाख्यान्ति विवेकमार्गमतिक्रम्य, इत्यलमपरबुद्धितुच्छतादर्शनेन ।

अथैतेषां धर्माधर्माकाशानां लक्षणानि कार्यलिङ्गापेक्षया तदङ्गीकारार्हतं च दिदर्शयिषन्त आचख्युः–' गइ–ठिइ–अवगाहलक्खणा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एए 'त्ति । तत्र गमनं गतिः-जीवस्य पुद्गलस्य जीवानां पुद्गलानां वा देशान्तरप्राप्तिः । एतच्च चलनक्रियामात्रोपलक्षणम्, तेन श्वासोच्छ्वासविचारादीनामपि ग्रहे न क्षतिः । तेषामपि गत्युपष्टम्भकोपग्राह्यत्वाम्नायात् । तथा स्थानमवस्थानं स्थिरतया स्थितिः-परिणामविशेषः । न चाभावरूपतैवाऽस्तु, गतिनिवृत्तिरूपत्वात्तस्या मौनक्षमादिवत् । तस्याः परिणामान्तरत्वादेव । अत एवावतिष्ठते इत्यादिप्रयोगाः क्रियाप्राधान्येन गीयमानाः सङ्गच्छन्ते । अन्यथा स्वभावत्वात्तदसङ्गतेः । कायनिरोधादीनामुपलक्षणं चैतत् । तथा अवगाहनमवगाहो-व्यापनं व्याप्यावस्थानं वा । पश्चाद् द्वन्द्वस्त्रयाणां गत्यादीनाम् । ते लक्षणानि लक्ष्यन्ते-अतीन्द्रिया अपि ज्ञायन्ते अमूर्तत्वे समानेऽप्यवच्छिद्यन्ते वाऽनेनेति लक्षणम् । धर्मास्तिकायाद्या हि गत्यादिभिः तत्कार्यभूतैरेवावगम्यन्ते इति गत्यादीनां लक्षणत्वं यथार्थमेव । यद्वा-गतिस्थित्यवगाहशब्देन पदैकदेशे पदसमुदायोपचारं कृत्वा गत्युपग्रहः स्थित्युपग्रहोऽवगाहोपग्रह इत्याख्येयम् । तथा च गतिस्थित्यवगाहोपग्रहाः लक्षणं-स्वरूपं येषां ते तथा । के ते ? इत्याहुः-'एते' इति । समीपतरनिर्दिष्टा धर्माधर्माकाशाः । यद्वा-प्रथममध्याहार्य व्याख्येयं यथा-त्रयोऽस्तिकायाः धर्मास्तिकायोऽधर्मास्तिकाय आकाशास्तिकायश्चेति सन्ति । त्रयाणामादौ पाठस्त्वार्षक्रमप्रामाण्यात् लोकविभागकारित्वावगाहदातृत्वेन परमोपग्रहकारित्वेन च । यद्वा-निष्क्रियत्वैकद्रव्यत्वादिनाऽल्पवक्तव्यात् सूचिकटाहन्यायेनादौ निरदेशि । कीदृशास्ते ? इत्याहुः-' गतिस्थित्यवगाहलक्षणा एते ' इति । तथा च न एकस्मिन्नेव वाक्ये कथं समीपतरवाचिनैतदा निर्देश इत्याशङ्कनीयम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनेन चासाधारणता प्रत्येकस्य प्रादुष्कृता परमपूज्यैः । नह्यन्यो धर्मास्तिकायाद् गत्युपग्रहविधाता तथा स्थित्यवगाहयोरधर्माकाशाभ्यामपीति । त्रयाणामपि चैषामेकैकद्रव्यत्वमेक एव धर्मास्तिकायः । एवमधर्माकाशावपि । नन्वाख्यायि लोकालोकभेदेन द्विविधताऽऽकाशस्य, तत् किं विस्मृत्योच्यते–एक आकाशः ? इति । सत्यम्, द्विविध आख्याख्याकाशः, परं स्वभावभेदे न तद् द्वैविध्यं, किन्तु औपाधिकम् । उपाधिश्च धर्माधर्मासुभृत्पुद्गलसहचारासहचारलक्षणः । ननु कथमेकद्रव्यत्वं तेषामिति चेत् । समुदितपरिणामाद् । अत एव चैतेषां स्कन्धत्वमप्युच्यते क्वचित् । यत्तु स्कन्दति-शुष्यत्यपचयतः, दधाति च–पुष्यति स्वावयवोपचयत इति निरुक्तेः पुद्गलस्यैवानियतप्रदेशपरिमाणत्वात् स्कन्धता युक्ता, न तु धर्माधर्माकाशजीवानां, तेषां नियतप्रदेशपरिमाणत्वेन शोषपोषानुपपत्तेरित्याह खण्डनमात्रबद्धबुद्धिः । तत्तस्य तथास्वभावमाकर्ण्यापकर्णनीयमेव सद्भिः । स्कन्देर्गत्यर्थस्य दधातेर्धारणार्थस्यापि वाचकत्वात् । गत्यर्थानां च ज्ञानप्राप्तिव्याप्त्यर्थत्वं वैयाकरणसमयसिद्धत्वमेव । व्याप्नोति धारयति चेति स्कन्ध इत्यपि व्युत्पादयितुं शक्यत्वात् । स्कन्धताव्यपदेशश्चैकद्रव्यपरिणतिमत्तया एकद्रव्यत्वज्ञापनाय । कथमन्यथा असङ्ख्याऽसङ्ख्याऽनन्ताऽसङ्ख्यप्रदेशानां धर्माधर्माकाशासुभृतां स्यादसमुदितानामेकद्रव्यतेति । जीवाश्च यद्यप्यनन्ता एव, तथापि प्रतिजीवमसङ्ख्येयाः प्रदेशा इति प्रतिजीवमेकैकद्रव्यतेति नानन्तत्वेन विरुद्धता । पुद्गलानां न नियतं प्रदेशपरिमाणं, चयापचयभावादिति नैते इहाधिकृताः । वक्ष्यन्ति चानेकद्रव्यतया जीवान् पुद्गलांश्च पूज्याः स्वयमेव पुरतः । त्रिष्वप्येतेषु मङ्गलार्थतयाऽऽदौ धर्मास्तिकायस्य, तद्विपरीततयाऽनन्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रमधर्मास्तिकायस्य, उभयाधारत्वाच्च प्रान्ते आकाशस्योपन्यास इति केचित्। अन्ये तु धर्मास्तिकायस्य प्रशस्तविचाराद्युपबृंहकोपग्रहकारित्वेनादौ, विपर्ययात् प्राप्तस्थितिकारित्वरूपोपष्टम्भादधर्मस्य, तत आकाशस्य त्ववगाहनोपग्राहकत्वेन सामान्योपग्रहादन्त इति प्रोचुः।

अथ चतुर्थमस्तिकायं निरूपयन्त आहुः–' जीवा उवओगजुया ' इति। तत्राऽजीविषुर्जीवन्ति जीविष्यन्ति चेति जीवाः–असुमन्तः। विप्रतिपद्यन्ते केचिदेतत्प्रामाण्येऽपि। यद्यप्यस्त्यनात्मद्रुहां स्वानुभवसिद्धमहंप्रत्ययगोचरं तत, तन्निरासायोचुः–' उपयोगयुता ' इति। तत्र उपयुज्यते–सामान्यविशेषान्यतरप्राधान्येन अर्थोऽवबुद्ध्यते अनेनेत्युपयोगः ' व्यञ्जनान्ताद् ' इति पुंनाम्नि घञ्. ज्ञानदर्शनयुगलव्याप्यो धर्मविशेषः। तथा चोपयोगो ज्ञानदर्शने चेत्यप्रधात्मनिरूपणमपि सङ्गच्छते। एष एव च चेतनाशब्दवाच्यः, लक्षणं चैष एव जीवस्य, यदुदाहृतम्–' उपयोगो लक्षण 'मिति। तेन युताः–सङ्गता उपयोगयुताः। युक्तत्वं चोपयोगेन द्रव्यगुणयोः कथञ्चिद्भेदाभेदवादेनैव सङ्गतेः। यतो द्रव्यं न गुणः, न वा गुणो द्रव्यम्, न च पृथग्गुणाः, निर्गुणं वा द्रव्यम्। ततो भेदाभेद एव न्याय्यः। ननु च किमिति युक्तत्वपर्यन्तानुधावनमिति चेत्। परप्रत्यवबोधाय, नान्यस्मै। प्रतिबोधयन्ति चानेनैवमपरान्–यथा चेतना न प्रमाणविषयातीता। न च साऽन्यस्य, जीवानामेव तद्गुतत्वात्। तत उपयोगापराभिधानचेतनायाः प्रत्यक्षेण जीवोऽपि प्रत्यक्षसमधिगम्यतया स्वीकार्य इति। एवं चात्र जीवसिद्धिरुपयोगस्यानन्यसाधारणतया दर्शिता। तदर्थमेव चोपयोगमेव लक्षणतया स्वरूपान्तर्गतं दर्शितवन्तः पूज्याः। यथावल्लक्षणं तु तस्याविष्कृतमन्यत्रैवं—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा–' जीवो अणाइनिहणोऽमुत्तो परिणामी जाणओ कत्ता। मिच्छत्तादिकयस्स य णियकम्मफलस्स भोत्ता तु ' ॥१॥ न चैतत् केवलं वाङ्मात्रं न्यगादि, सपूर्वपक्षमुपन्यस्य पर्यनुयोगं सिद्धान्तितमेव। तद्यथा—

' जीवो उ णत्थि केई पच्चक्खं णोवलब्भति जम्हा। ण य पच्चक्खादण्णं पमाणमत्थित्ति मण्णंति ॥१॥ अणुमाणमप्पमाणं अणुमाणविरुद्धमादिदोसाओ । आगमपमुहेसुं पुण सव्वेवि ण संगया पायं ॥२॥ अत्रादिशब्देन इष्टविघातकविरुद्धव्यभिचारित्वसामान्यविशेषोभयान्यतमाविषयत्वादिग्रहः ।

ता कहमागमपमुहा होंति पमाणा नु णज्जती कह य। एयं एत्थ पमाणं न पमाणमिदं तु वत्तव्वं ॥३॥ ( एयंत पमाणमित्थ वत्तव्वं ति वा ) ॥३॥ जो पडिसेहेति सिया स एव जीवो ण जुत्तमेयं पि। नत्थि परलोगगामी भणिमो जं न उण एसो वि ॥४॥ अत्थि पडिसेहगो इह चेयणविसिट्ठकायमेत्तो उ। पू०–दाणादिफलाभावा सो अत्थि, उ०–ण संगतमिणंपि ॥४॥ पुट्ठो केणइ भोतो देवो नत्थित्ति कोइ सो आह। किं धम्मिओ गतो ता वाडीए अणेण जं तुज्झं ॥५॥ सिय जाईसरणाओ थणाहिलासाउ चेव अत्थित्ति। जाईसरणमसिद्धं भूयसहावाउ इतरंपि ॥६॥ चित्तो भूयसहावो एयाओ चेव लाभहरणाई। सिद्धत्ति नत्थि जीवो तम्हा परलोगगामी तु ॥७॥

आचार्यः–भण्णइ न जुत्तमेयं पच्चक्खं नोवलब्भइ जमुत्तं। जम्हा अवग्गहादी इंदि सम्संवेयणपसिद्धा ॥८॥ जं जायई सती मे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उप्पन्नमिहासि णीलविन्नाणं। इयमणणुभूयविसया जुज्जइ नाइप्पमंगाओ ॥९॥ ममाऽऽसीद् विज्ञानमित्यनेन बुद्धेः परोक्षता निरस्ता, स्वसंविदितत्वाभावापत्तेः। आत्माधिकरणोद्देशेन च बुद्धिरर्थज्ञाननिमित्ता इन्द्रियार्थलिङ्गा मनोलिङ्गा वा नेति व्यञ्जयाञ्चक्रुः, बुद्धिज्ञानयोरभेदादिन्द्रियार्थयोर्बुद्धिव्यभिचारित्वाद्युगपज्ज्ञानानुत्पत्तिलिङ्गत्वाच्च। निरस्तं च ज्ञानस्य ज्ञानान्तरवेद्यत्वम्, ईश्वरज्ञानस्याऽतथात्वात्, प्रभापतिप्रदीपयोरिव च समानस्वभावत्वेऽपि भवत्येव प्रकाश्यतातारतम्यम्। न चोत्तरकालज्ञानेन प्रागज्ञानस्य प्रतीतिः संवेद्यते।

धम्मा अवग्गहादी धम्मी एतेसि जो स जीवो उ। तप्पच्चक्खत्तणओ पच्चक्खो चेव सो अत्थि ॥१०॥ अहमितिप्रत्ययस्य भूतानालम्बनत्वाद् आत्मनः प्रत्यक्षता, अन्तर्मुखावभासकत्वाद् आत्मावलम्बनताऽहंप्रत्ययस्य। सदाऽहंप्रत्ययत आत्माग्रहणं च सकर्मत्वात् प्रत्यक्षीभूतेषु भूतेषु विप्रतिपत्तिसद्भावान्नात्मप्रत्यक्षस्य बाधो विप्रतिपत्तेः। न चाहं गौर इत्यादिव्यभिचार्यहंप्रत्ययसद्भावान्न गमको नायमिति, अन्येषामप्यध्यक्षाणामव्यवहर्तृत्वापत्तेः। व्यभिचारिता चास्य गुरु मे शरीरमिति भेदवत् प्रत्यक्षात्।

पू०—भूतेहिं चेयण्णं कायागारादि परिणएहिंतो। तब्भावे भावाओ मज्जंगेहिं व मयसत्ती ॥११॥ सति तंमि ससंवेयणरूवे किन्नोववज्जती एत्थ। धम्मीवि भूयसमुदयमित्तो जं तो कहं अत्थि ॥१२॥

आ०—जइ ताव मतं धम्मो चेयण्णं कह ण अत्थि तो आया। अन्नेणऽणुरूवेणं इमस्स जं धम्मिणा कज्जं ॥१३॥ कार्यत्वमिति ज्ञेयमत्र, भावप्रधाननिर्देशात्। युक्तमिति त्वध्याहार्यम्।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बोहसहावममुत्तं विसयपरिच्छेयगं च चेयण्णं । विवरीयमहावाणि य भूयाणि जगप्पसिद्धाणि ।।१४।। ता धम्मधम्मिभावो कहमेतेसिं तहब्भुवगमे य । अणुरूवत्ताभावे काठिण्णजलाण किं न भवे ? ।।१५।। तम्हा ण भूयधम्मो चेयण्णं णो य तस्समुदयस्स । पत्तेयमभावाओ आया परलोयगामि व्व ।।१६।। ता वंजिज्जइ तेहिं कह तेणं वा तयंति चिंतमिणं । धम्मंतरवित्तीए तु सिद्धं जीवस्स अत्थित्तं ।।१७।। तद्धम्मत्ते वि सयाऽविसेसभावेण कह णु अभिवत्ती । ण हि काठिण्णादीया केसिंचि कयाइ वज्जंति ।।१८।। व्यज्यन्ते— अभिव्यक्तीक्रियन्ते ।

ण य तस्स तहा गमणं दिट्ठेसुवि संसओ य केसिंचि । णीलादितुल्लता वि हु पत्तेयमदिट्ठिओऽजुत्ता ।।१९।। तथा गमनं-निश्चय इति । दृष्टेषु भूतेषु संशयश्च यतः ।

तब्भावम्मि वि कह भिण्णवत्थुधम्मत्तणेण एगत्तं । चेयन्नस्सियरेसिं एगत्ते कह व णाणत्तं ।।२०।। एकत्वमहमिति । नानात्वं भूतानां पृथ्वीत्वादिनेति ।

भिन्नाभिप्पायाण य देहंमि तहा कहं अवत्थाणं । सयलिंदिओवलंभो तओ सती तेसु सो णु कहं ।।२१।। भिन्नभिन्नचैतन्यानां भूतानामिति पृथक्त्वेऽपि संहतौ पञ्चविषयसङ्कलनात्मिका स्मृतिरेककर्तृका चेति नैतद्युग्मं स्याद् भौतिकदर्शने ।

नहि भिन्ने चेयण्णे आसन्नाण वि मिहो विभिन्नाणं । भावेसु नाणमेगं लोगम्मि सती य तप्पभवा ।।२२।। गर्भस्थज्ञानास्मृतिश्च मातुः प्रमाणसिद्धेत्युदाहार्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिय संधारणं व तयं समुदयधम्मो ण तंपि पत्तेयं । एगंतेणासंतं तदण्णभावप्पसंगाओ ॥२२॥ नापि च अण्वादौ असत् स्थौल्यं परमाणूनामेव संयोगवशेन तथाभावात् । सर्वथोत्पत्तौ चासतः पञ्चमभूतमप्युत्पद्येतेति प्रसङ्गः ।

जइ संतं उवलद्धी किं नो पुव्वंपि ओघओ अत्थि । ण य एवं उवलब्भइ पत्तेयं तेसु चेयण्णं ॥२३॥ सामान्येन धातकीपुष्पोदकादिषु भ्रमिजननतृष्णाशान्तिप्रभृतिरस्त्येवेति भूतेषु च तेषु न प्रत्येकं चैतन्यवत्त्वमिति ।

अह तस्सेस सहावो समुदयधम्मा तदा य होइत्ति । पत्तेयं च असंते न जीवभावो त्ति वामोहो ॥२४॥ तस्य—चैतन्यस्येति । तदैव—समुदितपरिणामे एवेति । प्रत्येकं भूतेष्वसत्त्वे चैतन्यस्येति । व्यामुग्धता चास्मत उत्पादाङ्गीकारात् कूटस्वभावकल्पनात् प्रत्यक्षेतर-प्रमेयस्वीकाराच्चेति ।

अह धम्मी तत्तंतरसिद्धी अब्भुवगम्मि य पदोसो । धम्मिमि-त्तेण तु भेया ण भूएहिं तदुप्पत्ती ॥२५॥ चैतन्यं धर्मीति, कायाकारपरिणामोऽपि च भूतानां सर्वत्र भावात् तेषामतिरिक्ताभावात् सर्वदा सत्त्वासत्त्वापत्तेश्च न भूतमात्रभवो वस्त्वन्तरसमुत्थो निर्हेतुकोऽभ्युपगन्तुं युक्त इति ।

जं कारणाणुरूवं कज्जं भूयाणमणणुरूवं च । चेयण्णं भणियमिणं सिय संगसरेहिं वभिचारो ॥२६॥ स्यादित्यादि । कारणानुरूपकार्योत्पादनियमे व्यभिचारं शङ्कते । विजातीयकार्योत्पादश्च शृङ्गाच्छरस्य, सूक्ष्माप्रदेशपरमाणुभ्यो घटस्य, द्रव्यात् पर्यायस्य चोत्पत्तेः न कथञ्चनाप्यसिद्ध इति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आ०—संगंपि भूयसमुदयरूवं हंदि उ सरोवि तह चेव। इय अणुरूवत्तं चिय भेदे तत्तंतरावत्ती ॥२७॥ कारणकार्ययोर्भेदे–वैलक्षण्ये सर्वथाघटादीनां तत्त्वान्तरतयाऽभ्युपगमापत्तिः।

सिय वइचित्तं दिट्ठं सहावभेएण भूयकज्जाणं। चेयण्णस्स वि एवं तक्कज्जत्तंमि किमजुत्तं ॥२८॥ शैत्यदाहकत्वादीनां घटपटादीनां वेति। एवं विलक्षणकार्योत्पादाविरोधे इति।

जमखिलतक्कज्जाणं विलक्खणं सव्वहा अमुत्तादि। तस्साहव्वंमि किमिह कोसपाणं विणा माणं ॥२९॥ विलक्षणतासद्भावेऽपि नामूर्त्तं मूर्त्तान्मूर्त्तेभ्यो वा 'नामूर्त्तो मूर्त्ततां याति मूर्त्तस्यामूर्त्तता न च' इत्यादिवचनात्। चैतन्यं त्वेवंविधमेवेति। अप्रीत्यादेरपि चैतन्यविकारोपलब्धेर्न ज्वरादेस्तद्धेतुता, अन्यथा शोकादेर्देहविकारोपलब्धेः कायस्य चैतन्यकार्यताप्यनिवारितप्रसरैव स्यात्। असत्कार्योत्पादश्च नैवाणुष्वपि स्वस्पर्शनाद्यपेक्षया सावयवत्वात् मूर्त्तत्वादिसम्भवाच्च युक्तियुक्तः। पर्याया अपि च न सर्वथा द्रव्यविलक्षणा न वा सर्वथाऽसतः, पूर्वपर्यायपरावृत्त्यैव तदुत्पादात् अदलस्य पर्यायस्यैवाभावात्। तत एवोच्यते–'दव्वं पज्जवविजुयं दव्वविजुत्ता य पज्जवा णत्थि'त्ति।

तब्भावंमि य भावो न परासुरचेयणो जओ काओ। दीसइ न तत्थ वाऊ सति सुसिरे सो कह न होज्जा ॥३०॥ कायाकारप्राणापानादिसद्भावे चैतन्यभाव इति।

ण य तं कएवि दीसइ (पू०) पाणापाणूणभावओ णो चे। आ०—णो जीवाभावाओ किमेत्थ माणंति वत्तव्वं ॥३१॥ प्राणापानाद्या अपि कायाकारकृता एवात्मनोभिन्नस्य कर्तुरनङ्गीकारात्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पू०–तेयाभावातो ण तं (आ०–) उवणीते तंमि पावती भावो। पू०–अह सो विसिट्ठगो च्चिय (आ०–) वइसिट्ठं किंकयं तस्स ॥३२॥ पू०–अह नु सहावकयं चिय (आ०–) ण पमाणमिहाविसाहगं किंचि। अप्पतरं दीसिज्जा तदभावे सेसभावाओ ॥३३॥ सर्वेषां चेतनोत्पादकत्वाभ्युपगमादेवमुपालम्भः। तत्त्वतस्तु कोष्णगोमयादिज्वलनसंसर्गेऽप्यनुपलम्भादात्मकृतमेव वैशिष्ट्यमापाद्यते।

तह पुढवादिसमुदया किं कुशलकया ण होइ चेयण्णं। सव्वत्थ अविसेसेणं जत्तेण वि कीरमाणं तु ॥३४॥ कुशलेति भूतपरिमाणोपादानत्वज्ञापनाय। सर्वत्रेति देशकालविशेषहेतुत्वोच्छेदाय। अविशेषेणेति तु संस्थानादिसादृश्याय। यत्नेनेति चेतरविघ्ननिरासायोदाजहुः पूज्याः।

पू०–णत्थित्थी–कुच्छिसमं तस्समुदायस्स ठाणमग्गंति। आ०–एवुब्भियपमुहाणं पावइ णणु चेयणाभावो ॥३५॥ पू०–अह तव्विहपरिणामो णत्थि (आ०–) ण जीवोत्ति निच्छओ केण। पू०–चेयण्णाभावेणं (आ०–) जीवाभावेवि सो तुल्लो ॥३६॥ मदशक्तेरनियततावच्चेतनानुत्पादमाशङ्क्योचुः—

ण य इह मज्जंगाणं न होइ अविसेसओ उ मयसत्ति। जं कुसलनिउत्ताणं नायाणुगयं न तेणेदं ॥३७॥ द्वौ नञौ प्रकृतिं गमयत इति न न चेति। मूर्खकृतौ न स्यात्तथात्वमिति कुशलेति। इदमित्यारेकणम्। अन्वयव्याप्तिं व्यभिचार्य व्यतिरेकं तथाकर्तुमाहुः—

तदभावम्मि य भावो सिद्धो मोत्तेसु मोक्खवाईणं। आगमपामण्णाओ जह तह उवरिं फुडं वोच्छं ॥३८॥ मुक्तिनिरूपणावसरे वक्ष्यमाणत्वादुपरीति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पू०–सव्वेसिँ तओऽसिद्धो अतो असिद्धोत्ति (आ०)–तुहमेयं । भूएहिं चेयण्णं जायइ विबुहाण जमसिद्धं ॥३९॥ ण य मज्जंगेहिं इह मदसत्ती जुज्जई विणा जीवं । तम्हा पइण्ण-हेऊदिट्ठंता तिण्णवि अजुत्ता ॥४०॥ किं चेयं मदसत्ती किं मज्जे पाणगे तदाधारे । मज्जेज्ज सयं मज्जं जइ तम्मि उट्टिगाधारे ॥४१॥ उष्ट्रिका मादेतेति शेषः ।

जीवस्स उ मयसत्ती पाणगपक्खंमि मज्जसंजोगे । जायइ मज्जंगेहिंतो णायमसंगतं तेण ॥४२॥ पू०–उक्खिवणपेरणादी सत्ति जह एत्थ देवदत्तस्स । कुंभादुक्खिवणगया दीसइ तह मज्जसत्ती वि ॥४३॥ यथोत्क्षेपणादि पुरुषगतं तत्राविवादसिद्धं तथाऽत्र पानकगता हि मदशक्तिः ।

आ०–एवंपि भूयसमुदयवइरित्तगता उ चेयणा कज्जं । साहेइ य वइरित्तो जो सो जीवोत्ति पावेइ ॥४४॥ मदशक्तेरन्यत्र कार्यकरणात् भूतानामपि व्यतिरिक्त एव चेतनोत्पादकतेति ।

पू०–णो मज्जसत्ति मज्जंग–हेतुसमुदायभिन्नवत्थुगता । साहेइ इह नियकज्जं ण पाणगो जं तओ अण्णो ॥४५॥ एवं पि सासयाभिण्णवत्थुपगता नु चेयणाकज्जं । कुञ्जाधारादौ सति कुणतित्ति न मज्जसत्तेवं ॥४६॥ पू०–सा खलु बिसिट्ठपाणगसंबंधगया उ चेयणा णेवं । कुणइ सहावाउ मई (आ०) ण जीवभावा उ का जुत्ती ॥४७॥ पू०–अह उ सभावो जुत्ती (आ०) ण स एव विवायगोयरापन्नो । अन्नत्थ संकमंमि य पतीतिबाधा ण य पमाणं ॥४८॥ मद्यात् पानके मदशक्तेरुत्क्षेपणादेश्च कुम्भादौ न सङ्क्रमो युक्तः । आद्ये जीवस्य मादनात् चरमे घटे तथाशक्त्युत्पत्तेर्न सङ्क्रमः कथञ्चनापि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तम्हा मज्जंगेहिं जायइ मज्जं तओ य जीवस्स । मदसत्ती-परिणामो दहिसंजोगे व्व निद्दादि ॥४९॥ एवं न भूयधम्मो ण य कज्जं चेयणत्ति सिद्धमिदं । जस्सेयं सो आया पसाहगं चेत्थ माण-मिदं ॥५०॥ जीवंतदेवदत्तस्सरीरमिच्चाइ चेयणासुन्नं । भूतफलत्ता घड इव न य तंमि तयं अणभिवत्तं ॥५१॥ जीवद्देवदत्तशरीरं श्वासादिमत्त्वात् चेतनावत्त्वाद्वा, व्यतिरेके घटाद्या भूतफला ह्येते, न च तेषु तत् भूतानां काठिन्याद्यनुगमो न श्वासचेतनादेः । व्यञ्ज-कत्वप्रतिज्ञानाच्चतुष्टयं च भूतानां यतः, तन्नानभिव्यक्तततापि तस्य विशिष्टपरिणामाभावस्य भावत्वापत्तिः, आवारकत्वे कुड्यादिवत् स्याद् परिणामभेदाभेदाभ्युपगमानर्हत्वात् कालस्य चानङ्गीकारान्न परिणामाङ्गीकृतिर्युक्ता तत्र प्रसिद्ध्या त्वात्मापि तथा । तत्त्वतस्तु संस्थानादिः पूर्वोक्त एव वादोऽवतारणीयः । विशेषस्त्वेष यत् पूर्वम-भूत् यः स केनापोहितः इति ।

पच्छावि अणुवलंभा (पू०) देहावत्थाए अह उ उवलंभो । आ०—तेहिंतो सोऽसिद्धो (पू०) कह (आ०) भणियमिणं पबंधेणं ॥५२॥ अनुत्पन्नवादिनः प्रत्याहुः—

( पू० ) कायागारादिविसिट्ठपरिणतीविरहतो ण तं ( आ० ) तन्नो । णायविरहाउऽमाणं (पू०) किमेत्थ माणेण तयभावो ॥५३॥ न्यायश्चात्र प्रमाणप्रतिपादिका युक्तिः । चेतनाभावः प्रत्यक्षः, न च प्रत्यक्षेऽन्यप्रमाणान्वेषणेति तदभाव इत्युक्तम् ।

सो सज्झो न उ सिद्धो भणियमिणं तह उवरिमो वोच्छं । पू०—पडिभणियं (आ०) जं भणियं पवक्खमाणे भणिस्सामो ॥५४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स कायाकारादिपरिणत्यभावकृतचैतन्यभावः। भणितं 'अह तव्विह-परिणामो' इत्यादिना, उपरि च 'संतंपि किं न साहई'त्यादिना, प्रतिभणितं 'भूयस्सेस सहावो' इत्यादिना, प्रवक्ष्यमाणे 'भूयाणं अविसेसे' इत्यादाविति।

भूयाणमविसेसे अण्णंमि य चेयणे असंतंमि। तक्कज्जे चेयण्णं विसमगईए कहं जुत्तं ॥५५॥ अन्ये भूतव्यतिरिक्ते चेतने चेतना-वति जीवेऽसति।

पू०-जह संठाणविसेसो (आ०) ओहेणं कारणाण तं अत्थि। तो जुत्तो तब्भेओ ण य चेयण्णं कहंचिदवि ॥५६॥ घटादौ संस्थान-विशेषो यथासन्नुत्पद्यते, तथेदमिति-'तत्' संस्थानमिति। तद्भेदः-संस्थानविशेषः।

भूयफलत्तं चेयण्णं सुण्णया नेति एत्थ किं माणं। णो पच्चक्खं जम्हा सदत्थविसयं तयं सिद्धं ॥५७॥ अणुमाणं पि न जुत्तं विसिट्ठ-लिंगादिविरहतो लोए। चे आगारोत्ति तयं ण कारणं कज्जवं नियमा ॥५८॥ विशिष्टता च लिङ्गस्यान्यथानुपपत्तिमत्त्वेन। आदिशब्दश्च पक्षाभासाभावादिग्रहायेति। 'तयं'ति अनुमानम्। अनुमीयते अनेने-त्यनुमानमिति 'करणाधारे' इत्यनेनानटि व्युत्पादने पर्यवस्यति हेतु-रित्येवार्थः। कारणं न नियमात् कार्यवदिति कारणोपलब्धेः कार्यानु-मानं च यथाकथञ्चिन्न, किन्तु विशिष्टादेव तस्मात्। अत एव 'रोल-म्ब-गवल-व्याल' इत्यादि तथाविधवारिवाहविलोकनादित्यादि च सविशेषणं पठ्यते कारणोपलब्धिदर्शकं वाक्यमिति। आकारश्चाभि-मतं ते न कारणम्। यदि चाकारलक्षणं कारणं चैतन्यलक्षणकार्यव-देव तदाहुः मृतशरीरं तदाकारमुद्दिश्य—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संतंपि किं ण साहइ (पू०) विगलत्ताओत्ति (आ०) किं कयं तमिह । (पू०) पाणापाणाभावा (आ०) ण जीवऽभावेण को हेऊ ॥५९॥ विकलत्वादिति कारणान्तरहीनत्वात । प्राणापानाभावस्य सकारणाकारणत्वप्रतिपादनस्याशक्यत्वात् । तयोः तत्त्वान्तरापत्तेः ।

तम्मत्ताऽसिद्धीए परिणामादीणमब्भुवगमे य । जीवंमि को पदेसो जेण मुहा खिज्जसे मइमं ! ॥६०॥ तन्मात्रता च भूतमात्रता । मतिमन्निति सम्बुद्धिश्च । 'निउणेहि महुरेहिं 'त्युपदेशविध्यनुरोधाद् 'अबोधेऽप्यनिन्दा' इति स्वोपदेशानुसरणाद् भावदयापरिगतत्वाच्च । 'खिज्जसे' इति कदाग्रहो हि कारणं खेदस्येति, तन्निराकरण भावदयैव । तत्त्वतस्तु कदाग्रहमतिमत्त्वयोः परस्परानवस्थानविरोधग्रस्तत्वात शीतोष्णयोरिव भवेदेकतरमेवेत्यभीष्टं मतिमत्त्वमादर्त्तव्यं त्याज्यश्चान्य इति व्याकरणं व्याचक्रुः ।

पू०—कह णु मुहा तब्भावो ण पमाणबलेन ठाविओ जम्हा । आ०—जस्सेवं सो आया (पू०) परिसेसो वेस जमजुत्तो ॥६१॥ प्रमाणासिद्धेऽगृह्यमाणे न कदाग्रहिता, न च तथासति मुधात्वं खेदस्येति 'कह णु' इत्यादि । अयुक्तत्वं पारिशेष्यस्याक्षेप्याहुः ।

ण हि अपसिद्धे धम्मिणि परिसेसो नायविरहओ एत्थ । ण चउव्विह णइपूरे अपसिद्धे तग्गएसु च ॥६२॥ धम्मेसु दुतभरणच्छसिसिर—कलुसोदगाइएसुंत्ति । कलुसोदगत्तणेण जुत्तमयं वुट्ठिजणोत्ति ॥६३॥ किंतु पसिद्धेसु च्चिय न एस विधिरत्थि आयमाणम्मि । तन्नो पमाणबलओ तस्सिद्धी (आ०) एस वामोहो ॥६४॥ न्यायोऽत्र व्यवहारः प्रामाणिकपक्षप्रतिपत्तिर्वा । चातुर्विध्यं च समुद्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेलावृद्धि-हिमविलय-वृष्टि-प्रवाहनिरोधेभ्यो भावात् पूरस्येति तद्गतेष्विति सामुद्रादिकेषु। द्रुतं—भावप्रधाननिर्देशाद् द्रुतता—वेगवत्तेति। भरणमेकत्रीभावो रोधेन, अच्छशिशिरतोदकस्य हिमविलयेन, वृष्ट्या च कलुषोदकतेति। यथा द्रुतत्वादीनां सामुद्रादीनां सिद्धौ तत्र तत्र तेन तेन तस्य तस्य साधनं न त्वेवमत्र इत्युक्त नेष विधिरात्मनि। वचनस्यैतस्य व्यामोहता च व्यामोहजन्यत्वात् कार्ये कारणोपचारात्।

जम्हा ण तस्स धम्मो चेयण्णं एतस्साहणे जइमो। किंतु अणुहवसिद्धमिदं धम्माइ य जं ततो णियमा ॥६५॥ तस्य भूतसमुदायस्य उपलक्षणं च धर्म इति फलमित्यस्य। आदिशब्दात् कार्यं च यतश्चैतन्यं तत इति।

अणुरूवेणं कज्जं इमस्स धम्मादिण त्ति सो य बला। भूतादत्थंतरमो तो आया तस्स भावो वा ॥६६॥ अनुरूपेण कारणेनेति शेषः। कार्यमिति नियमः। अस्य भूतसमुदायस्य न चैतन्यं धर्मादि। चकारो विशेषणार्थः। स चात्मनः सिद्धिं भूतार्थान्तरतया विशेषयति। नोत्पन्नः तस्मादिति तत्त्वम्। बलादिति अप्रतिहतान्यथानुपपत्तिमतो हेतोः। तस्य चैतन्यस्या भावे न चैतन्यक्यं गदितुं प्रतिप्राण्यनुभवसिद्धत्वात्तस्येति।

पू०—कोऽयमणुरूवगाहो अणुमादीहिं जओ घडादीणं। दिट्ठो भावोऽह (आ०) मती. तओ वि अणुरूव एवत्ति ॥६७॥ सोऽपि परमाण्वादिभ्यो घटादिभावोऽपि।

मुत्तत्तादि अणुगमा अणुरूवावगमओ य। पू०—इयरोवि अणुगमवावित्तीहि य सति सत्ते तम्मि किमजुत्तं ॥६८॥ अणुत्वाद्यनु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गमाभावादनुरूपत्वापगम इति । 'इतरोऽपि' भूतचैतन्यकार्यकारणभावोऽपि, चैतन्येऽपि सत्त्वमस्त्येवानुवृत्तिमत् रूपवत्त्वादिव्यावृत्तिश्चेति ।

आ०-सव्वेसिं सामन्नं जं सत्तं ता ण णियमहेउत्ति । घड-पड रहमाईणं मुत्तत्तादि व्व लोगम्मि ॥६९॥ नियमहेतुः-नियामकं चैतन्यभूतादेः कार्यकारणभावस्येति ।

पुढवीतत्ताणुगमो घडमाईणमिह नियमणे हेऊ । इय अणुरूवाणुगमे चेयण्णस्सापसिद्धी उ ॥७०॥ कारणानुरूपमेव कार्यमित्यनुरूपनियमात् ।

पू०-पाणापाणनिमित्तं सिय तं (आ०) णो तस्स वुत्तभावाओ । तव्वुड्ढीए खयाउ विवज्जयाओ य मरणंमि ॥७१॥ तस्य-प्राणापानस्य, मूर्तभावात्-उष्णस्पर्शादिमत्त्वेन मूर्त्तत्वात् । तद्वृद्धौ-श्वासवृद्धौ क्षयाच्चैतन्यहानेः, न चैतदुपादानकारणतां न विनाशयति तस्य । मरणसमये चातिवृद्धेः । वादिमते तु स्यादभावः तस्य चैतन्यविनाशकालपूर्वकालत्वादिति । अथ यदुक्तं-'सिद्धत्ति नत्थि जीवो तम्हा परलोगगामीउ'त्ति । तत्र पारिशेष्यात् साधिते शङ्काशेषमपाकर्तुमाहुः तस्मिन्——

ण य पुढवादिसहावो कज्जं वा संति अभावतो संति । अच्चंताणुवलद्धी कह मासंतुमरणसंमि ॥७२॥ पृथिव्यादिस्वभावता न तन्त्वादीनामिव पटादीनां कार्यता न वृक्षादीनां फलादीनामिव । अत्यन्तानुपलब्धिः-सर्वथा नाशो निरन्वयनाश इति यावत् । सत्यपि 'नासतो विद्यते भावो नाभावो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विद्यते सत' इत्यबाधिते नियमे स्वतस्तदनङ्गीकारात्तदङ्गीकारयितुमेवमाहुः। अबाधितव्यवहारस्याभ्युपगमात् न नाभ्युपगतमनुमानं तेन, यतः प्रमाणद्विकप्रसङ्गो युक्तः स्यात् तं प्रतीति। स्वस्मिन्नहंप्रत्ययगम्यत्वेन प्रत्यक्षं, परेषां त्वनुमेयं सत्त्वमिति। अथ यत् प्रागुक्तं– 'मदशक्तिरिव' तत्रापि माद्यत्यात्मैवाऽन्यो नेत्यभिप्रायेणाहुः—

णहि मदुणो मदसत्ती भणितमिणं हेउफलविभागे य। जं नियमणंति तम्हा वभिचारो वयणमेत्तं तु ॥७३॥ यद्वा–असत उत्पादो मद्याङ्गेभ्यो मदशक्तेरिवेति न चैतन्येन तद्वत आत्मनः सिद्धिरिति व्यभिचारयति परस्मिन् हेतुं प्रोक्तमिदं–'णही'त्यादि। ततश्च कारणकार्यविभागविषयकनियमहेतुप्रतिपादनाद् जीवस्यैव मत्तत्वं, न चासती मदशक्तिरिति व्यभिचारापादनं वचनमात्रमेव। अथ यद्यपि विशेषविरुद्धत्वं नानुमानबाधकम्, धूमसामान्येन वह्निमात्रसिद्धावपि देशादिभेदेन विशेषसिद्धेरप्रत्यूहत्वात् धूमविशेषेण वह्निविशेषसिद्धेरनुमतत्वात् तथाप्यभ्युपगन्तुमाख्याय तदभावमाहुः—

ण विसेसविरुद्धो वि य अप्पडिबंधाउ बाहणाउ य। मुत्तत्तादीण तहा संसारिणि अब्भुवगमा य ॥७४॥ अपि चेत्यनैकान्तिकाद्यभावसङ्ग्रहाय। नहि मूर्तत्वकार्यत्वयोरस्ति व्याप्यव्यापकभावनियमः। चकारः कारणान्तरद्योतकः। बाधाच्चेति बाह्येन्द्रियगम्यस्पर्शादिगुणाभावश्च स्पष्ट एवात्मनि। अस्तु कार्यत्वेन मूर्तनिमित्तोद्भवत्वं चैतन्यस्यापाद्यमानमप्यनयेनापि अस्माकं तत्राप्यक्षतेरित्युक्तं 'मुत्तत्तादी'ति। सिद्धानां क्षायिकज्ञानवत्त्वेन नानित्यं चैतन्यं यत् स्यात् कार्यभूतमागमविरोधपरिहारायैतत्। अभ्युपगमसिद्धान्तश्चायमिति। चैतन्यस्यानुरूपधर्मिप्रभवत्वं शङ्कते—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अह अणुरूवो धम्मी सुयचेयण्णस्स माइबुद्धी उ। आ०–णो तव्वइरेगेणं तस्स सुते पावइ अभावो ॥७५॥ धर्मा हि धर्म्यनुगताः स्युरिति तद्व्यतिरेकेण मात्रभावेनेति।

किञ्च–ण हि धम्मंतरवित्ती दिट्ठा धम्माणमेत्थ लोगम्मि। तद्भावपसंगाओ न धम्मरहिओ जओ धम्मी ॥७६॥ धर्माणामन्यत्र वृत्तौ स्पष्ट एव धर्मिणां धर्मित्वाभावप्रसङ्गात्, धर्मानृते धर्मित्वस्यैवाभावात्। अथ भविष्यति सुतचैतन्यं मातृचैतन्यस्य कार्यमिति चेदाहुः—

ण य तक्कज्जं पि इमं तत्सक्काराणुवित्तभावाओ। तब्भावम्मिवि कज्जे सति न य हेतू वि तदवत्थो ॥७७॥ पू०–दीवा दीवुप्पत्ती ण य उभयं तत्थऽदिट्ठमह बुद्धी। आ०–जुत्तमिदमुवादाणं नहि दीवो अन्नदीवस्स ॥७८॥ ण य माईचेयण्णं अणुवादाणं तयब्भुवगमे य। जदुवादाणं एयं तत्तो परलोगसिद्धीति ॥७९॥ मकारोऽलाक्षणिकः। तथाचादिचैतन्यमिति केचित्। केचित्तु यथाश्रवणमेव यथा मातृचैतन्यं सुतचैतन्यकारणमभ्युपगम्यतेऽप्रमाणमपीति सूचनाय चकारः, परं तस्यापि तदन्वेषणेऽन्यदुपादानकारणमन्वेष्य ग्राह्यमेवादिचैतन्यस्याभ्युपगते चागतोऽन्यस्मात्तद्धानिति। ततः परलोकसिद्धिरिति।

किञ्च–संमुच्छिमसब्भावा मयदेहेणेगसंभवाऊ य। अन्नत्थनिमित्तत्ते न पमाणं लोगबाहा य ॥८०॥ अनेकानां क्रुम्यादीनां सम्भवात्। अन्यत्रात्मनः कारणत्वेऽभ्युपगम्यमाने कलेवरेऽभ्युपगम्यमाने च चैतन्यांशे लोकबाधेति। अथाभावे तस्य निषेधकाभावात् स्वयंसिद्धतामाहुरात्मनः।

किंच पडिसेहगं पमाणमेयस्स (पू०) अह उ पच्चक्खं। आ०–लोगम्मि विज्जमाणत्थगाहगत्तेण तं सिद्धं ॥८१॥ पू०–तस्सेव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णिवित्तीए अह गम्मइ एत्थ वत्थुभावोवि । आ०-सा तं चिय तुच्छा वा (पू०) हवेज्ज जइ तं चिय (आ०) विरोहो ॥८२॥ तस्यैव–प्रत्यक्षस्यैव, एवकारेण परोक्षाभावं ज्ञापयति । वस्तुभावोपि वस्त्वभावोऽपि ज्ञायते भावश्चेत्यपिना सूचयति । विरुद्धता च प्रत्यक्ष-निवृत्तेः प्रत्यक्षत्व उच्यमाने स्पष्टैव ।

(पू०) अह उ तदंतरमेसा (आ०) णो तव्विसएण तस्स संबंधो। सिद्धो कहं ततो णणु तदभावविणिच्छओ एत्थ ॥८३॥ तदन्तरं–प्रत्यक्षान्तरं, यथा केवलभूतलविषयं प्रत्यक्षं घटाभावस्येष्टमावेदकम् । 'तद्विषयेण' इतरप्रत्यक्षज्ञेयेन 'तस्य' आत्मनः घटादेर्भूतलेनेव सम्बन्धः कश्चनापि संयोगादेरिवेति ।

अह तुच्छा तीए कहं तदवगमो सव्वहा असत्ताओ । सिद्धो यऽविणाभावो तेण समं तीइ किं भवतो ॥८४॥ प्रमाणान्तराभ्युपगम-प्रसङ्गेन तुच्छत्वमभिप्रेतं निवृत्तेः तस्याश्चाभाव आत्मनः, तथा च परचैतन्यस्याप्यदर्शनमस्त्येव । न च चेष्टा चैतन्याव्यभिचारिणी, विशिष्टायाश्च तथात्वेऽनुमानप्रामाण्यापत्तिरप्रतिहतैव । न च निवृत्ते-रविनाभाव आत्मना सह सिद्धो भवतः, आत्मन एवानभ्युपगमात् ।

तदभावे णावगमो तब्भावे कह ण होति अणुमाणं । तब्भाव-म्मि अजुत्तं अणुमाणं अप्पमाणं ति ॥८५॥ प्रतिबन्धाभावे नावगम आत्माभावस्येति गम्यम् । तद्भावे प्रतिबन्धस्यानुमानमेव तत्, अविनाभाविलिङ्गात् साध्यप्रतिपत्तिलक्षणत्वात्तस्य प्रत्यक्षतत्प्रति-भासयोः प्रामाण्याप्रामाण्यनिर्णयः शास्त्रप्रणयनं च परावबोधाय न युज्यते विनानुमानप्रामाण्यमिति । अनुमानप्रामाण्य आपादिते आह–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अह अणुमाणविरुद्धादि दोससब्भावओऽपमाणं तं । आ०—
णो वत्थुबलपवत्ते ते दोसा दंसियमिदं तु ॥८६॥ आदिशब्दाद् इष्ट-
विघातकविरुद्धव्यभिचारित्वाद्याः अग्निमति पर्वते अन्यपर्वतदृष्टा-
न्तपर्वतहेतुना तदभावे साध्ये विरुद्धताऽनुमानेन सत्प्रतिपक्षतेत्यर्थः ।
निर्वृक्षप्रदेशाग्निना इष्टविघातकता तद्वत्त्वेऽन्नत्येन वह्निना च
तथात्वे विरुद्धता स्थानविशिष्टे व्यभिचारितेत्येवमाद्याः । वस्तुबल-
प्रवृत्ते व्याप्तियाथार्थ्यनिश्चयजातेऽनुमाने इत्यर्थः । दोषवतामनु-
मानाभासत्वनिर्णयात् प्रकृतात्मसाधकानुमानस्य च निर्दोषत्वं साधि-
तमेव प्राग् । आदीपमाव्योम च नित्यानित्यं सामान्यविशेषोभया-
त्मकं च सर्वं वस्तु इति नोक्तदोषः । व्याप्तिकाले वह्निसामान्येन
व्याप्तिग्रहणेऽपि प्रयोगकाले विशिष्टत्वसाधनात् न निर्विषयतापि ।
साध्यानिर्देशश्चानेकसाध्यव्याप्तत्वात् साध्यविशेषनियमायेति ।

पू०—अह अणुमाणेणं चिय पडिसेहो (आ०) णो तयं तुह
पमाणं। अप्पमाणंमि य तंमि का अत्था णायवाईणं ॥८७॥ अनुमानं
च चैतन्यं भूतधर्मः कायाकारादिपरिणतभूतान्वयव्यतिरेकानुविधानात्
घटादिसंस्थानवदित्यादि पूर्वप्रदर्शितं तद्वदन्यद्वा ग्राह्यम् । नह्यप्रमाणी-
कृत्य स्वयं स्वेष्टसाधनायोपन्यस्यमाने भवत्यास्था तद्वचसि न्याय-
वादिनाम् ।

पू० अह परसिद्धेणं चिय परपडिवत्तीए णत्थि दोसो त्ति ।
परवग्गेण वि दिट्ठो विणिवादो किं ण लोगम्मि ॥८८॥ आत्मा-
स्तित्वाङ्गीकर्तृभिरभिमतत्वाद् अनुमानादीनां प्रामाण्यस्य परसिद्धे-
नेति । ततोऽपि न स्वनिश्चयो युक्त इति परप्रतिपत्ताविति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आ०—विणिवायकरणसत्ती सब्भावे जुज्जई तओ णियमा ।
इय पडिवत्तिनिमित्तं च होइ कहमप्पमाणं तं ॥८९॥ यद्यपि लभ्यते जयोऽङ्गीकर्तॄणामनुमानप्रामाण्यं न भवेदेवं, परं वस्तुप्रतिष्ठा तु नैवैतावता सिद्धयति । सा तु सत्यामेव शक्तौ तस्य यथार्थप्रमातृत्वलक्षणायां, न चाभ्युपगता त्वया सेत्युक्तं–' विनिवाये 'त्यादि । अन्यच्च–अप्रमाणभूतमनुमानं चेत् कथं ततो भवित्री यथार्थार्थप्रतिपत्तिः, न च युक्तमनृतं प्रज्ञापयितुमर्हाध्वपान्थानाम् । सति चानुमानस्य प्रतिपत्तिसामर्थ्ये कथमप्रामाण्यं तस्य, प्रतिपत्तिनिमित्तस्यैव प्रमाणत्वव्यवहारात् । आत्मनिषेधमनुमायैवानुमानेन प्रतिपादयेन् परमिति प्रतिपत्तिनिमित्तमनुमानम् । तत्त्वतस्तु प्रत्यक्षेणासिद्धे चेतनाया भूतस्वभावत्वे तस्या भूतधर्मतावगमः स्वस्याप्यनुमानेनैवेति ज्ञेयम् ।

पू०—जइ पडिवत्तिनिमित्तं सव्वं माणंति हंत विसओ वि ।
पावइ पमाणमेवं (आ०) इच्छिज्जइ सोवयारेण ॥९०॥ विषयस्यापि प्रतिपत्तिनिमित्तत्वात् । यद्यपि विनापि विषयं भवत्येव प्रतिपत्तिरतीतानागतानामर्थानाम्, अन्यथा प्रतिपत्तुमशक्यत्वापत्तेः । प्रतिपद्यन्ते च ते योग्यादिभिरतीन्द्रियार्थवेदिभिः, परं नैतन्नास्तिकाभिमतम् । यद्वा–विषयसत्तासिद्धिरस्त्येव तज्ज्ञान इत्येव वर्तमानताज्ञानहेतुः विषयस्य विषयसत्तैवेति विषयस्यापि प्रामाण्यप्रसञ्जनम् । उपचारश्चात्र कारणे कार्योपचार इति । प्रमीयते अनेन प्रमाणमित्यत्र सर्वस्यापि साधकतमानां सङ्ग्रहात् । यद्वा–कर्मण्यनटि तस्यापि प्रमाणताऽव्याहतैव ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णिच्छयओ पुण एत्थं पडिवत्ती चेव होइ माणं तु । तीए दोण्ह वि भावे ण तं पमाणं ति वामोहो ॥९१॥ निश्चयतः–अनुपचारेण मुख्यया वृत्त्येति यावत् । 'अत्र' प्रमाणस्वरूपविचारे, 'पडिवत्ती चेव'त्ति । प्रतिपत्तिरेव–ज्ञानमेव, 'माणं'ति प्रमाणशब्दप्रतिपाद्यम् । एवकारेण इन्द्रियाऽऽलोकार्थेन्द्रियार्थसन्निकर्षादीनां प्रतिक्षिप्यते, तेषामर्थक्रिया भेदकत्वाभावेन साधकतमत्वाभावात् केषाञ्चित् केषाञ्चिदर्थसन्निकर्षादीनां पूर्वमज्ञातत्वात्, तारतम्यं च तत्त्वतो ग्रहणशक्तिविहितं उपयोगविहितं वेति । परमार्थतस्तु स्वनिश्चितावकरणस्य परनिश्चायकत्वानुपपत्तेः ज्ञानमेव प्रमाणं, तस्यैव स्वपरावभासित्वात् । फलं तु उपादानोपेक्षणादिपरिणतिरज्ञाननिवृत्तिर्वा । आलोचनं त्वर्थग्रहणं विना भाव्येवेति । निर्विकलपस्य प्रमाणता उत्तरस्य च फलता विशेषणस्य प्रमाणता विशेष्यज्ञानस्य च फलताऽप्येवमेवानुपादेया । विषयनानात्वं च प्रतिकूलमेव । तत्राभिन्नत्वे च द्वयोरेकतरवैयर्थ्यं स्पष्टमेव । प्रमेयसारूप्यं प्रमाणमिति त्वमूर्त्तस्य ज्ञानस्य प्रतिबिम्बाग्राहित्वादपकर्णनीयमेव, मूर्त्तस्यैव तथापरिणतेः. विप्रकृष्टविषयाणामनुमानादीनां च कथङ्कारं सारूप्यम् । तस्य विषयस्य प्रामाण्यमुपचारादित्युक्तं तदाश्रित्योदाहरति तस्यां प्रतिपत्ताविल्यर्थः । द्वयोः ज्ञानविषयलक्षणयोः सद्भावे । विषयस्य ज्ञानजनकत्वात् तस्याप्युपचारतः प्रामाण्यम् । सर्वथाऽप्रामाण्यं चोच्यमानं व्यामोह एव, तस्य प्रतिपत्तिनिमित्तत्वात् ।

पू०–तुल्लाणं वभिचारा तमप्पमाणंति (आ०) किं न पच्चक्खं ।
पू०–तेसिं विसेसभावा (आ०) इयरेसु वि किं न सो अत्थि ॥९२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुल्लाणमिति लक्षणयुक्तानां, तथा च लक्षणयुक्तस्य व्यभिचारे तल्लक्षणमेव दूषितं स्यादिति तत्पुत्रत्वहेतुसाध्यमानश्यामत्वाद्यनुमानानां व्यभिचाराद् दुष्टत्वादध्यक्षादिना बाधादित्यर्थः। प्रत्यक्षं मरुमरीचिकायामवभासमानं जलमिदमित्यात्मकं, काचकामलादिदोषरहितत्वेनात्रापि लक्षणलक्षितत्वं विद्यत एवेति गम्यम्। विशेषभावश्च व्यभिचारित्वात् प्रमेयस्य तत्र। यद्वा-क्वापि व्यभिचारि प्रत्यक्षं न भवति। यच्च व्यभिचारि तदिन्द्रियादिदोषोद्भवमिति नैतावता प्रत्यक्षस्याप्रामाण्यता अन्यतम–प्रत्यक्षव्यभिचारेऽपि इतरेषु–प्रत्यक्षभिन्नेषु, अनुमानेष्विति वाच्ये यदितरेष्विति जगुराचार्याः तदितरेषामपि स्मृत्यादीनां प्रसङ्गतोऽव्यभिचारित्वेन प्रामाण्योपदर्शनायेति केचित्। तथा च प्रत्यक्षवद् दोषरहितं यतोऽनुमानादि, प्रमाणं च ततस्तत्।

किं च पडिसेहगं तं (पू०) अणुमाणं अह भवे अणुवलद्धी। आ०—पच्चक्खणुमाणेहिं भणियमिहं णणु पबंधेणं ॥९३॥ तत्प्रतिषेधकमनुमानप्रामाण्यस्येति गम्यते। सर्वं च शेषमात्मप्रतिषेधकेन तुल्यवाच्यमिति 'भणियमिहं'ति व्याजह्रुः पूज्याः। केचित्त्वात्मनः प्रतिषेधः क्रियमाणो नाऽप्रमाय, प्रमिते च किं तदित्यभिप्रेत्य प्रत्यक्षस्य पूर्वं निरुक्तत्वादाहुरनुमानं वादी चेद् ब्रूयाद् प्रमाणं तत्तस्य नेत्यनुपलब्धिमेव वक्ति, सा च पूर्वप्रतिपादितरीत्या नैवोदयमाप्नोतीति निरुत्तरयति वादिनमित्याहुः।

आगमतो च्चिय सिद्धो जं उवओगादिलक्खणो जीवो। आहिंडइ संसारं मुच्चइ सव्वण्णुवयणंमि ॥९४॥ अप्रामाण्यमापादितमस्य वादिना तदुद्धर्तुमाहुः प्रकरणाच्चानुमानभिन्नत्वम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्स य पमाणभावं माणंतरयं च उवरिमो वोच्छं ( उवरि वाच्छामि ) णासंगतमेत्तेणं वाइणं बत्थुणोऽभावो ॥९५॥ यथार्थ-ज्ञानोत्पादकत्वेन प्रामाण्यमागमस्याप्तवचनस्य उपचारात्, तत्त्वतस्तु तदुत्पन्नज्ञानस्येति ज्ञेयम्। व्याप्तिमूलकप्रामाण्याभावाद् वक्तृप्रामाण्यमूलक एव च प्रामाण्यादागमस्य भिन्नता अनुमानादिति। सङ्गमनमेकत्रीभावः सङ्गतिः सा अस्मिन्नस्तीति सङ्गतम्। 'पीता गावो विभक्ता बान्धवा' इत्यादिवदभ्रादित्वाद् अप्रत्यये 'अवर्णे वर्णस्य' इतीकारलोपे तदभावोऽसङ्गतं तदेवासङ्गतमात्रं सर्ववाद्यैकमत्याभावमात्रं तेन, मात्रप्रत्ययेन यथार्थत्वलक्षणं प्रामाण्यकारणसद्भावव्यवस्थितिमाहुः। यद्वा–सङ्गमनं सङ्गतं क्लीबे भावे क्त इति तदभावोऽसङ्गतं, तन्मात्रेण एकमत्याभावमात्रेणेति। तथा सति भूतानामप्यभावप्रसक्तेः, यतो नाभ्युपगम्यन्ते ज्ञानाद्वैतवादिभिः तान्यपि। यद्वा–प्रकृतेर्महान्, महतोऽहङ्कारः, तस्माद्गणश्च षोडशकः, तस्मादपि षोडशकात् पञ्चभ्यो पञ्च भूतानीति। तथा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद् वायुः, वायोरग्निरग्नेरापः, अद्भ्यः पृथिवीत्यादि किं न स्वीकृतं कैश्चिद् भूतानामादिमत्त्वम्?। तथा च भूतानि तेषां शाश्वतत्वं नैव स्वीकार्यं भवता, न चैवं क्रियते यथार्थता च गीयते तत्स्वीकरणे प्रमाणभूमिः, सा च चेदत्राक्षता किं नाङ्गीकार्यं प्रामाण्यं, न्यायस्य समानत्वादिति। शून्यवादिनश्च न चैतन्यादावपि सङ्गतेति न तावन्मात्रेणोच्छेदनीयं सर्वं दर्शयन्तः सर्वमेतदाहुः—

ण य संगयापवादी भूएसु वि (पू०) अह य ताई विज्जंति। पज्जंति य (आ०) एवं चिय आगमपक्खेवि को दोसो ॥९६॥ यथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च तथ्यज्ञानज्ञेयत्वाद् भूतानां स्वीकृतिरसङ्गतत्वे सत्यप्यदुष्टा, तथाऽऽगमानामपि सत्यप्यसङ्गतत्वे यथार्थतया तत्प्रतिपादितानां किमिति न स्वीक्रियते प्रामाण्यम्? । तच्च 'आप्तोपज्ञमनुल्लङ्घ्यमदृष्टेष्टविरोधकम् । तत्त्वग्राहितयोत्पन्नमानं शाब्दं प्रकीर्तित' मितिलक्षणलक्षितस्यैवेति न सत्यासत्यनिर्णये व्यामोहः कश्चनापि । स्पष्टैव च वीतरागस्य वचनानां तथतेति । तस्य च तथात्वं मूर्त्याऽऽगमादिना प्रत्यक्षाविरोधस्याप्त्यादिना ग्रहान्नान्योन्याश्रयता । उपमानेन च यद्यपि प्रचण्डवातादिकमन्तरा किञ्चित्तथाकम्पमानं दृष्ट्वा उपमीयते, यन्त्रादिकेन वा क्रियमाणं तथाविधं दृष्ट्वोच्यते—चेष्टत इदं जीववानिव इति निश्चीयते जीवसत्ता, शशशृङ्गादीनामसतामुपमानत्वाभावात् । तथापि तस्य प्रमाणान्तरत्वाभावात् न तदिहोपापादि सूरिभिः । शङ्कादयोऽपि जीवस्य साधका एवार्थापत्त्या, परं तेऽपि नाऽत्रोपन्यस्ताः, पूर्वोक्तादेव हेतोः । मृतोऽयं, नाऽत्र जीव इत्याद्या व्यवहारा अपि तथ्याः साधका एव जीवसत्तायाः, परं पूर्वप्रकान्तवादोपगममूला एते इति नाऽत्र प्रस्तुताः प्रभुभिः ।

जो पडिसेहेइ तहा स एव जीवोत्ति जुत्तमेयंपि । मूएहिं चेयण्णं अण्णनिमित्तं जओ ठवियं ॥१७॥ यतश्चैतन्यवद् विहितो निषेधः, तच्च भूतेभ्यो परो य आत्मा तदुपादानमेवेति प्राक् स्थापितमेवेति । प्रसङ्गात् परलोकगामित्वमप्युपपादयन्त आहुः—

संतस्स णत्थि णासो एगंतेणं ण यावि उप्पाओ । अत्थि असंतस्स तओ एसो परलोगगामि त्ति ॥१८॥ नोपादानं विरहय्य कार्यं किञ्चित् उत्पद्यते इति हि प्रमाणसिद्धः पन्था इति, नो सतः सर्वथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाशः, उत्पादो वाऽसतो, दीपादीनामपि धूमाद्यास्तम आद्याश्च पर्याया एव, घटस्य कपालयुग्मवत् ।

बालाइपज्जयाओ जुवाइ जइ होइ पज्जवो इहयं । एवं मणुस्सभावा सुरभावो होइ परलोगो ॥९९॥ मनुष्यत्वस्थितिमपेक्ष्य परेण यथा बालादिपर्यायाद् यौवनादिपर्यायोत्पादः स्वीकृतः तथा जीवस्थितिमपेक्ष्य मनुष्यपर्यायात् देवत्वादिपर्यायोत्पादः । प्रत्यक्षत्वादुपदेश्यत्वाच्च मनुष्यत्वग्रहणम् । सुरभाव इत्युपलक्षणं चैतन्नारकादेः । सुरग्रहणं तु ज्योतिष्काणामध्यक्षतया अल्पकष्टेन स्वीकारकारणसम्भवात् । तथा चाऽध्यक्षानुभूयमानलोकादन्यानां परलोकतेति पारिशेष्यादात्मनः परलोकगामितासिद्धिः । सतः सर्वथा विनाशविलयादित्यस्य पूर्वं साधितत्वात् चैतन्यविशिष्टकायस्य यत् प्रतिषेधकत्वमाम्नातमाम्नायशून्येन, तन्निराचिकीर्षव आहुः—

ण य पडिसेहो वि इहं कप्पइ चेयण्णसंगए काए । तस्सेवाभावाओ ण कायमेत्ते य सो दिट्ठो ॥१००॥ चैतन्यसङ्गतकाये आत्मा नास्तीति प्रतिषेधनं न युज्यते, कथं ? । चेत् चैतन्यस्यैव तावदात्मानमन्तराऽभावात् । कायमात्रे चेत् प्रतिषेत्स्यति, तदाहुः—नासौ दृष्टः प्रतिषेधः कायमात्रे—चैतन्यशून्ये कलेवरे । चकारः केवलस्यात्मनोऽपि निषेद्धृत्वाभावद्योतनाय । नहि कर्त्तापि विनेतरकारणमारभते कार्यम् । न चैतावता न स कर्त्ता, न वा तस्याऽसद्भावः । एवमात्मनोऽपि प्रतिषेधवचनोच्चारेऽवश्यं शरीरादीनि कारणानीति न केवलस्य तस्योच्चारादि । तथा च सत्यमेव न्यगादि कलिकालसर्वज्ञैः श्रीमद्धेमचन्द्रसूरिभिः चौलुक्यचूडामणिचूडामणिचन्द्रार्चितचरणैः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'धर्माऽधर्मौ विना नाङ्गं विनाऽङ्गेन मुखं कुतः ।
मुखाद्विना न वक्तृत्वं तच्छास्तारः परे कथम् ॥१॥ इति ।

एत्तो च्चिय नाभावो दाणादिफलस्स मणप्पसायादी। इहलोगम्मि वि दिट्ठा परलोगे किं न जुत्तत्ति ॥१०१॥ इत आत्मनः तस्य परलोकगामित्वस्य च सिद्धेरेव, सिद्धे धर्मिण्येव तद्धर्मचिन्तनस्य तत्सत्तायाश्च न्यायप्राप्तत्वात्। दृष्टफलकत्वेन तस्याऽदृष्टाफलकत्वमिति ब्रूयात् चेत् परः, तत्रोभयफलतामाश्रित्योचुः–' इहलोक ' इत्यादि। एवमनङ्गीकारे सुरभावादीनां प्रमाणसिद्धानामप्याकस्मिकत्वापत्तेः, निर्हेतुकत्वे च नित्यं सत्त्वासत्त्वापत्तेश्च । फलं च यन्मनःप्रसादादि जेगीयते परेण तदपि तत्त्वतः क्रियात्मकमिति भाव्यं तत्फलेनापि ।

ननु भवतु मनःप्रसादादेः सुरलोकादिफलं ' अभ्यर्चनादर्हतां मनःप्रसादस्ततः समाधिश्च ' इत्यादिवत्, परं दानं त्वन्यथासिद्धमेव, घटं प्रति कुम्भकारजनकस्येवेति चेद् । अन्यथासिद्धयज्ञानोद्गीर्णमेवैतत्, मनःप्रसादादीनां द्वारत्वात् । नहि भवति घटं प्रति दण्डस्यान्यथासिद्धता दण्डत्वस्येव । प्रमाणमुपन्यस्यन्ति—

किरियाफलभावाओ दाणादीणं फलं किसीए व्व । पू०—तं दिट्ठं चेव मती जस—कित्ती—लाभमादीयं ॥१०२॥ इहरा य किसीएवि हु पावइ अदिट्ठमेव (आ०) तं पत्थि । तस्स परिणामरूवं सुहदुक्खफलं जओ भुज्जो ॥१०३॥ दानादिफलवत् प्रयोगिक्रियात्वात् कृषिवत् ' तदनन्तरमूर्ध्वं गच्छत्याऽऽलोकान्ताद् ' [तत्त्वार्थ०] इति वचनात् परमाणोश्च समयेनैकेनापि लोकान्तगमनशक्तियुक्तत्वात्तत्क्रियाणां चादृष्टफलत्वाभावात् प्रयोगीति । तत्र न ते प्रयोगिन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति न तव्र्यभिचारः । दृष्टेन यशःकीर्त्यादिना न सिद्धसाध्यतेत्याहुः–' तं दिट्ठ 'मित्यादि । भवति च कर्षुकाणामपि धान्यादौ दृष्टफले सत्यपि परलोकगतविचित्रफलोत्पादः, अन्यथा तस्य तेषामाकस्मिकमेवापद्यतेति । अन्ये त्वेवमाहुः–दानादीनां सफलत्वे सिद्धे यशःकीर्त्यादीनामनैकान्तिकत्वात् सिद्ध्यत्येवादृष्टफलकतेति । अदृष्टफलकतामन्यथानुपपत्त्या साधयन्ति—

तदभावम्मि य मुत्ती पावइ नियमेण सव्वसन्नाणं । एवं च भवसमुद्दो ण घडइ पच्चक्खदिट्ठो वि ॥१०४॥ सर्वं चैतददृष्टाङ्गीकार एव युज्यते इति तत्साधयितुमाहुः–

तुल्लफलसाहगाणं तुल्लारंभाण इट्ठविसयम्मि । दीसइ य फले विसेसो कहंसअदिट्ठऽभावम्मि ॥१०५॥ ' तुल्यफले ' त्यादिनादृष्टस्य विशेषहेतुतामाहुः, ' दीसइ ' इत्यादिना च फलविशेषस्याध्यक्षसिद्धता तुल्यकृष्यादावपि धान्याद्यल्पबहुत्वोपलब्धेः । एकस्यैवैकत्राल्पधान्यलाभः अन्यत्र बहुधान्यलाभ इति तु देशविशेषस्यापि अदृष्टफलहेतुत्वात् न विरुद्धम् । ' उदयखयखओवसमा दव्वं खित्तं भवं च भावं च ' इत्यादिवचनात् । न च तस्यैवाऽस्तु फलविशेषहेतुत्वं तत्रैव, अन्यथान्यथोत्पद्यमानफलस्याहेतुकत्वापत्तेः । उपसंहरन्तो दृष्टाया अनेकान्तफलतामाशङ्क्य समादधति—

अदिट्ठेगंतफला तम्हा किरिआ इहं मता सव्वा । पू०–दिट्ठाणेगंतफला (आ०) सा वि अदिट्ठाणुभावेण ॥१०६॥ अथ प्रसङ्गतो दानादिक्रियात एव सुखाद्युत्पत्तिः सुरलोकभावश्च इतरस्मादितरद्वयमिति नियमनाय अरुन्धतीन्यायेनाऽऽख्याय सिद्धान्तमाहुः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ण विवज्जयम्मि वि फलं लोगविरोहा पतीतिबाधाओ। थेव-सुहिदंसणाओ तह जिणचंदागमाओ य ॥१०७॥ लोकेनापि दानहिंसाविरत्यादि सत्फलमितरच्चेतरफलमेव गीयते, तद्विरुद्धयते इति। तस्य गड्डरिकाप्रवाहत्वे आहुः—'प्रतीतिबाधात्' प्रतीयते च दानादेः शुभमेव यशःकीर्त्यादिफलम्, अन्यस्य चान्यथा, तस्या अपि स्यादेव बाधो विपर्यये, तत्रापि हिंसादावासक्तानामपि सुखित्वाभिमानादाहुर्युक्ति—'स्तोकसुखिदर्शनात्' स्तोका एव हि दानादिकर्तारः, स्तोका एव च सुखिन इति ज्ञायन्ते दानाद्याः पुण्यफलाः क्रिया इति। सत्यम्, परं देवकुर्वादौ नैतदेवमभिमतं भवद्भिरपीत्याहुः—'तथा जिनेन्द्रागमाच्च' इति। चकारेण पूर्वेषामपि प्रामाणिकतामावेदयन्ति। यतो न समीक्ष्यभाषिणो गड्डरिकाप्रवाहपतिताः। न चाबाधप्रतीतिबाधो भ्रान्तिमत्प्रतीत्या दुःखकलिमलपूर्णानां च नारकाणां तिरश्चां चातिबहुत्वान्न दुःखिबाहुल्यमपि चासिद्धमिति। साम्प्रतं धार्मिको गतो वाटिकायामित्युपहासं परिहरन्तः क्रियायाः सकर्तृकत्व साधनायाऽऽख्यान्ति—

किरिया न कत्तिरहिया सिद्धो जीवो त्ति ता कहं कत्ता। एवं धम्मियणायं विण्णेयं वयणमेत्तं तु ॥१०८॥ जीवस्य सिद्धत्वाद् दानादीनां च जीवद्विधीयमानदर्शनाच्च न दानादीनां सकर्तृकत्वमसिद्धं जीवश्चासौ।

जाईसरणं च इहं दीसइ केसिंचि अवितहं लोए। पुव्वभवठविय–सेवियसंवादाओ अणेगभवं ॥१०९॥ जातिस्मरणं च धारणाविशेषजन्यं स्मरणं मतिज्ञानविशेष एव। तेन च दृश्यन्ते सङ्ख्याता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवाः यावन्तः सञ्ज्ञिपञ्चेन्द्रियजातीयाः, अन्यत्र तथाविधसंस्कारा-भावात्. असञ्ज्ञिनो ह्यमनस्का इति।

पू०–अह तंमि किं पमाणं (आ०) णणु सो च्चिय (पू०) अप्प-तारगे किं ति। आ०–बालस्सवि भावाओ संवाओ भावओ तस्स ॥११०॥ बाल्ये हि न बुद्धिशाठ्यमिति बालस्येत्युक्तम्। भावत इति तु देशतोऽप्यव्यभिचारित्वदर्शनाय।

पू०–अह उ जहिच्छा हेतू सो संवादोत्ति आ०–किं न इतरो वि। ण य जाईस्सरवयणे इह पसिद्धो विसंवादो ॥१११॥ यदृच्छाहेतुः स्वप्नादिवत् तत्रापि दृश्यते एव संवादो न चान्यहेतुकः स इति इतरो विसंवादः। पूर्वोक्तभावसंवादविरोधपरिहारायाहुः–'न च' इत्यादि। यद्वा–यदृच्छाहेतुर्यथोच्यते भवता तथा स संवादः किं जातिस्मरण-यथार्थताभवो न भवेत्, स्वप्नज्ञाने च दृश्यते एव बहुधा विसंवाद इति काचित्को भवति संवादो यदृच्छाहेतुः। अत्र तु विसंवादले-शोऽपि न विद्यते इति यथार्थताविहित एव संवादोऽयमित्येव युक्तम्। तत्त्वतस्तु न स्वप्नसंवादोऽपि यदृच्छाहेतुकः किन्तु पुण्यादिसमुत्थ-त्वात् स्वप्नस्य तदुत्थ एवेति। तथा चोचिवांसो विद्वांसः—

'अनुभूतः श्रुतो दृष्टः प्रकृतेश्च विकारजः। मलमूत्रादिपीडोत्थ-स्तथाऽऽधिव्याधिसम्भवः ॥१॥ देवताद्युपदेशोत्थो धर्मकर्मप्रभावतः। पापोद्रेकसमुत्थश्च स्वप्नः स्यान्नवधा नृणाम् ॥२॥ प्रकारैरादिमैः षड्-भिरशुभश्च शुभोऽपि वा। दृष्टो निरर्थकः स्वप्नः सत्यस्तु त्रिभिरुत्तरैः' ॥३॥ अत्र काचकामलादिदुष्टनेत्रोदिताध्यक्षव्यभिचारितावद् आदि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मषट्कव्यभिचारिता, सगुणनेत्रोद्भूतप्रत्यक्षवच्चाऽन्त्यत्रयस्य प्रमाणतेति न स्वप्रज्ञातस्यापि यदृच्छाहेतुकः संवाद इति ।

पू०—अह अम्हेहिं न दिट्ठो कोइ जाइस्सरोत्ति तो नत्थि । आ०—पपियामहस्सवि अच्चंतं पावइ अभावो ॥११२॥ प्रपितामह इति विशेषदर्शनाभावाय ।

तदभावम्मि अभावो पियामहस्सावि तह य पिउणा वि । तदभावे भवतो विय पडिसेहोऽसंगतो तम्हा ॥११३॥ तस्माद् भवतोऽप्यभावप्रसङ्गलक्षणविरोधात् प्रपितामहादीनां प्रतिषेधोऽसङ्गतः—युक्तिहीनः । तथा च न दृष्टमात्रमेव सदिति पक्षो युक्त इति तत्त्वम् ।

पू०—अह कज्जाओ भावो पियामहादीण (आ०) एवमेवेहं । किं जाइस्सरकज्जं ण पसिद्धं देवकुलमादी ॥११४॥ पितामहाद्याः, आदिशब्दात् पित्रस्मदादिग्रहः । तेषां कार्यत्वं जन्यमानत्वात् कार्यं च सकर्तृकं जन्मादि, तस्मात् कार्यादेव हेतोः प्रपितामहादिसिद्धिः अव्याहतैव अदृष्टेष्वपि तेषु । अनुमानस्य स्वीकृत्यैव प्रामाण्यमेतदिति तु ध्येयम् । कार्येण तत्कर्तृस्वीकारो यथा तथा जातिस्मरविहितसंवादविहितदेवकुलादिदर्शनाज्जातिस्मरणाद्यभ्युपगमोऽपि श्रेयानेव । अत एव च प्रपितामहपर्यन्तानुधावनं पूज्यानामिति । न च मनसो धारणाफलभूतसंस्कारवत्त्वात् मनसश्च प्रतिभवमन्यान्यत्वात् कथं स्मरणमिति वाच्यम् । आत्मन एव तत्संस्कारावहत्वात् मनश्च जडतास्पदम्, केवलमिन्द्रियादिवदुपष्टम्भकं, ज्ञाताऽऽत्मैवेति सुनिर्णीतं सूरिभिः । संस्कारश्च ज्ञातुरेव अन्यथातिप्रसङ्गात् । अथ सम्भवानुमाने जातिस्मरणस्य सिद्धतां दर्शयन्तः आहुः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बालकयानुस्सरणं तिव्वखओवसमभावजुत्तस्स । जइ कस्सइ वुड्ढस्सवि जाइस्सरणं तहा किं ण ॥११५॥ 'तीव्रक्षयोपशमभावयुक्तस्य' इत्यनेन कथं न सर्वेषां जातिस्मरणमिति समाहितम् । तीव्रता च तदुत्पादप्रत्यलक्षयोपशमग्रहाय, सामान्यक्षयोपशमस्य प्रतिक्षणमपि भावात् । क्षयोपशमता च न सर्वथा सर्वदा दर्शने क्षयोपशमस्य प्रतिपातित्वादितिदर्शनाय । भावयुक्तेति तु नार्वाक् न वा परत इतिज्ञापनाय । लौकिकस्मरणस्यापि तथात्वदर्शनमव्याहतमेवेति न नोद्यमत्र परेणेति न तत्र चसूर्या सूत्रिता सूरिभिः । यथा चैकत्वाद् ज्ञातुर्भवति स्मरणं बाल्यानुभूतस्य वृद्धत्वे कस्यचिच्छक्तस्य, तथा भवान्तरेऽपि किं न स्यात् पूर्वोक्तादेव हेतोः । सर्वथा देहभेदानभ्युपगमाच्च नैतद् जीवसिद्धौ सन्धत्तमनुसन्धानविद्भिरपि पूज्यैः । न कथञ्चित् पर्यायपरावृत्तिमात्रेण द्रव्यपरावर्त्तोऽभिमतः प्रामाणिकैः, अन्यथा क्षणिकत्वस्यैव प्रामाणिकत्वापत्तेः । प्रतिक्षणं परावर्त्तन्त एव निखिला अपि पदार्था वर्त्तमानपर्यायपरित्यागेनेत्यलं प्रस्तावरहितेन । अन्यदप्याहुः स्मृतेर्जीवसिद्धये-

जो बालयणाहिलासो पढमो अहिलासपुव्वगो सोवि । अहिलासत्ता जूणो जह विलयाहारअहिलासो ॥११६॥ अत्राभिलाषो लोभमोहोदयजन्यः । स च न बन्धमन्तरा, न च सोऽन्तरा लोभम् , क्षीणकषायाणां तद्बन्धाभावात् । तथा चाभिलाषस्याभिलाषान्तरपूर्वकत्वेऽन्तर्व्याप्तिसिद्धिः । प्रथमता च इहभवापेक्षया ग्राह्या, अन्यथा विरोधप्रसङ्गादागमादिना ।

पू०—विलयाहारभिलासो इह अणुभूयाहिलासपूव्वो उ । सो थिसिया एवं चिय (आ०) णो पढमत्तप्पकोवा उ ॥११७॥ अत्रेदं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हार्दम्—यथाहि यूनो विलयाहाराद्यभिलाषो न इहत्यविलयाहाराद्यभिलाषपूर्वकः, किन्त्वभिलाषमात्रपूर्वकः। तथाऽत्रापि न स्तनाभिलाषस्य स्तनाभिलाषपूर्वकता, किन्त्वभिलाषसामान्यपूर्वकता। सा च गर्भगृहेऽभिलाषाभ्युपगमात् सिद्धसाधना सती न भवान्तरानुयायितामात्मनोऽवगमयितुमलमिति प्रथमत्वविशेषणैरर्थक्यापत्त्या परिह्रियते सूरिभिरेतत्। तत्त्वतस्तु गर्भगृहगतस्याप्याद्याभिलाषो नाभिलाषमन्तरेति ध्रुवैव जन्मान्तरसिद्धिः। नन्वस्तु विशेषव्याप्तिः, परं कथं विलयाहाराद्यभिलाषस्य प्रथमताऽऽख्यायते इति चेत्, इहत्यापेक्षयैव इत्येतदेवाहुः—

सो वि ण एगंतेणं इहाणुभूयाभिलासपूव्वो उ। जमणादौ संसारे तं णत्थि जतं ण अणुभूयं॥११८॥ ननु च कथमप्राप्तपूर्वसञ्ज्ञिभवस्य विलयाभिलाषः, यतो नपुंसका एवासञ्ज्ञिनो 'नारकसम्मूर्च्छिनो नपुंसकानि' इतिवचनप्रामाण्यात् 'शेषाणां सम्मूर्च्छन' मितिवचनाच्च स्पष्टमेव एकेन्द्रियविकलादीनां नपुंसकताऽसञ्ज्ञिनामिति। सत्यं, परमविचारितम्, नहि नपुंसकानां न विलयाभिलाषो, द्व्यभिलाषस्यैव तथात्वात् 'पुरिसित्थितदुभयं पइ अहिलासो जव्वसा हवइ सो उ। थीणरणपुंवेओदओ' इति स्पष्टतमभणितिसद्भावात्। अत एव चाभिलाषपर्यन्तानुधावनमाचार्याणामिति। तथा चाऽवाच्येव-'तं णत्थी' त्यादि। अन्यदपि प्रतिपादयन्त्यनुमानं स्वाभाविकम्—

इय पढमं विन्नाणं विण्णाणंतरसमुब्भवं णेयं। विन्नाणत्ताओ च्चिय जुवविन्नाणं व बालस्स॥११९॥ अत्र विज्ञानस्यात्मस्वभावत्वं स्पष्टमेव। अन्तर्व्याप्तिश्चात्र न विशेषज्ञानोपलम्भो विना क्षयोपशमं, सर्वजघन्यज्ञानस्याननुभवात् सूक्ष्मैकेन्द्रियापर्याप्तानां प्रथमसमयभा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विनामेव तद्भावाद् विशेषेति। क्षयोपशम आत्मप्रयत्नसाध्यः, सोऽपि ज्ञानलेशकृत एवेति। न च ज्ञानशून्योऽस्त्यात्मा, 'सव्वेसिंपि य णं अक्खरस्स अणंतमो भागो निच्चुग्घाडिओ चिट्ठइ, सोवि य णं जइ आवरिज्जा जीवो अजीवत्तणं पाविज्जे'त्यादि [ नन्दि० ] प्रवचनप्रामाण्यात्। कर्मनिराकृतये च यदुच्यते तैः—' चित्तो भूयसहाव' इत्यादि तन्निराचिकीर्षयेदमाहुः—

चित्तो कम्मसहावो भणिओ तत्तो व लाभहरणादी। सिद्धत्ति अत्थि जीवो तम्हा परलोगगामी उ ॥१२०॥ यच्च—' जलबुद्बुदवज्जीवा' इत्यादिना कर्मनिराकरणं, तदप्यनालोचितमेव रमणीयम्। यतो नहि केवलजलमात्रेण भवन्ति बुद्बुदाः, सर्वत्र सर्वदा तत्प्रसङ्गात्, किन्तु समीरणादिसहचारिसमागमादिनैव, तथा अत्रापि न केवलमात्ममात्रेण भूतमात्रेण वा वैचित्र्यमुपपन्नं स्याद् विनाऽन्यं भेदकम्। यश्च भेदकः सोऽपि विचित्रतानुकार्येवेति विचित्रस्वरूप एवाभ्युपगन्तव्यः। स एव पदार्थः कर्मेत्युच्यते आस्तिकैः। यदि च नामान्तरेणाभ्युपगम्यते भवद्भिः तथापि स्वरूपभेदाभावे न विवाद इत्यलमतिविवादेन।

विचार्य सांप्रतं सूरेर्बृहस्पतेरपाकृतौ। तदेवालेखि ग्रन्थस्थं न स्तैन्यं स्पष्टभाषणे ॥१॥ प्रस्तावोऽत्रोपयोगे न पञ्चास्तिकायचर्चने। तथापि न स आधारसिद्धिमृते प्रसिद्ध्यति ॥२॥ विप्रतिपत्तिरत्राभूद्येषां तानव्युदस्य किम्। प्रतीतिः किं समीचीना स्यात् ततस्तन्निराकृतिः ॥३॥ आत्मस्वभावसिद्ध्यै वै शेषं प्रासङ्गिकं गतम्। न भोजने जने वृत्तिः केवले संस्कृतिं गते ॥४॥ यच्चोशन्ति बुधाः केचिच्चैतन्यसमवायतः। चेतनाः सर्वे आत्मानोऽन्यथा राम्रन्धरू-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यता ॥५॥ तदर्थमेव जमन्थुर्जीवानां सूरयो ननु । उपयोगयुतत्वं यद् भिन्नाप्त्योरन्तरा न तत् ॥६॥ आप्तिश्च नात्र संयोगो द्रव्ययो-रुभयोः स यत् । गुणगुणित्वभावेन समवायस्य योग्यता ॥७॥ तदे-तन्निविडाबोधजडिमाक्रान्तहृद्वचः । समेति समवायो न यतो युक्त्या विचारिते ॥८॥ न तावत्तत्र प्रत्यक्षमनुमा वाऽधिगम्यते । आद्ये रूपादिराहित्य-मन्त्येऽध्यक्षेण शून्यता ॥९॥ न च वाच्यं विशिष्टा धी-र्मता सम्बन्धपूर्विका । दण्ड्यादिवदिति प्रष्ठं प्रमाणं मुनिदर्शितम् ॥१०॥ समवाययुतेऽर्थे किं न वैशिष्ट्यमुदीक्ष्यते । वाच्योऽन्यस्तत्र सम्बन्धो यन्नते तं विशिष्टता ॥११॥ स्वरूपेणैव ते सिद्ध-साध्यता चेन्न किं पुरा । यतो न्यायमितः शील-भङ्गाऽनङ्गा-ऽशमक्रियम् ॥१२॥ न च जत्वादिवत् किञ्चि-दीक्ष्यतेऽवयत्रादिषु । नित्यत्वाच्च न साध्योऽसौ न च तत् साधनक्रिया ॥१३॥ चित्रं चावयविध्वंसेऽवयवानां च्युतावपि । सम्बन्धस्तिष्ठति प्रष्ठो नित्योऽसौ यदुदीयते ॥१४॥ किञ्चासावेकदेशेन वृत्तिं कात्स्न्येन वा श्रयेत् । द्रव्यादावाऽऽद्यपक्षे स्यात् सांशता तद्युतः स तत् ॥१५॥ अन्त्ये, ह्यनित्यता क्षुण्णा नाशो जातो यदाश्रितेः । न च तिष्ठत्यनाधारं वस्तु न्यायागतं यदि ॥१६॥ किं नास्यांशेन वृत्तौ स्यात् सांशता स्यान्न किं तथा । समवायोपगततांशांशिनोः स यतो मतः ॥१७॥ सर्वा-त्मनाप्यस्य तु सर्वत्राऽनेकता न किम् । सम्बन्धिनोश्चलत्वे किं ध्रौव्यं सम्बन्धकारिणः ॥१८॥ न च गौरवभीत्येयं समवायस्य कल्पना । अनन्तोत्पत्तिविगतेः कारणस्यापि योजिनः ॥१९॥ न यत् स्वकल्प-नाशिल्पि-कल्पितोऽर्थो भवेद् भुवि । अन्यथा विश्वदारिद्र्यं समूलं को व्ययेत न ॥२०॥ न नोद्यं तर्हि किं पूज्या 'युत' इत्यूचुरिद्धभाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यथा तन्मया जीवा इत्याख्यास्यन् बुधोत्तमाः ॥२१॥ यतो मतो न गुणिनो गुणो भिन्ना न चान्यथा। सर्वथा किन्तु स्याद् भिन्ना-भिन्न आम्नायत श्रुते ॥२३॥ तथा चाऽर्हति सम्बन्ध-मविष्वग्भा-वतो द्वयोः। अन्यथाऽयं गुणी चायं गुण इत्यभिधा क्षयेत् ॥२४॥ अन्यच्च युतताख्यानाज्जीवास्तद्विकला नहि। अन्ययोगव्यवच्छेदं नान्ये तद्वत्त्वमर्हति ॥२५॥ समवायेन चैतन्य-सम्बन्धाच्चेतना इमे। चेन्न किं नभसा योगोऽनयाऽसौ तत्र यन्मतः ॥२६॥ न तत्र चेतना चेत् किं सती सा युज्यतेऽमुना। जीवेषु ज्ञानयुक्तेषु न कार्यं तच्छिखण्डिना ॥२७॥ किञ्चाऽन्यत्र सतीयं प्राग् न वाऽऽद्ये कल्पना-हतिः। यतो गुणो न गुणिनं विरहय्य स्थितो भवेत् ॥२८॥ अन्त्ये कथं तया तस्य सम्बन्धं कर्तुमीशते। न वन्ध्यातनयोद्वाहो निपुणेनापि तन्यते ॥२९॥ यथाऽयं जन्मिभिर्युञ्ज्यादिमां किं नभसा तथा। योजयेन्नैव नियम-विधातेह न कश्चन ॥३०॥ अर्वाक् च चेतनायोगात् जीवत्वं जन्मिनां नु किम्। न सुखदुःखयोगोऽपि युज्यते गतचेतने ॥३१॥ चेदजीवैर्मतो बुद्ध्या योगः सम्बन्धसाधितः। अजीवत्वं तथा ध्वंसे-ज्जीवत्वं चोद्भवेन्न किम् ॥३२॥ ओमिति चेत् पदार्थानां विलीनं हि व्यवस्थया। ध्रुवो नास्तिकवादश्चाह्नयोररीकृतस्त्वया ॥३३॥ सिद्धं चेतरथा जीवाश्चेतनासङ्गताः समे। सर्वे जडा वियुक्ताश्चानयेत्यर्ह-न्मतोदितम् ॥३४॥ महर्षयो जगुः सम्यक् उपयोगोऽस्य लक्षणम्। लक्षणं प्रोज्झ्य नो लक्ष्यं दोषपोषप्रसङ्गतः ॥३५॥ तथा सति क्षणं द्रव्यं निर्गुणं निष्क्रियं न च। समवायस्य यत् सिद्धौ तदर्थं साध्यते सकः ॥३६॥ अविष्वग्भावसम्बन्धे न भेदो येन याजनम्। कार्यं यथा क्षणं हेतु-फलत्वे तत्प्रकल्पनम् ॥३७॥ न चाभेदोऽपि सङ्गीतः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वथा येन व्याकृतम् । यायादसत्यतां द्रव्य–गुणत्वाद्या च कल्पना ॥३८॥ सप्तम्या न न निर्देशो युज्यतेऽत्राप्रकल्पितः । एकत्र यदहे-न्यायाद् विभक्तयः समा मताः ॥३९॥ तथा च स्वभावेन–बोपयो-गयुता जीवा इति सिद्धम् ।

न च वाच्यं जीवानामुपयोगवत्त्वस्वाभाव्याद् ज्ञानिन एव निखिला असुमन्तः किं न स्युरिति । सन्त्येव सर्वेऽपि तथाविधाः, नहि कोऽप्यज्ञो जीवः, सुखदुःखादिवेदनानुपपत्तेः । अस्तु चेत् कर्मनैरर्थक्यस्य वज्रलेपायमानता । कथं तर्हि बोधवैचित्र्यम् ? सम्यगपृष्ठाः, यदा हि जीवाः स्वभावस्थाः, न तदा कदापि बोधवै-चित्र्यम्, आविर्भूतयथार्थात्मस्वभावानां केवलवत्त्वात्तस्य चैकविध-त्वात् । परं यदा कर्मपटलावृताः, तदा यथानैर्मल्यमेव बोधोत्पादः । निर्मलं हि सद्रत्नं स्वभावतो यथा यथा मलीमसतां विरहयति, तथा तथा स्वस्वभावभूतां द्युतिं प्रकटयति । यथा वाऽऽवृतो दीपो यथा यथाऽऽवरणविलयवान्, प्रकाशयति तथा तथा परं, नैतावता तयोर-प्रकाशस्वभावता । जीवानामप्येवमेवोपयोगस्वभावाज्ज्ञानादिस्वभावता ।

ननु च यथा तारतम्यवत्त्वाद् ज्ञानोत्पादस्य विश्रान्त्या साध्यते केवलम्, तथा किं न तारतम्यवत्त्वाद् ज्ञानहानेः सर्वथा क्षीणता ज्ञानस्यापि । न्यायस्य समानत्वात् स्वीकार्यमेवमपि । तथा च स्पष्टै-वाजीवत्वापत्तिर्जीवानामपि । न चैतदभिमतमिति चेत् । सत्यम्, यथा हि घनतरापि घनाघनपटली न तिरस्कर्तुं प्रभवति प्रभापति-प्रभां सर्वथा संवरितुं, दिवसरजन्योर्भेदाभावप्रसङ्गात्, तथाऽत्रापि समुदिता अपि त्रिभुवनगताखिलकर्मवर्गणा नावरितुं जीवस्यैकस्यापि सर्वां ज्ञानमात्रां भवति प्रभविष्णुः, येनापद्येत जीवस्याजीवता ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्त्वतस्तु यत्र यत्र प्रदेशेषु कर्माऽऽवृणोति ज्ञानादिमात्रां मात्र-यापि, तत्र तत्र सर्वथाऽप्यावरणं स्यादेव । अत एव च सूक्ष्मैकेन्द्रि-याणां अपर्याप्तत्वप्रथमसमयवर्त्तिनां जघन्या ज्ञानमात्रा आम्नायते आम्नायवेदिभिः तेषाम् । यतः शेषाः समस्ता आवृता एव प्रदेशाः कर्मवर्गणया सर्वथा । न च वाच्यं कथं तर्हि तेषां ज्ञानवत्त्वं, प्रदेशा-ष्टकं हि सर्वदा सर्वथा निर्मलतममेव । कांस्यपात्रीवोदकं न तत् स्पृशति कर्मवर्गणा । केवलात्मस्वरूपप्रदेशनिभा हि ते सर्वदा सर्वेषां प्रदेशा अष्टौ ।

ननु कथं न तेषां निखिलजगत्प्रभुप्रभावतिरस्कारिणोऽपि कर्मणो गोचरतेति ? चेद् । इतरे हि प्रदेशा जाज्वल्यमानज्वालावलीप्रबलता-पतापितोद्वर्त्तमानवारिविचयवच्चञ्चलतमाः, ततश्च योगवन्तः, कर्म-वर्गणासंयोगश्च ततस्तेषां, नैवमितरेऽष्टौ ।

ननु कोऽयमुपयोगो ? यमपेक्ष्योच्यते—'द्रव्यं कषाययोगावुप-योगो ज्ञानदर्शने चेति । चारित्रं वीर्यं चेत्यष्टविधा मार्गणास्तस्य ॥१॥ इति । [प्रशम०] यतो ज्ञानदर्शनान्यतरत्वेनाष्टविधत्वं मार्गणायाः, ज्ञानदर्शनात्मनोरेवोपयोगात्मत्वात् । न च वाच्यं ज्ञानदर्शनयोरिन्द्रि-यानिन्द्रियप्रभवत्वान्मतिश्रुतयोः तत्पूर्वकत्वाच्च अवधिमनःपर्याययो-र्गत्यन्तरभावाच्च केवलस्य भवस्त्येवोपयोगात्मेति । ओघज्ञानस्याप्य-निन्द्रियज्ञानार्थत्वात् मत्याः तद्भावाच्च श्रुतस्यापि तदानीं सद्भावात् । गत्यन्तराले यद्यपि च 'जीवेणं भंते ! गब्भाओ गब्भं वक्कममाणे किं सइंदिए वक्कमइ अणिंदिए वक्कमइ ? । गोयमा ! सिय सइंदिए सिय अणिंदिए, से केणट्ठेणं भंते ! एवं वुच्चइ, गोयमा ! दव्विंदि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



याइं पडुच्च अणिंदिए वक्कमइ, लद्धिंदियाइं पडुच्च सइंदिए वक्कमइ '- [ भग० ] त्तिवचनाद् लब्धीन्द्रियसत्त्वमभ्युपगम्यते, परं न तानि विनोपकरणादीन्द्रियाणि क्षमाणि ज्ञानमुत्पादयितुम्, गर्भजन्मनामेव चैतस्याः सत्ताया गर्भाद् गर्भमितिवचनाद् विशेषेण सम्भवात्। तेन मत्याद्यनभ्युपगमेऽपि पूर्वोक्तरीत्या तदनपायात् किं प्रयोजनमुपयोगात्मना पृथग्भणितेनेति। 'जाइस्सरो उ भयवं अप्परिवडिएहिं तिहि उ नाणेहिं' इत्याद्यपि पूर्वोक्तरीत्यनुगतमेव तत्रापि। यतो नहीन्द्रियनिमित्तोऽवगमो नियतो न च तदुपयोगात्मना समावेश इति चेत्।

सत्यं, यथाहि—तत्र वीर्यस्य व्यापकस्य योगादिभ्यो व्याप्येभ्यो निर्धार्य पृथग्वचनम्, तथाऽत्रापि व्याप्याभ्यां ज्ञानदर्शनाभ्यां निर्धार्य पृथगुक्त उपयोगात्मेति न कथञ्चिदपि विरुद्धताऽष्टविधात्ममार्गणायाः। अन्यच्च—उपयोगात्मनाऽऽत्मस्थैर्यं ज्ञानदर्शनात्मभ्यां तु परावर्त्तः, आन्तर्मुहूर्त्तिकत्वात्तल्लब्ध्योः। अत एव 'जस्स उवयोगाया तस्स नाणाया वा दंसणाया वा नियमओ अत्थि' त्ति वैकल्पिको नियमः सङ्गच्छते। यद्वा—सामान्येनोपयोगो बोधस्वभावोऽनिर्धारितसामान्यविशेषान्यतरप्रधानोपसर्जनीभावः, स एव च विशेषप्रधानो यदि तदा ज्ञानशब्दव्यपदेश्यः, सामान्यमुख्यकश्च दर्शनशब्दव्यपदेश्यः। तथा चोपयोगस्यैव विभज्यमानं द्वैविध्यमपि सङ्गच्छते, सङ्गच्छते ज्ञानात्मनां दर्शनात्मनां चोपयोगात्मनियतता। विशेषः परमेतावानत्र यदुत—साकारं ज्ञानं निराकारं च दर्शनमित्याख्यायते आम्नाये। तत्र सामान्यप्राधान्येन निर्विकल्पत्वेन वा बोधमात्रस्य दर्शनात्मता ज्ञेया। एवं च द्रव्योपयोगदर्शनात्मनां परस्परं समत्वं न व्याहन्यते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतो भवत्येव ज्ञानात्मनामपि पूर्वं दर्शनात्मता, तत्पूर्वकत्वाज्ज्ञानात्मनाम् । अत एव च 'जस्स नाणाया तस्स दंसणाया नियमा अत्थि, जस्स दंसणाया तस्स णाणाया सिय अत्थि सिय णत्थि 'त्ति भजना पाक्षिकी गीताऽविगीतज्ञानरत्नाकरैः । पूर्वापरभावमनुसन्धायैव च प्रवृत्तमेतत्सूत्रम्, तेन केवलिनोऽर्वाग्ज्ञानवत्त्वेऽपि न क्षतिः । प्राधान्यमवलम्ब्य चैतस्य सूत्रे 'कइविहे णं भंते ! उवओगे पण्णत्ते ? । गोयमा ! दुविहे पण्णत्ते, तं जहा–सागारोवओगे य अणागारोवओगे य'त्ति क्रमः पठ्यते, न तु प्रवृत्तिक्रम एष एनयोर्नियतः । छद्मस्थमात्रस्य प्राग दर्शनं, पश्चादेव ज्ञानमुदयते यतः । इत्यलमतिप्रस्तुतेन ।

द्विभेदाश्चामी जन्तवः संसारिणो मुक्ताश्चेति । ये हि जगद्वैचित्र्यनिबन्धनतासिद्ध–विचित्रादृष्टपरिकरितमूर्त्तयः ते तादृशादृष्टबन्धनिधत्तनिकाचनोदीरणोदयनिर्जरासत्तापेक्षं यथायथं परिदृश्यमानचातुरन्तापारसंसारपर्यटनपरायणा इति संसरणशीलाः संसारिण इत्युच्यन्ते । अन्यास्तु पथ्यागदसेवनादिभिरातुरा इव रोगेभ्यो ये ज्ञानदर्शनचरणानुशीलनेन परिशाटितकर्मकश्मलतया कर्मद्वन्द्वनिःशेषविलयावाप्तस्वस्वभावाविर्भावाः पूर्वप्रयोग-बन्धच्छेदाऽसङ्गत्व–तथागतिपरिणामप्रयुक्तानन्तरसमयमात्रावाप्तगमनपरिणतजीवोपग्राहकधर्मास्तिकायपरिगतलोकान्तक्षेत्रलक्षणमुक्तिपदाः कर्माजवंजविभावमुक्तत्वेन मुक्ताः ते तथोच्यन्ते ।

अनेन ये मोहमदिरोन्मत्तताऽवाप्तविवेकनाशाः प्रलेपुः सर्वदर्शनसङ्ग्रहकारप्रभृतयः, तन्निरस्तम् । ते ह्याचख्युः जैनमन्तव्यमित्येवंविधं जात्यन्धरविरूपोल्लेखन्यायेन–'गत्वा गत्वा निवर्त्तन्ते चन्द्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूर्यादयो ग्रहाः, अद्यापि न निवर्त्तन्ते मुक्ता अलोकमागता' इति। तथा शारीरिकभाष्यवृत्तौ रत्नप्रभायां तावत् 'कर्मपाशनाशे सत्यलोकाकाशप्रविष्टस्य सततोर्ध्वगमनं मोक्ष' इति, तथा 'जीवास्तिकायस्त्रिविधः–कश्चिज्जीवो नित्यसिद्धोऽर्हन्मुख्यः, केचित् साम्प्रतिकमुक्ताः केचिद् बद्धा इति, पुनः अलोकाकाशो मुक्ताश्रय' इति। भामत्यामपि–'मोक्षस्थानमलोकाकाशः, तथा जीवास्तिकायस्त्रेधा–बद्धो मुक्तो नित्यसिद्धश्चेति'। आनन्दगिरिणापि–'जीवास्तिकायस्त्रेधा–बद्धो मुक्तो नित्यसिद्धश्च, तत्रार्हन्मुनिर्नित्यसिद्धः, इतरे केचित् साम्प्रतिकमुक्ताः, अन्ये बद्धा इति भेदः, तथा तदुपरि मोक्षस्थानमलोकाकाशः पुनः आर्हतमुनिप्राप्तिः सततोर्ध्वगतिर्वा मुक्ति'रित्यादि।

न चात्र जैनैर्वक्तव्यं, अनुक्तोपालम्भप्रकटनमात्रेणैव तेषां निग्रहस्थानदुर्गगर्त्ताप्रक्षेपभावात्। तैर्न विज्ञातं तत्त्वमस्माकमपि बालवेद्यमप्येतद्। आस्तामन्यन्महदित्येतावतैव प्रतिक्षेपः। यतो भण्यन्ते एव निग्रहस्थाने–'अविज्ञातं च० [न्याय०] इति निग्रहास्पदम्। अनभ्युपगमश्च पूर्वोक्तस्य तदुक्तस्य श्वेताम्बरदिगम्बरोभयमान्यतमतत्त्वार्थीयसूत्रकदम्बकात् स्पष्टतर एव। एतानि चैवं–'संसारिणो मुक्ताश्च'। कृत्स्नकर्मवियोगो मोक्षः 'तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात्'। 'पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथागतिपरिणामाच्च तद्गति'रिति 'लोकाकाशेऽवगाह' इति च। इत्यलमज्ञानामज्ञतोद्घट्टनेन पापानां कथयाप्यलमिति न्यायात्।

एवमेव पृथिव्यादीनां वाय्वन्तानां पुद्गलास्तिकायत्वेनाऽऽख्यानं यत् तेषाम्, तदपि स्वगृहरीत्यनुकरणमेव। तेषां पुद्गलास्तिकायस्य षोढात्वं व्याजह्रे तैः, तद्यथा–पुद्गलास्तिकायः षोढा–पृथिव्यादीनि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चत्वारि भूतानि स्थावरं जङ्गमं चेति । रत्नप्रभा–भामती–न्यायनिर्णयाख्यासु तिसृष्वपि व्याख्यास्वनुष्ठितं गड्डरिकानुकरणमसत्यवादगर्तापातविषमदशानुसरणमेव । न दुर्लभमेव च मिथ्यात्वमोहितमतिविभवानां तदिति न चर्च्यतेऽधिकम् । अनभ्युपगमश्चैतस्यापि पूर्वोक्तग्रन्थीयस्य 'संसारिणस्त्रसस्थावराः' 'पृथिव्यम्बुवनस्पतयः स्थावराः' 'तेजोवायू द्वीन्द्रियादयश्च त्रसाः' इति सूत्रत्रयस्य पर्यालोचनात् स्पष्टमेव विदितो भविष्यतीति । साधितं च समयाकरे पृथिव्यादीनां जीववत्त्वं सविस्तरमिति न प्रस्तूयतेऽत्राप्रस्तावे ।

तदेवं क्रमप्राप्तं जीवास्तिकायमाख्याय तुरीयम्, पञ्चमं तमाख्यातुकामा आहुः–'मुत्ता उण पुग्गला नेय'त्ति । तत्र मूर्च्छनं रूपादीनां समुच्छ्रयणं मूर्तिः-स्पर्शादिवत्ता, अत एव 'मूर्त्तिः काठिन्यकाययो'रिति अनुशशासुर्हेमसूरिपादाः । काठिन्यस्य स्पर्शविशेषत्वात्, तद्भावे चावश्यंभाविनो रूपादयः । स्त्रियां क्तिरिति क्तौ 'मूर्छा मोहसमुच्छ्रययो'रिति भौवादिकात् छलोपे 'आदित' इति इण्निषेधे इष्टरूपसिद्धिः । मूर्त्तिरेषामस्तीति मूर्त्ता–रूपरसगन्धस्पर्शवन्त इत्यर्थः । तथा च सूत्रम्–'स्पर्शरसगन्धवर्णवन्तः पुद्गला [तत्त्वा०] इति । यद्यपि 'शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवन्तश्च' इत्यनेन शब्दादीनामपि रूपादिसहगतत्वमेव, तथापि नैते नियताः, एषां स्कन्धतया परिणतेष्वेवाणुषु भावात्, नहि परमाणुष्वपरिणतेषु भवन्त्येते इति न नियता एते । अत एव च न प्रवेशिता लक्षणवाक्ये ।

न च वाच्यं पृथ्वीत्वपरिणतस्य पुद्गलसमुदायस्य भवतु स्पर्शरसगन्धरूपवत्त्वम्, परं जलादितया परिणतपुद्गलानां कथं तद्वत्त्वमिति ? ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतो नहि पुद्गला नियताः पृथ्व्यादीनां परिणम्याः, किन्तु ये ये यैर्यैर्गृहीत्वा स्वतया परिणम्यन्ते पृथिव्यादि–नामकर्मोदयोत्पन्नपृथ्व्यादिनामकर्मवद्भिर्जीवविशेषैः अन्नादिकमिव मनुष्यैः स्वशरीरतया तथा तथा ते व्यवह्रियन्ते, परिणामान्तरापत्तौ च न स्वभावोऽपगच्छति तेषाम्, व्यक्ताव्यक्तत्वे तु भवतो न विरुद्ध्येते अस्माकम्। तथा च वायोरपामद्भ्य औषधीनां च परिणामेन ‘यद् द्रव्यं यद्द्रव्यध्वंसजन्य’मिति नियमेन सर्वेषां स्पर्शरसगन्धवर्णवत्ता उपपद्यत एवेति न किञ्चिन्न्यायाननुगुणं विहायस्थूलबुद्धितामीक्ष्यते। पुनःशब्दो विशेषणे। विशेषयन्ति चैवं पूज्या अनेन यदुत–मूर्त्ता एव पुद्गलाः, ‘स्पर्शरसगन्धवर्णवन्तः पुद्गला’ इतिनियमात्, पुद्गला एव च मूर्त्ताः, ‘रूपिणः पुद्गला’ इति ‘नित्यावस्थितान्यरूपाणि’ धर्मादीनीति [तत्त्वा०] सूत्राच्च। नहि धर्माधर्माकाशजीवानां विद्यते रूपादीनां (मध्यात्) किञ्चित्। न च पुद्गलः कोऽपि तद्रहित इति। श्रुतिरपि च पारमार्थिकं जीवस्वरूपमनुवदन्ती एतदेवाह—

‘सहोवाचैतदक्षरं गार्गिब्राह्मणा अभिवदन्त्यस्थूलमनण्व ह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरबाह्यं न तदश्नाति कश्चने’ति (बृ. ३–२–८) तथा–

‘अशब्दमस्पर्शमरूपमव्ययं, तथाऽरसं नित्यमगन्धवच्च। अनाद्यनन्तं महतः परं ध्रुवं, निचाय्य तन्मृत्युमुखात्प्रमुच्यते’॥१॥ इति कठोपनिषदीयप्रथमाध्यायतृतीयवल्लीयपञ्चदशवृत्तादौ।

तथा मुक्तिकोपनिषद्यपि–शेषस्थिरसमाधानो मयि त्वं भव मारुते!। अशब्दमस्पर्शमरूपमव्ययं, तथाऽरसं नित्यमगन्धवच्च यत्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनामगोत्रं मम रूपमीदृशं, भजस्व नित्यं पवनात्मजार्तिहम् ॥१॥ इत्यादि। निश्चीयते च विद्वद्भिरेवंविधवचनकदम्बकात् स्वरूपत आत्मनो रूपादिराहित्यम्। पारिशेष्याच्च जडान्तर्गतानां पुद्गलानां तद्वत्त्वमिति युक्तमेव पुनरव्ययेन विशेषणम्। के ते? इत्याहुः– 'पुद्गला' इति।

तत्र 'पुदि' त्यव्ययं कुत्सायां प्रसिद्धमनुशासने। 'गॄत् निगिरणे' इति तौदादिकः, तस्माद् 'अच्' इति अचि 'युवर्णवृदृवशरणगमृद्ग्रहः'[५।३।२८] इत्यलि पुद्गल इति। 'न वा स्वरे' [२।३।१०२] इति ग्रो रो लश्च। तथा पुद्–कुत्सितं जडत्वादिकं गिरन्ति–प्रकाशयन्तीति पुद्गलाः। स्पष्टाश्चैते एव जडत्वेन। धर्माद्यास्तु तथाभूताः सन्तोऽप्यतीन्द्रियवेद्या इति न ते पुद्गलशब्दवाच्याः।

आर्षानुसारिणस्तु व्याख्यान्त्येवं यदुत–निरुक्तिसिद्धः पृषोदरादिसिद्धो वाऽयं पुद्गलशब्दः। तथा च पूर्यन्ते प्रदेशोपचयोपष्टम्भेन गलन्ति च प्रदेशापचयभावादिति पुद्गलाः। आद्यपक्षे 'श्रेयोदानादशिवक्षपणाच्च सतां मतेह दीक्षे'ति। भिनत्ति क्षुधमिति भिक्षुः, चयमुपचयप्राप्तमष्टविधं कर्म रेचयति–वियोजयतीति चारित्रमित्यादिवद् निरुक्तिः। अन्त्ये तु पृषोदरादित्वेन कारलोपो दागमे च रूपसिद्धिः। 'अच्' [५।१।४९] इति च कर्त्तर्यच्। मूर्त्ता इति च पुद्गलानां सिद्धये वाऽऽख्यातम्। यतो नहि विहाय नास्तिकमूर्धन्यं प्रत्यक्षापलापिनं शून्यवादिनो ज्ञानाद्वैतवादिनं ब्रह्माद्वैतवादिनं वा लोकायतिकादिः कोऽप्यपलपत्येनान् अध्यक्षसिद्धान् मूर्त्ता ह्येते इति कस्तानभ्युपगम्य व्यवहर्तुं स्यात क्षम इति नापलप्यन्ते। न च शक्या अपल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पितुमनात्मद्रुहा। ख्यायते च अत उपकारसमूहोऽमीषां यथा–'शरीरवाङ्मनःप्राणापानाः पुद्गलानाम्, सुखदुःखजीवितमरणोपग्रहाश्च [तत्त्वार्थ०]' इति। व्याख्यास्यामश्चाग्रतो गत्वा शब्दादीन् स्कन्धपरिणामान् शरीराद्यान् उपग्रहाँश्चैषां व्याख्यातशेषान्। न च वाच्यं कथमेषामाख्यातं मूर्त्तत्वमिति लक्षणम्, यत ऊचुः पूज्याः–'पुद्गला ग्रहणधर्माण' इति। सत्यमेव तदपि, यतो गृह्यन्त एव पुद्गलाः सर्वजीवैः। अत एव 'तणवोऽभाइविगारे'त्यादि प्रतिपादितं न विरोधमावहेत्। यतस्तत्र गृह्यत इति ग्रहणमिति धात्वर्थरूपे भावे एवानट्, तद्धर्मो येषां ते इति विगृह्य 'द्विपदाद्धर्मादन्' [७।१।१४१] इति अन्प्रत्यये ग्रहणधर्माण इति, संयोगवद् द्विष्ठत्वाद् ग्रहणस्यापि नैवं विरोधः। यद्वा–गृह्यन्ते इति ग्रहणानि 'भुजिपत्यादिभ्य' [५।३।१२८] इति कर्मण्यनट्। तथा च ग्रहणकर्मतापन्नत्वं तदेव धर्मो येषामिति ग्रहणधर्माण इति। ग्राह्यता च मूर्त्तिमत्त्वेनैव। न चामूर्त्तं गृह्यते, इति सत्यमेव तेषां तथात्वमेतद्विधत्वं चेति।

'ज्ञेया' इति च ज्ञानमुख्यताज्ञापनाय। परं नैतावता सर्वेषां ज्ञेयत्वमात्रमेव, यतः पुद्गलास्तावत् पररूपत्वाद् हेया एवाऽऽत्मश्रेयोविचारे प्रारभ्यमाणे, धर्मादयः केवलज्ञेयस्वरूपाः, जीवानां चोपादेयता तद्‌द्वारैव ज्ञानादिप्रभावप्रादुर्भावात्। न च हेया उपादेया वा पदार्था विना ज्ञानं हातुं वोपादातुं वा शक्यन्ते, इति युक्तमेव ज्ञेयतयाऽभिधानं समग्राणाम्। यद्वा–ज्ञेया इत्येतत्पदं पुद्‌गला इत्यनेन योज्यते, तत्रैव प्रयोगात्, तत्रैतत्प्रयोगश्च पुद्‌गलानां स्थूलबुद्धिज्ञेयत्वात्, तेषां यथावज्ज्ञाने जाते भविष्यन्ति शेषाः सुज्ञाना इति ज्ञापनाय। अत एव चाचाराङ्गे प्रथमाध्ययने षड्जीवनिकायपरिज्ञा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रवेदनमयेऽप्यादौ वनस्पतेस्तदनन्तरं पृथ्व्यम्बुनोः ततस्तेजसः तदनन्तरमेव वायोरिति सामान्येनोद्दिश्याऽऽद्य उद्देशे, क्रमेण षडुद्देशा व्याख्याताः । न चैषोऽनुक्रमोऽनानुपूर्वी च पूर्वोक्तादेव हेतोः । पुद्गलानां स्थूलबुद्धिज्ञेयता च रूपादिमत्तया स्पष्टैवेति । न चेदं विप्रतारकवचनं विपर्ययभूतं वा 'असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते' इति वचनानुसारि, न वा यथा ब्रह्मोपदेशेऽन्ययूथिकैः प्रतिपादितं शक्रायासुरेन्द्राय च—

यथा तद्होभये देवासुरा अनुबुबुधिरे ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानितीन्द्रो हैव देवानामभिप्रवव्राज वैरोचनोऽसुराणां तौ हा संविदातावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः ॥२॥ तौ ह द्वात्रिंशद्वर्षाणि ब्रह्मचर्यमूषतुस्तौ ह प्रजापतिरुवाच किमिच्छन्तावबास्तमिति तौ होचतुः य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघित्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति भगवतो वचो वेदयन्ते तमिच्छन्तावबास्तमिति ॥३॥ तौ ह प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेत्यथ यो यं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इत्येष उ एवैषु सर्वेष्वेतेषु परिख्यायत इति होवाच ॥४॥ सप्तमखण्डः ।

उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतमिति तौ होदशरावेऽवेक्षाञ्चक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुः सर्वमेवेदमावां भगव आत्मानं पश्याव आरोमभ्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आनखेभ्यः प्रतिरूपमिति ॥१॥ तौ ह प्रजापतिरुवाच साध्वलङ्कृतौ भूत्वोदशरावेऽवेक्षेथामिति तौ ह साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षाञ्चक्राते । तौ ह प्रजापतिरुवाच किं पश्यथ इति ॥२॥ तौ होचतुर्यथैवेदमावां भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृतौ स्व एवमेवेमौ भगवः साध्वलङ्कृतौ सुवसनौ परिष्कृताविल्येष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति तौ ह शान्तहृदयौ प्रवव्रजतुः ॥३॥ तौ हान्वीक्ष्य प्रजापतिरुवाचानुपलभ्यात्मानमननुविद्य व्रजतो यतर एतदुपनिषदो भविष्यन्ति देवा वाऽसुरा वा ते पराभविष्यन्तीति सह शान्तहृदय एव वैरोचनोऽसुराञ्जगाम तेभ्यो हैतामुपनिषदं प्रोवाचात्मैवेह महय्य आत्मा परिचर्य आत्मानमेवेह महयन्नात्मानं परिचरन्नुभौ लोकाववाप्नोतीमं चामुं चेति ॥४॥ तस्मादप्यद्येहाददानमश्रद्धानमयजमानमाहुरासुरो बतेत्यसुराणां ह्येषोपनिषप्रेतस्य शरीरं भिक्षया वसनेनालङ्कारेणेति संस्कुर्वन्त्येतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते ॥५॥ इत्यष्टमः खण्डः ।

अथ हेन्द्रोऽप्राप्यैव देवा नेतद्भयं ददर्श यथैव खल्वयमस्मिञ्छरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति ॥१॥२॥ स समित्पाणिः पुनरेयाय तँ ह प्रजापतिरुवाच मघवन् यच्छान्तहृदयः प्राव्राजीः सार्धं वैरोचनेन किमिच्छन् पुनरागम इति सहोवाच यथैव खल्वयं भगवोऽस्मिञ्छरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवाय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति ॥२॥ एव-मेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणि इति सहापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच ॥३॥ इति नवमः ।

य एष स्वप्ने महीयमानश्चरत्येष आत्मेति होवाचैतदमृतमभय-मेतद् ब्रह्मेति सह शान्तहृदयः प्रवव्राज सहाप्राप्यैव देवानेतद्भयं ददर्श तद्यद्यपीदं शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवै-षोऽस्य दोषेण दुष्यति ॥१॥ न वधे नास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्ती वा प्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीति ॥२॥ समित्पाणिः पुनरेयाय ते ह प्रजा-पतिरुवाच मघवन् यच्छान्तहृदयः प्राव्राजीः किमिच्छन् पुनरागम इति सहोवाच तद्यद्यपीदं भगवः शरीरमन्धं भवत्यनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति ॥३॥ न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्ती वा प्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोनुव्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षा-ण्युवास तस्मै होवाचाम ॥४॥ इति दशमः खण्डः ।

तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति सह शान्तहृदयः प्रवव्राज सहाप्राप्यैव देवानेतद्भयं ददर्श नाहं खल्वयमेवं सम्प्रत्यात्मानं जाना-त्ययमहमस्मीति नो एवेमानि भूतानि विनाशमपीतो भवति नाहमत्र भोग्यं पश्यामीति ॥१॥ स समित्पाणिः पुनरेयाय तं ह प्रजापति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुवाच मघवन् यच्छान्तहृदयः प्राव्राजीः किमिच्छन् पुनरागम इति सहोवाच नाहं खल्वयं भगव एवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति ॥२॥ एवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि पञ्च वर्षाणीति सहापराणि पञ्च वर्षाण्युवास तान्येकशतं सम्पेदुरेतत्तद्यदाहुरेकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाच ॥२॥ इति एकादशः खण्डः ।

मघवन् मर्त्यं वा इदं शरीरमात्तं मृत्युना तदमृतस्याऽशरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वा वसन्तं न प्रियाप्रिये स्पृशतः ॥१॥ अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन स्वेन रूपेणाभिनिष्पद्यन्ते ॥२॥ एवमेवैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्तः ॥३॥ अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेदेदमभिव्याहराणीति स आत्माभिव्याहाराय वागथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रम् ॥४॥ अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षुः स वा एष एतेन दैवेन चक्षुषा मनसैतान् कामान् पश्यन् रमते ॥५॥ य एते ब्रह्मलोके तं वा एतं देवा आत्मानमुपासते तस्मा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेषां सर्वे च लोका आत्ताः सर्वे च कामाः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापति-रुवाच प्रजापतिरुवाच ॥६॥ इति द्वादशः खण्डः ।

अत्र हि छान्दोग्योपनिषदि स्पष्टमेवाऽऽत्मस्वरूपं पिपृच्छोरिन्द्र-स्यान्यथान्यथोपदेशेनाभ्रान्तिपर्यवसानबोधोत्पादः । आसुरस्य तु स्पष्ट एवान्यथाबोध इति । न चात्र प्रयोजनं किञ्चिन् तथाविधाने इत्यादि-चिन्तया नात्र किञ्चिन् प्रयोजनम्, परं नात्र तद्वदन्यथान्यथाख्यान-मिति ज्ञापनाय 'ज्ञेया' इति । तथा च आदित एव पारमार्थिकं स्वरूपं पुद्गलानां व्याख्यायि अस्माभिः, ज्ञेयं च तत्तदनुसारेण च पुद्गला ज्ञेया इति पर्यबोध्याचार्यैः । जीवादीनां तु तद्वैपरीत्यात् सुबोधता पश्चादेवेति तत्त्वम् ।

अथ पुद्गलानां गुणाः परिणामा उपकाराश्च ये साक्षात् पारम्पर्येण वा पूर्वमुद्दिष्टाः, ते आख्येयाः । तत्र गुणपरिणामेषु स्पर्शरसगन्धवर्णाः सपरिणामाः संस्थानच्छायाऽऽतपोद्योतान्धकार-गतयश्च परिणामरूपाः प्राक् परिणामप्रतिपादनप्रस्तावे पर्यायलोका-धिकारे प्रतिपादिताः । शेषाः शब्दबन्धसौक्ष्म्यस्थौल्यभेदाः प्रति-पाद्याः उपकाराश्च सर्वेऽपि । तत्र शब्दस्य गुणत्वमूचिरे कैश्चिद्विप-श्चिद्भिः, आकाशं च तत्समवायिकारणतया प्रत्यपीपदन् ।

आहुश्च–शब्दो विशेषगुणः, चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्य-जातिमत्त्वात् स्पर्शवत्, शब्दो द्रव्यसमवेतो गुणत्वात् संयोगवत् इत्यनुमानेन द्रव्यसमवेतत्वे शब्दस्य सिद्धे, शब्दो न स्पर्शवद्विशेष-गुणः, अग्निसंयोगासमवायिकारणकत्वाभावे सत्यकारणगुणपूर्वक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्यक्षत्वात् सुखवत्, पाकरूपादौ व्यभिचारवारणाय सत्यन्तम्। पट-रूपादौ व्यभिचारवारणायाकारणगुणपूर्वकतेति। जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति। शब्दो न दिक्कालमनसां गुणः, विशेष-गुणत्वात्, नात्मविशेषगुणो बहिरिन्द्रियग्राह्यत्वात् रूपवत्। इत्थं च शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिद्धयति। न च वाय्व-वयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यम्। अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावादिति। तथा शब्दः क्वचिदाश्रितः गुणत्वाद् रूपवत्। न च शब्दस्य स्पर्शवदाश्रयः, स्पर्शासहकारित्वाद् बुद्धिवत्, न च कालाद्याश्रयः, बहिरिन्द्रियग्राह्य-त्वात् रूपवदिति परिशेषात् तत्सिद्धिरित्यादि।

अत्र तावद् गुणत्वसाधनाय यदभ्यधायि—चक्षुर्ग्रहणायोग्यबहिरि-न्द्रियग्राह्यजातिमत्त्वादिति, तदनैकान्तिकमेव। यतो गन्धपुद्गला वाय्वानीता नहि चक्षुषा गृह्यन्ते। न च बहिरिन्द्रियेण घ्राणेन न गृह्यन्ते, अस्ति च तादृशजातिमत्ता तेषामपि। न च विद्यते अत्रान्त-र्व्याप्तिर्या साधयेत् शब्दस्य तथात्वम्, अनुकूलतर्काभावात्। द्वितीय-मप्यनुमानं स्पर्शवद्विशेषगुणत्वाभावसाधकमपि व्यभिचार्येव, गन्धव-ह्यानीतगन्धपुद्गलगन्धप्रत्यक्षेण। तेषां हि गन्धो नाग्निसंयोगासम-वायिकारणको, न च कारणगुणपूर्वकप्रत्यक्षो वेति। न च तेनास्माकं कार्यसिद्धिः, असत्प्रयुक्तत्वदर्शनमात्रत्वादेतस्येति। तत्त्वतस्तु तार-मन्दादिविविधोपाधिमत्त्वाच्छब्दस्य द्रव्यतैवोदितुं युक्ता।

किञ्च—शब्दस्य गुणत्वे कथं न यावदाकाशं सम्भवः। नहि पृथिव्यादौ गुणराहित्यम्, अनुद्भूतत्वे च तस्य तत्र मानाभावः। न च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणस्य भवति गतिः, न च स्पर्शादिषु दृष्टापि। शब्दस्य तु सा विद्यत एव, अन्यथा श्रवणाभावप्रसङ्गात्। जलतरङ्ग–कदम्बगोलकन्यायेन शब्दोत्पत्तिरपि नैव गुणत्वानुगुणा, यतो यस्मिन्नेवावकाशेऽभिव्यञ्जकं तस्मिन्नेवोत्पद्येत गुणः, न चापसर्तुमलं स्यात् तिलतुपत्रिभागमात्रमपि सः, अन्यथा गुणनैयत्याभावप्रसङ्गात्।

अन्यच्च–गुणः सन् कथं निकटदूरादिभावेन ह्रासतां भजेत, कथं च महानल्पमुत्पादयेत्?। आस्तामन्यत्, गन्धपुद्गलानामिव धूमादीनामिव च कथं वायुवेगानुकूलप्रतिकूलताभ्यां गुणत्वे शब्दस्यानुकूलता–प्रतिकूलते सम्भवतः?। कथं च तीव्रशब्दविहितं बाधिर्यमपि स्यात् तथात्वे, न च तीव्रेणापि वायुनोत्पाद्यते बाधिर्यम्। न च पक्ष्मादिकमपि स्पन्दते। वायोस्तु स्वभाव एवैष–यत् स्पन्दयत्येव तादृशम्। न चोत्पत्तौ विनाशे वाऽवयवानुपलब्धेः कथं द्रव्यत्वम्?, कृशानोः प्रभाया वा तथाभावात्, न च न ते द्रव्यभूते। आस्तामेवमनुमानादिविचारेण। प्रत्यक्षेणैव तावच्छब्दस्य शब्दप्रतिबिम्बयन्त्रेण किं न प्रतिपद्यते शब्दस्य द्रव्यता?। तत्र हि चिरतरमपि शब्दास्तादृशा एव तारादिगुणोपेताः स्वरविशेषोपाधिसमन्विताः किं नेक्ष्यन्ते? न चैतद् गुणत्वे तस्य भवति युक्तियुक्तम्।

अन्यच्च–विद्युद्यन्त्रेण शब्दानां गमागमौ नावलोकितौ दूरतरादपि प्रदेशाद्विद्युद्यन्त्रालयेषु? न चेदवलोकयन्तूभयमप्येतत् शब्दप्रतिबिम्बीयं शब्दगमागमिकं च, स्थाने स्थाने भावात्तस्य। कथं च गुणत्वे तस्य कोष्ठाद्युत्पन्नवायुनानुगुण्यम्, तस्य द्रव्यत्वात् महाप्रयत्ने महतोऽल्पं चाल्पस्योत्पादोऽपि वायुद्वारा जायमानः कथमपवदते द्रव्यताम्। न च वायोः स गुण इति कथ्यते, न च विद्यतेऽप्ययमौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा, यावद्वाग्व्वनुपलम्भात् । यावल्लोकव्यापिनी हि शब्दवर्गणा, परं यदा तथा तथा संयोगानुकूल्यं तदा तथा तथोत्पद्यन्ते शब्दाः । न चैवं द्रव्यानुगुण्येन प्रभादेरपि, तथात्वादेवानेकधा चोत्पद्यन्ते शब्दाः ।

स्थूलन्यायेन च शब्दानां द्वैविध्यं कीर्त्यते-भाषा ध्वनिश्चेति । तत्र भाषायां तावदतिशयितो विचारः । स च भाषारहस्यात् श्रीकाशीस्थनिखिलविबुधविजयावाप्तन्यायविशारदपदानन्तरसमकालविहितानेकसत्तर्कपचेलिमबुद्धिविभवादर्शायमानसदालोकग्रन्थशतविधानावगतहरिमहिमप्राज्यतरप्रभाववितीर्णविबुधततिन्यायाचार्यपदप्रतिष्ठितश्रीमन्महोपाध्याय-यशोविजयगणिदृब्धादवसेयो विस्तरार्थिभिः । संक्षेपश्च स्थानाशून्यार्थं निरूप्यते ।

यथा-जत्थ य जं जाणिज्जा निक्खेवं निक्खिवे निरवसेसं । जत्थ य न जाणिज्जा चउक्कयं निक्खिवे तत्थ ॥१॥ इत्यनुत्तरपारमर्षवचने न्यूनतोऽपि निक्षेप्तव्या एव चतुर्धा पदार्था इति पठितेर्नामादिचतुष्कस्य व्यापिताभिधानात् भाषाया अपि नाम-स्थापना-द्रव्य-भावभेदेन विधातव्य एव निक्षेपः । न च वाच्यं कथं व्यापकत्वं चतुर्णां भवेदेतेषाम्, यतो जीवाजीवद्रव्यपदादिनिक्षेपविधानव्यग्रतायां न तावद् द्रव्यनिक्षेपोऽनुगतो भवति, अप्रज्ञापनीयेषु च 'पण्णवणिज्जा भावा अणंतभागो उ अणभिलप्पाण'मित्यादिवचनात् नामनिक्षेपस्य तदभावात्, तेषु स्थापनायाः तथा परमाण्वाकाशसिद्धादिष्वनाकारेष्वपि चाकाराभावात्तस्याः, अवध्यादीनां चाद्रव्यरूपाणामपि द्रव्यादिनिक्षेपस्य चाप्रवृत्तेः तेष्विति ।

यतो जीवादिषु ज्ञशरीरभव्यशरीरव्यतिरिक्तनोआगमद्रव्यजीवादीनामभावः, जीवादीनामसतामुत्पादाभावाद् । अत एव तादृश-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थले प्रज्ञास्थापितगुणवियुक्तं तत्तद् द्रव्यं तथा तथा गीयते पारमर्षे, न तु सर्वथा द्रव्यनिक्षेपाप्रवृत्तिः, ज्ञशरीरभव्यशरीराभ्यां नोआगमस्याऽनुपयुक्तज्ञातारमपेक्ष्याऽऽगमस्य द्रव्यतः प्रवृत्तः। व्यतिरिक्तमपि च 'अर्पितानर्पितसिद्धे'रिति परमपुरुषवचनाद् गुणाविवक्षायां पूर्ववत्तत्तद्वस्तुषु वर्त्तमानमनुसन्दधीत द्रव्यनिक्षेपम्, यतो नास्त्येव द्रव्यगुणयोः सर्वथाऽभिदा, यया न तथा कल्पयितुं शक्यम्, गुणशून्यद्रव्याभावाच्च 'प्रज्ञास्थापित'मित्युक्तेरिति गुणवत्त्वलक्षणभावद्रव्यस्य तत्परिणामत्वाच्च 'भूतस्य भाविनो वे'त्यादिलक्षणसङ्गतिः। तथाऽप्रज्ञापनीयेष्वपि पदार्थप्रमेयत्वादीनां सत्त्वमस्त्येवाप्रज्ञापनीयत्वाभिधानमपि, तन्न तत्र नामाभावः। विशेषनामाभावश्च तत्र न नामनिक्षेपव्यापकताघातकः। स्थापनाया अपि तेष्वन्येषु चानाकारेषु तत्तदाधारक्षेत्रानुकारेण घटाकाशस्येव घट इव तथा तथा तत्र तत्राकारस्योल्लेखितुं शक्यत्वात् नाभावः। आकाशस्यापि स्वयं आकृतिमत्त्वाभावेऽपि संस्थानेनोल्लेखयितुं केनापि शक्यत्वमेव। अवध्यादीनां च गुणगुणिनोरभेदत्वानुगत्या तद्वद्द्रव्यापेक्षया द्रव्यादिनिक्षेपप्रवृत्तेः नाव्यापकता योग्या शङ्कितुं बुद्धिमतां कथञ्चिदपि।

चतुर्णां नयविभागपर्यालोचनायां च 'भावं चिय सद्दनया सेसा सव्वेवि इच्छन्ति सव्वणिक्खेवे' इति वचनात् 'अहिगारो तिहि उ ओसण्ण'मिति वचनाच्च कालभेदेनाप्यनुसन्धेय इति न तद्विषयो विमर्दः। तत्र द्रव्यनिक्षेपे 'दव्वे गहणनिसरणं परघे'ति वचनाद् भाषाद्रव्याणां ग्रहणं निसर्गोऽनन्तरं पराघातश्चेति। तत्र निसर्गो भाष्यमाणावस्थाया अर्वाक्तनो 'भासिज्जमाणी भासे'ति वचनात्।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पराघातश्च विषमश्रेणिस्थशब्दपुद्गलानां पराघातस्तथापरिणतैर्यतो भवेत् पश्चात्तेऽपि तथा। भावे च 'भावे तिहा सुए दव्वे चरणे 'त्ति वचनात् श्रुतद्रव्यचारित्रविषया। तत्रापि द्रव्ये 'दव्वे सच्चेयरमिस्सामीसया भासे 'ति वचनात् चतुर्धा द्रव्यभावभाषा। न च वाच्यं कथं भावभेदविवरणे द्रव्यभाषाया उपन्यास इति। तत्र द्रव्यपदार्थतया भाषाया द्रव्यनिक्षेपेण अन्वाख्यानम्, अत्र तु भाषापरिणतानां तत्पुद्गलानां विचारः। तथा च भाषापरिणामापेक्षं भावत्वम्। आराधनाविराधनापेक्षालक्षणभावापेक्षया तद्द्रव्यापेक्षया च द्रव्यत्वमिति परस्परविरुद्धता न। कथं तर्हि सत्यत्वादिव्यपदेश इति चेद्, वाच्यवस्त्वपेक्षया। आराधना-विराधने तु 'सद्दिट्ठी उवउत्तो भासइ सच्च'मिति नियमानुरोधेन ज्ञातव्ये। सत्या तावद् दशधा भाषा—

'जणवय-सम्मय-ठवणा-णामे रूवे पडुच्च सच्चे य। ववहार-भाव-जोए दसमे ओवम्मसच्चे य' ॥१॥ इति तस्या भिद्यमानत्वाद्दशधा। तत्र दवरकादेर्मङ्गलमिति, कुशेशयस्य पङ्कजमिति, जिनप्रतिमायाः जिन इति, अधनवतोऽपि धनावह इति, प्रतिसेविनोऽपि प्रकटं यतिवेषवतो यतिरिति, बदरामलकूष्माण्डीनामणुर्महान्वेति, दह्यमानेषु तृणेषु दह्यते गिरिरिति, पञ्चवर्णेष्वपि बलाकाशरीरपुद्गलेषु सत्सु श्वेता बलाकेति, अपरावर्तितेऽपि देवदत्तादौ छत्रयोगात् छत्रीति, क्षुल्लकस्य सरोवरमात्रस्यापि जलाशयस्य जलधिरिवेत्याद्योपमा च क्रमेण जनपदादिसत्यतयोदाहार्याणि। यत उच्यते—

'मंगलपंकयपडिमा धनावहो साहु सुहुम डज्झइ य। सेयबलाया छत्ती जलहि उवमा अणेगविहा ॥१॥ रूपकादपि चोपमामूलत्वात्तदन्तर्गतमेवावसेयम्। आहरणाद्या अप्युपमाभूता एव, पूर्वोक्तहेत्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नतिक्रमादिति । तत्र कल्पितोदाहरणे चतुर्धा अपायोपाय–स्थापना–प्रत्युत्पन्नविनाशभेदाच्चतुर्धाऽऽहरणम् । अनुशिष्टयुपलम्भ–प्रश्न–निश्राभेदात् चतुर्धा तद्देशः । अधर्म–प्रतिलोमात्मोपन्यास–दुरुपनीत-भेदात् चतुर्धा तद्दोषः । तद्वस्तु–तदन्यवस्तु–प्रतिरूपवस्तु–कारणोपन्या-सभेदात् चतुर्धोपन्यास इति षोडशाऽवगन्तव्या भेदाः । सर्वोऽप्येत-द्विषयो वचनविसरः सत्य एव, उपमाभेदत्वादेतेषाम् । तथा चोच्यते–

'कप्पिय–चरियंति दुहा वा उवायठवणपच्चुप्पण्णगमो । आहरणे चउहाइदुगणुसट्ठिलंभोपसिणनीस्सा ॥१॥ आदिद्विकमपायोपायलक्ष-णमाहरणद्वयं द्रव्यक्षेत्रकालभावभेदाच्चतुर्धेति । चउहाइदुगत्ति ।

तद्देसे तद्दोसे अहम्मपडिलोम अप्पदुरुवणीए । उवणासे तव्वत्थु तयण्णपडिरूवकारणओ ॥ सोदाहरणं चाख्यायन्त आहरणादय एवं सप्रभेदाः–यथा–दव्वावाए दोन्नि उ वाणिगा भायरो वहनिमित्तं । वहपरिणएक्कमेक्कं दहंमि मच्छेण निव्वेओ ॥१॥ खेत्तंमि अवक्कमणं दसारवग्गस्स होइ अवरेणं । दीवायणो य काले भावे मंडुक्किया खमणो ॥२॥ एमेव चउवियप्पो होइ उवाओवि तत्थ दव्वंमि । धा-उव्वाओ पढमो णंगलकुलएहिं खित्तं तु ॥३॥ कालोवि नालियाइहि होई भावंमि पंडिओ अभओ । चोरस्स कए णट्टिय वुड्ढकुमारिं परिकहिंसु ॥४॥ ठवणाकम्मे एक्कं दिट्ठंतो तत्थ पुंडरीयं तु । अहवा वि सन्नढक्कण हिंगुसिवकयं उदाहरणं ॥५॥ सव्वभिचारं हेउं सहसा वोत्तुं तमेव अन्नेहिं । उववूहइ सप्पसरं सामत्थं वप्पणो नाउं ॥६॥ मार्गप्रभावनाबुद्ध्या मार्गोपभ्राजनाप्रमार्जनबुद्ध्या वा कुत्सितहेतो-रपि स्वसामर्थ्यसद्भावे सति समर्थनपरवादिवृत्तान्तनिवेदनपरमे-तत् । होंति पडुप्पन्नविणासणंमि गंधव्विया उयाहरणं । सीसो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वि कत्थइ जइ अज्झोवज्जेज्ज ता गुरुणा ॥७॥ वारेयव्वो उवाएणं' ति पादमेतत्। अतोऽमतः सर्वनास्तिकनिराकरणप्रस्तावो द्रव्यानुयोगसम्बद्ध इति।

आहरणं तद्देसे चउहा अणुसट्ठि तह उवालंभो। पुच्छा निस्सावयणं होइ सुभद्दाणुसिट्ठीए ॥८॥ साहुकारपुरोगं जह सा अणुसासिया पुरजणेणं। वेयावच्चाईसु वि एव जयंते वुहेज्जत्ति ॥९॥ अत्र हि अनुशासिता–प्रशस्ता तादृक्छीलभरगुणोपबृंहणेन सन्मानप्रार्थनागोचरीकृता वेति। यतः श्रीसूरिपादाः–'अनुशास्तिः पुनर्लोकापवादे प्रार्थनेऽपि चे'ति। अपिना चाऽत्र शिक्षादिप्रसिद्धार्थसङ्ग्रहः। अनुशस्तिर्वा, उभयत्रापि प्राकृते तस्या अपि क्तविधाने नामधातुं कृत्वा भवत्येवैतद्रूपम्। पुच्छाए कोणिओ खलु णिस्सावयणंमि गोयमो होइ।

अथ तद्दोषाहरणानि–पढमं अहम्मजुत्तं पडिलोमं अत्तो उवन्नासो। दुरुवणीयं च चउत्थं अहम्मजुत्तंमि नलदामो ॥१०॥ पडिलोमे जह अभओ पज्जोय हरइ अपेहिओ संतो। अत्तउवण्णासंमि य तलायभेयंमि पिंगलो थवई ॥११॥ अणिमिसगेण्हणभिक्खुग दुरुवणीए उदाहरणं ॥१२॥ तव्वत्थुगंमि पुरिसो सव्वे भमिऊण साहइ अपुव्वं। तय अन्नवत्थुगंमि ताइं खाइं ति किं होइ ॥१३॥ तुज्झ पिया मह पिउणो धारेइ अणुणयं पडिनिभंमि। किं नु जवा किज्जते जेण मुहाए न हेऊए ॥१४॥

हेतुभेदश्चायमपि चतुर्धा, यदाहुः–जावग-थावग-वंसग-लूसगहेऊ चउत्थो उ। उब्भामिया य महिला जावगहेउंमि उंटलिंडाइ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोगस्स मज्झजाणण थावगहेऊ उयाहरणं । सा सगडतित्तोरा वंसगंमि होई उणायव्वा । तपुसगवंसगल्लसगहेउंमि य मोयओ य पुणो ।

असत्यायास्तु भाषाया दशधात्वं सदृष्टान्तमेवं–कोहे १ तं मे न पुत्तो, माणे २ धणवं, कवडि ३ इंदो य । लोहे ४ पुण्णमपुण्णं, तुम्हं दासो अहं पिम्मे ५॥ दोसे ६ जिणो न सव्वो, हासा ७ दिट्ठं, अतेणगो तेणो भयओ ८ अक्खाइए ९ कूडकहा चोर उवघाए १०॥२॥ अथवा सद्भूतापलापासद्भूतोद्भावनार्थान्तरवाद-गर्हावाक्यभेदेन चतुर्धा मृषावादः । आद्ये–नास्ति जीवो, न पुण्यपापे, न परलोको, न निर्वृतिरित्यादि । द्वितीये सर्वगत आत्मा अङ्गुष्ठमात्रो वा, सकर्तृकं क्षितिक्षितिधराऽङ्कुरादि, अनादिशुद्धः सिद्ध इत्यादि । तृतीये तमोऽभावरूपम्, शब्दो गुणो, धर्माधर्मौ गुणावित्यादि, यद्वा–व्यतिरिक्ता गुणाः, व्यतिरिक्तं सामान्यं, विशेषाश्चापि तथाविधाः समवाय इति द्वितीये । सर्वगत आत्मा इत्यादि च सर्वं तृतीये । तुर्ये तु परकीयाधमजन्ममर्मकर्माद्युपदर्शनवाक्यमिति चतुर्धा मृषा । यदुच्यते–सब्भावासब्भावत्थंतरगरहा उ वा मुसत्ति ।

तृतीयो भाषाभेदो मिश्र इति । स चापि दशधैव, यदाह–मीसा उप्पन्नविगमुभयजियजिउभयणंतेयरद्ध अद्धद्धत्ति । तत्र दशसूत्पन्नेषूत्पन्नाः पञ्चदशेति वदतो दशाधिकानामनुत्पन्नत्वाद्दशानां चोत्पन्नत्वाद् । एवमग्रेऽपि । विगमे यथा अष्टसु मृतेषु मृता द्वादशेति वदतः । द्वयमेतयोरयथातथं वदत उभयमिश्रता । उपलक्षणं चैतदन्यसंयोगभङ्गानाम् । जीवानुद्दिश्य पञ्चदशेमा इति वदतः । तथा जीवान् तथैवोभयाँश्चैतान् अन्यथा वदतः । अनन्तकायिकाश्च ते, येषामेकत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तनौ सहैव श्वासादि विदधाना अनन्ता जन्तवः तिष्ठन्ति। परे प्रत्येकाः तेषां चान्यथाख्यानम्। तथाऽद्धा विशिष्टो दिवसादिलक्षणः कालः, अद्धाद्धा च प्रहरादिः, इत्येवमेतेषां मीलने दशधैव मिश्राख्यो भेदो भाषायाः।

चतुर्थश्च असत्यामृषाख्यो भेदः। तत्रापूर्ववस्तुविधेयत्वान्न सत्यादित्वम्। तथा च पूर्वोक्तत्रयवैलक्षण्यं लक्षणमस्य। भाषा चासावपि दशधैव, यदाह—आमंतणि आणवणी जायणी पुच्छणी य पण्णवणी। पच्चक्खाणी इच्छा अभिगहियसंकपयडन्ना ॥१॥ इति। देवदत्त! इत्यादि सम्बोधनविधिना सम्बोधने आद्या। द्वितीया च सौम्य! इदं कुर्वित्याज्ञापनमाज्ञापनी। इयमपि सहिष्णवसहिष्णुत्वमवेत्य, अन्यथा वदतस्तु मृषाभूतैव। इदं देहीति याचनामयी। कथमिदमित्थमिति प्राश्निकी च पृष्टस्वरूपं व्याकुर्वतः, सति प्रश्ने गमनादिभवे चोभे एते इति न सत्यादिना गतार्थताऽनयाः। इष्टे याचिते प्रतिषेधो निषेधाख्यानं प्रत्याख्यानिकी। कस्मिँश्चिद्विषये पृष्टे सति यथेच्छमिति व्याकरणमिच्छानुलोमिकीच्छेति। पृष्ट एव विषये कस्मिँश्चिदिदमेव कार्यमित्यभिगृहीता, अन्या चेतरा। भेदश्चास्या इच्छानुलोमाया उभयत्रापीष्टकारणतादिदर्शनेन समाऽऽयव्ययतादर्शनादेकतरानिर्धारणेनेति ज्ञेयम्। शङ्कायुता यथा—मन्ये भविष्यति वस्त्विदमन्यदपि वेति। प्रकटा च स्फुटार्थवाचिनी। इतरा तु कारणादिवैचित्र्येणेति दशधाऽसत्यामृषा, या व्यवहारभाषेत्युच्यते।

भाषे अत्राद्यान्तिमे व्यवहारेणाराधनी, यदाश्रित्योच्यते—'चरणे आइम अन्ते 'ति चारित्रभाषामाश्रित्य। तत एव च 'दो न भासिज्ज सव्वसो 'त्ति पारमर्षमपि। तत्त्वतस्तु सर्वासामपि गुणागुणोत्पत्त्या·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शनुसारेणैव सत्यादित्वम्, यदाश्रित्योच्यते–' जह गुणवुड्ढी तहा भासे 'त्ति । परमार्थतः तस्या एव सत्यत्वात्। पूर्वोक्तभेदयोराराधनी-भाषात्वेनाख्यानं व्यवहारानुरोधेनेति । सत्यादिव्याख्यानं चैवम्–' सच्चा हिया सयामिह सन्तो मुणओ गुणा पयत्था वा । तव्विवरीया मोसा मीसा जा तदुभयसहावा ॥१॥ अणहिगया जा तीसुवि सद्दो च्चिय केवलो असच्चमुस 'त्ति । स्पष्टं चैतत् पूर्वोक्तानुशीलने इति ।

ध्वनिश्च तत-वितत-घन-शुषिरादिभेदेन वाद्यचातुर्विध्यात् चतुर्धा । जातिभेदेनैवं भेदविधिः, अन्यथा तु नैव वाद्यानामियत्ता । सर्वेप्येते ध्वनयः पूर्वोक्ताः सत्यादिका देशभेदेन शतशो वा भिन्ना भाषा वा । यतः अधुनातनेऽपि ज्ञाताः सन्त्येव व्यवहारे सप्तशती भाषाणाम् । सापि स्थूलन्यायेनैव, अन्यथा तु प्रतिद्वादशक्रोशि परिवर्त्तत एव भाषा । अत एव च देशविशेषादपभ्रंशो भवति। प्रतिपाद्यते च भूरिभेदो ह्यपभ्रंश इति । यद्यपि लिपिविधानं तन्न्यूनभेदं तथापि शतशः तस्या अपि विधानानि । न च वाच्यं परमागमप्रतिपादिता अष्टादश लिपय इति कथमुच्यते शतश ? इति । यतस्ते मूलभेदतया लिपिभेदा व्याख्याताः, मूलभेदस्य च शतश उत्तरभेदा भवन्तीति न किञ्चित्तत्र नोद्यम् । आर्यलिपिभेदा एते तथापि न ता अत्राधिकार्याः, शब्दाधिकारत्वात् तासां तु सङ्केतग्राहकत्वात् इति केचित्, तन्न, अनार्यलिपीनामपि तारुष्क्यादीनां तत्र परिपठितत्वात् । सर्वमपि चैतच्छब्दविधानं पुद्गलपरिणाम एव ।

तथा बन्धः–स्कन्धत्वपरिणतिः । सा च संयोगविशेषेण भवति चासौ पुद्गलानाम्। स्वयं स्निग्धा हि केचित् परमाणवः, केचिच्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रूक्षाः । तत्रापि यथा शीतोष्णयोर्मानं व्यावहारिकमंशादिना क्रियते पारदादियन्त्रेण, तथा ज्ञानिभिर्दृष्टाः स्निग्धरूक्षयोरंशा य एवैकगुणाद्यनन्तगुणान्तेन उच्यन्ते । बन्धस्तावत् स्निग्धरूक्षत्वात् पिष्टपानीययोरिव । तत एवोच्यते–' स्निग्धरूक्षत्वाद् बन्ध ' [तत्त्वा०] इति । परं द्वयोः सतोरपि यदि एकगुणावेव तौ द्वयोः परमाण्वोः स्याताम् , न तदा बन्धः, तच्छक्तिविकलत्वात् । यत उच्यते–' न जघन्यगुणानाम् ' [ तत्त्वा० ] इति । एकस्मिँश्च परमाणौ न स्निग्धरूक्षाख्यस्पर्शयुगलम् । ततश्च यदि विरुद्धस्पर्शयोः स्यात् समायोगो भवेद् बन्धः । तथा स्निग्धाऽस्निग्धयो रूक्षाऽरूक्षयोश्च न भवेद् बन्धः यदि स्यात् समगुणता । यथा पञ्चगुणस्निग्धो नायाति बन्धं तावत् स्निग्धेन, पञ्चगुणरूक्षो वा तावद्रूक्षेण ।

ननु किमेतद्यावत् पूर्वमेव ' स्निग्धरूक्षत्वाद् बन्ध ' इत्यभिधानेन प्रतिहतमेवैतत् समानभावबन्धनमिति चेत् । सत्यम्, परं परमाण्वपेक्षयैवमेवैतत्. परं स्कन्धापेक्षया केषाञ्चित् परमाणूनां विशिष्टस्निग्धतोपेतत्वं, केषाञ्चिन् मन्दस्निग्धता, केषाञ्चिद् रूक्षतौत्कट्यं, केषाञ्चिच मन्दरौक्ष्यं यत् समुदितं सत् परिणतमन्यान्यतया तदपेक्ष्येदं विशेषवाक्यं स्यादेव । यद्वा–नहि परमाणवः समग्रा समस्निग्धरूक्षभावाः, यत उच्यते भावापेक्षया परमाणूनामेव षट्स्थानपतितत्वं सप्रदेशाप्रदेशत्वं चेति । प्रथमं सामान्यमभिधाय विशेषाभिधानं मनसिकृत्य निषेधविशेषोऽयमुच्यते, तथा चोचुः परममुनयोऽपि–' गुणसाम्ये सदृशानां ' न बन्ध इति तु प्रकृतम् । तत्र गुणा एकगुणत्वादिका अंशस्थानीयाः, सादृश्यं च स्निग्धरूक्षत्वजात्या, निषेधश्चायं यं विशेषमाश्रित्याभिहितः, स चायं यद् द्व्यधिकांशानां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परस्परं भवत्येव बन्धः । यथा पञ्चगुणस्निग्धस्य परमाण्वादेः सप्तगुणस्निग्धेन तेन, तथा पञ्चगुणरूक्षस्य तस्य सप्तगुणरूक्षेण तेन, न्यूनाधिकस्निग्धरूक्षताभावाद् भवत्येव बन्धोऽत्र । अत एव ' वेमायाए बन्ध ' इत्युच्यते । प्रादुष्क्रियते च सङ्ग्रहकारैः–' द्व्यधिकादिगुणानां तु ' [तत्त्वा०] इति, तुशब्देन अत्र पूर्वप्रक्रान्तं निषेधं व्यावर्त्य विधिं निर्दिशति । इत्थमेव चैकस्मिन्नप्याकाशे विविधभावपरिणताः परमाण्वाद्या अवस्थातुं शक्नुवन्त्येव । गुणापेक्ष एव यतो बन्धविधिः । अवस्थानं च तथा ' एगेण वि से पुण्णे दोहि वि पुण्णे सयंपि माएज्जा, कोडिसएणवि पुण्णे कोडिसहस्संपि माएज्जा ' इति परमागमवचनात् स्पष्टमेव । न च वाच्यं स्कन्धतया परिणतानां परमाणूनां प्रदेशापेक्षयैतदिति । एवं सत्यनन्तानामनन्ताणुकस्कन्धानाम् अनन्तानाम् असङ्ख्याताणुकस्कन्धानां तथा सङ्ख्याताणुकादीनां तावतामेव तदधिकानां चाणूनां पृथगवस्थानमेव न सम्भवेल्लोके, लोकाकाशस्यैव तावदसङ्ख्यातप्रदेशवत्त्वाभिधानात् । तथा च यथोक्तस्यैव बन्धविधेरभ्युपगम एवोपपद्यते तत्, विचित्रपरिणामत्वाद् बन्धाऽबन्धयोर्द्वयोरपि भावोपपत्तेः । परिणामश्चायं बन्धाख्यः स्निग्धरूक्षत्वादिगुणजनितः, शब्दानन्तराख्यानं च शब्दानामपि तथैवोपपत्तेः । नहि केवलः शब्दवर्गणात्मकः परमाणुः, न वाऽपरिणतः स्कन्धतया तथाभावेनोपपद्यते इति ज्ञापनाय ।

अनेन ये केचित् स्निग्धा रूक्षाश्च परमाणव एव, न तु पुद्गलगुणभूते स्निग्धरौक्ष्ये इति प्रतिपादयन्ति, ते निरस्ताः । प्रष्टव्यास्ते तावत्तत्र यद् ये स्निग्धा रूक्षा वा परमाणवः ते कथं विभक्ताः स्युः, कथं च तेषां स्निग्धा इति रूक्षा इति व्यपदेशः ? । स्निग्धत्वरूक्षत्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निबन्धनो हि सः। न च विनाङ्गीकारं गुणत्वेन तयोः तथासम्भवो यथा लोकानां तथाऽन्येषामपि तथाभावे को नु विरोधः। सति च बन्धे भवति परिणामान्तरम्। यत उच्यते–'बन्धे समाधिकौ पारिणामिकौ' [ तत्त्वा० ] इत्येतच्च पर्यायलोकाभिहितवर्णादिपरिणामानुसारेणावगन्तव्यमिति नाऽत्राऽस्य विमर्दः।

बद्धाश्च पुद्गला द्विविधा भवन्ति–सूक्ष्माः स्थूलाश्च। सूक्ष्मभावापन्नाः केचित् स्कन्धाः तिष्ठन्ति, यतोऽवगाहन्ते तेऽनेकाः एकस्मिन्नाकाशप्रदेशे पूर्वप्रतिपादितरीत्या। यथाहि–समाविशन्ते कर्षशतं सुवर्णानामेककर्षप्रमितपारदे विचित्रभावपरिणत्या, तथतदप्यनुसन्धेयम्। तथा केचिद् बादरभावमागता घटपटादिवदिति न तैरवगाढे नभःप्रदेशे अन्येषां तथाविधानामस्थाने विरुद्धता। अत एवोच्यते परमकारुणिकसङ्ग्रहकारेण यथा–'भेदसङ्घाताभ्यां चाक्षुषा' [ तत्त्वा० ] इति। श्रद्धेयं चेदं पारदर्शकस्यापि काचस्य चूर्णनापारदर्शकतादर्शनाद्, मृदोऽपि तथापरिणत्या काचत्वोत्पादात् प्रत्यक्षावेक्ष्यमाणात्। यतस्तत्र स्थिता अवान्तरे दृष्टिप्रतिबन्धकतामियुः केचित्, केचिच्च प्रतिबन्धका अपि विपरीतभावेन परिणमन्ते। तथाऽत्रापि भेदसङ्घाताभ्यां चाक्षुषाचाक्षुषत्वे इति न सम्यग्दृशां सम्यग्दृशां यथार्थावगतिविरहः। तथा च सूक्ष्मत्वं च पुद्गलानामेव परिणामः।

ननु भवतु स्थूलत्वं पुद्गलानां परिणामः, परं सूक्ष्मत्वं कथं? यतस्तत्तु परमाणुष्वपि विद्यत एवेति चेत्। सत्यं, नह्यनादितः कोऽपि परमाणुः तद्रूपेण तिष्ठति। यतो भवत्यसङ्ख्यकालानन्तरं परमाणूनामपि संयोजनम्, अभूवँश्च तानत्यतीते काले संयुक्तपूर्वाः तथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिणामे च न तेषां सूक्ष्मत्वमिति । न स्पर्शादिवदस्य स्वाभाविकत्वं किन्तु पारिणामिकत्वमेव । यद्वा—नह्यत्र सूक्ष्ममात्रता विवक्षिता किन्तु सूक्ष्मपरिणतिः, यया स्कन्धीभावमापन्नाः । आपन्ना अपि स्कन्धा नावगमं स्वस्योत्पादयेयुः, न चावगाहं निरुन्ध्युरिति । स्थौल्यमपि च यावत्तथास्कन्धपरिणति अवतिष्ठते, विनश्यति च ततः परम् ।

न च वाच्यं 'नासतो जायते भावो नाभावो विद्यते सत' इति नियमात् कथमसतोरेव सौक्ष्म्य–स्थौल्ययोरुत्पादो विनाशो वा, येन स्यात् पारिणामिकत्वमनयोः, अन्यथा तु तयोः स्वाभाविकत्वस्वीकारावश्यकात् इति । यतो नास्त्येवासत उत्पादः सतो नाशश्च । अत एव न सर्वथा अणुषु स्थौल्यासत्त्वं, स्कन्धेषु च सौक्ष्म्यासत्त्वं वोपेयते, तत्तद्द्रव्याणामेव तथा तथापरिणामात् । न च पर्याया द्रव्यतः पृथग्भूताः । यतः सर्वथाऽसन्त उत्पद्येरँस्ते विनश्येयुर्वा । येषामेव सौक्ष्म्यं तेषामेवेतरत्, येषामेव च स्थौल्यं तेषामेवेतरभावश्च । न चैवमस्त्यभ्युपगमो—यत् परावर्तनमेव न, तथाहि कार्यमात्रापलापप्रसङ्गश्च न विनिवारयितुं शक्येत ।

तथा भेदो नाम परिणामस्तत्र भेदो विभागः । स चानेकधा भिद्यमानोऽपि स्थूलभेदेन पञ्चधा कीर्त्यते । ते च खण्ड–प्रतर–चौर्णिको-त्करिका-नुतटिकाख्याः । तत्र तत्र तादृशो विभागो जायते यादृशस्य पुनर्विभागादिः स्यात्, स्याच्च यत्र स्वतन्त्रवियुक्तता अनायतता च यथा लोहादीनाम् । अत एव च खण्ड्यते इति व्यपदेशः । तथा च स्थूलो, नायत्तो विभागः खण्ड इति । तथा प्रतरवदायतो भेदः प्रतर इत्याम्नायते । यथा अभ्रपटलादीनाम् । प्रतरभेदाद् हि पत्रवदायतान्येव भवन्ति खण्डानि, काष्ठादेरपि यदि फलकादिविधा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाय क्रियते तादृशो भेदस्तदाऽसौ प्रतरभेद इति। यदा च चतुरस्रादिभेदः तदा खण्डभेद इति। एवमेव च सुवर्णादीनां यथायथं भेदविभागिता अवगन्तव्या, भेदानुसारेणैव तत्तदाख्याऽङ्गीकारात्। यत्र च सूक्ष्मतमा अवयवा यथा भवन्ति तथा भिद्यते, तदसौ चौर्णिको भेदः। यथा मुद्गादिधान्यानाम्। यत्र चोत्किरणं भेदेऽसौ उत्करिकाख्यः। यथा वंशत्वचः। यत्र च तटद्वैविध्यं भवति, यथा नद्याः तथाऽसौ भेदोऽनुतटिकाख्यः। यथा शुष्कहृदादिकर्दमेषु। एते च भेदाः पञ्च न वस्तुनियमिताः, किन्तु भेदप्रकारनियता इति पूर्वोक्तं समुदायेऽनुसन्धेयम्।

न च प्रवाहीकरणं सुवर्णादीनां यत् तदपि भेद एवेति कथं नोक्तो द्रवत्वाख्यः षष्ठो भेदभेद इति वाच्यम्। तत्र चौर्णिकभेदभावाद् द्रवत्वस्य नैमित्तिकत्वात्। यथाहि–चौर्णिकभेदेन भिन्नं मुद्गादि क्लिन्नमुदकेन तथा भवति, यथा धूलिसंयुक्ते पानीये कर्दम इति न षष्ठो भेदभेद आख्येयः। हिमादीनामुष्मणा यद् द्रवीभावगमनं तदपि तथैव। यद्वा–न तत्र भेद एव, यतः संयुक्तमेव तत्सर्वं किन्तु संयोगविशेष एव।

ननु द्रवत्वाख्य एवं परिणामः कथं नोक्तो ? यतो नहि नास्ति द्रवत्वम्, जलघृतादिष्वध्यक्षसिद्धेरिति चेत्। सत्यं, यैरपि द्रवत्वं स्वीकृतं गुणतया, तैरपि नैव स्वीकृतं घनत्वं तथा पृथिव्यादिषु काठिन्यादिहेतुगुणतया, नहि तत्र विद्यते, संयोगविशेषत्वे तु तस्य, किं द्रवत्वमपि नैवम् ?। न च वाच्यं तैः संयोगाख्यो गुणः स्वीकृत एव, अस्माभिरपि बन्धस्य परिणामतया स्वीकृतत्वात्। संयोगस्तु सामान्येनापि पिण्डसमुदयवद् भवत्यपि, संयोगादिकाः क्रियाविशेषा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवेति तु पूर्वमेव भावितम्। तत्त्वतस्तु द्रवत्वं प्रवाहतया अवस्थानेन पर्यायतया व्याख्येयं तद्वतः। यद्वा-जलत्वादिपरिणतेरेव तथात्वान्न पार्थक्येनोदितम्, विशिष्टस्निग्धता वा तत्, यतः परैरपि तत् पिण्डीभवनहेतुरेव आख्यायते। संस्थानादयस्तु व्याख्यातपूर्वा एव। उपकारव्याख्याने च पुद्गलानामेवं क्रमः-प्रथमं हि शरीरादयः, ते हि साक्षात्तत्परिणाममयाः। पश्चादेव च सुखदुःखादयः, यतः पुद्गलमयाऽन्यवस्तुविहिता एते।

तत्र शरीरमिति। 'शृश् हिंसाया'मिति क्र्यादिको धातुः, तस्मात् 'कॄशॄपॄकॄगम्ञ्जिकुटिकटिपटिशौण्डिकटिहिंसिभ्य ईर' [उ० ४४१] इतीरे शरीरमिति। तथा च शृणाति शीर्यते वा, यतः हिनस्ति प्राणिप्राणान्, हिंस्यते वा प्राणिगणैः क्रूरतमैः सिंहादिभिरपि तदेवेति युक्तैव शरीरता शरीरस्येति। औदारिकादिस्थूलशरीरापेक्षयैवं व्युत्पादनम्। अपराणि तद्वृत्तिधर्मानुगतानीति तथा। यद्वा-शॄणाति वा-हिनस्ति जीवं संसारावर्त्तगर्ते पराभवतीति शरीरमिति व्युत्पादने सर्वेषामपि संसारावर्त्तदुर्गपातित्वान्नाभिमतम्। तच्च पञ्चधा औदारिकं वैक्रियमाहारकं तैजसं कार्मणं चेति। तत्रौदारिकमिति प्राकृते 'ओरालियं ओरालमुराल'मित्यादि पठ्यते। आर्षत्वाच्चैतेषां सिद्धिः, पृषोदरादित्वाद्वा। तदपेक्षया व्युत्पाद्यते एवम्—

तत्थोदारमुरालं उरलं ओरालमहव विण्णेयं। ओदारियंति पढमं पडुच्च तित्थेसरशरीरं ॥१॥ भन्नइ य तहोरालं वित्थरवंतं वणप्फइं पप्प। पगइए णत्थि अन्नं एद्दहमेत्तं उरालं ति ॥२॥ उरलं थेवपएसोवचियंपि महल्लगं जहा भिंडं। मंसट्ठि-ण्हारुबद्धं ओरालं समय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिभासा ॥३॥ गीर्वाणभणित्यपेक्षया तु उद्गत–उत्पन्न आ–मर्यादया अरो–वृद्धिः, तस्य क्रमेणैव वृद्धिः, नैवं वैक्रियादिषु। तानि हि अक्रमं वर्धन्तेऽवस्थितान्यपि च भवन्ति। उत्कट आ–मर्यादया अरो वा प्रादुर्भावो, यथा नियमेनादो नरतिर्यग्भवेषु, त एव च भवा जीवानां बाहुल्येन भवन्ति यतः। यद्वा–अस्यैव प्रत्यक्षमुत्पादात् तीव्रोत्पत्तिमत्त्वम्। उत्–प्राबल्येन यत्र तत्रेति–यावत् गमः–प्राप्तिर्यस्येति वोदारम्। अस्यैव सर्वत्र प्राप्यमानत्वात्। तद्गतामेव यतः सर्वलोकेषु भावः, सूक्ष्मा यतस्तद्वन्त सर्वत्र ते इतिकृत्वा। उर्ध्वं गमः–अवबोधो वा अस्येति। वैक्रियादीनि नावतिष्ठन्ते असुमदुज्झितानि, इदं तु तथैवावतिष्ठते इतिकृत्वा। उर्ध्वं गमो वा विनाशो यस्य। यतो वयःपरिणामे हीयते एवेदं, न तु वैक्रियादीनि। यावज्जन्म देवनारकाणां तद्गतामवस्थितशरीरभावात्। लेश्यैव केवलं तेषां हीयते इति। उर्ध्वम्–उपादानादनन्तरं तत्तयोपलक्षणरूपो गमो यतोऽस्येति वा। यतो यथा वैक्रियादीनि अण्वाद्यवस्थोपगतानि भूत्वा विपरीतावस्थान्यपि भवन्ति, नैवमिदं किन्तु माह्यदाह्यछेद्यादिगुणयुतमेव सर्वदा। स्थूलं वा उदारम्। स्थूलता च पोषाद्वर्धनाद्वा। महत्पूज्यं वा उदारम्, तद्गतां तीर्थकरगणधरादीनां पूजाऽवसरे तस्यैव पूज्यमानत्वात्। उदारमेव चौदारिकमित्यौदारिकम्। स्थूलपुद्गलोपचितत्वाद्वा उदारम्। स्थूला एव पुद्गला एतत्तया परिणमितुं योग्याः। इतरेषां तत्तयाऽग्राह्यत्वाद्। अत एवोच्यते–' परं परं सूक्ष्म 'मिति। ' प्रदेशतोऽसङ्ख्येयगुणं प्राक्तैजसात् ' [तत्त्वा०] इति च। इत्यौदारिकशरीरम्।

अथ वैक्रियम्। तत्र ' विविहा व विसिट्ठा वा किरिय विकिरिया तीइ भवंतमिह। वेउव्वियं तयं पुण नारगदेवाण पयईए ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विविधा–अणु भूत्वा अनणु भवति, अनणु भूत्वा अणु भवति, एकं भूत्वा अनेकं भवति, अनेकं भूत्वा एकं भवति, एकाकृति भूत्वाऽनेकाकृति भवति, अनेकाकृति भूत्वा एकाकृति भवति, दृश्यं भूत्वाऽदृश्यं भवति, अदृश्यं भूत्वा दृश्यं भवति, भूमिचरं भूत्वा खेचरं भवति, खेचरं भूत्वा भूचरं भवति, प्रतिघाति भूत्वाऽप्रतिघाति भवति, अप्रतिघाति भूत्वा प्रतिघाति भवति, युगपद् वा एताननुभवति भावानित्यादिलक्षणा क्रिया विक्रिया, विशिष्टा वा जिनजनिमहादिका क्रिया विक्रिया, तस्यां भवं वैक्रियम् । यद्वा–असङ्ख्ययोजनदण्डनिःसरणार्थसमुद्घातकरणादिका क्रिया विक्रिया, तस्यां भवं वैक्रियम् । भवधारणीयं तु तज्जातीयमिति । विकरणं वा अनेकावस्थानुगमनं विक्रिया, तत्प्रधानं वैक्रियम् ।

तथा आहारकम् । तत्र–' कज्जंमि समुप्पण्णे सुयकेवलिणा विसिट्ठलद्धीए । जं एत्थ आहरिज्जइ भण्णइ आहारगं तं तु ॥१॥ पाणिदय–रिद्धिसंदरिसणत्थमत्थोवग्गहणहेउं वा । संसयवोच्छेयत्थं गमणं जिणपायमूलंमि ' ॥२॥ त्ति । आहारकशरीरप्रयोजनान्याचख्युः । तत्र प्राणिदयाख्यं यद्यपि न क्वचिद्विवृतं दृश्यते, तथासंमूर्च्छिमजन्तुप्राचुर्ये आवश्यकगमनकार्ये चास्य सूक्ष्मत्वेनाविराधकत्वात् करणमस्य सम्भाव्यते । ऋद्धिदर्शनं च । समवसरणादिका या श्रीमज्जिनपतेरविकारिणी प्रभूतासुभृदुपकारिणी ऋद्धिः, तस्याः सम्यक्त्वदार्ढ्याय अन्यस्मै वा प्रयोजनाय अवलोकनम् ।

अनेन य आहुः–चतुर्दशपूर्वधरश्चतुर्दशपूर्ववित् । स च द्विविधः भिन्नाक्षरोऽभिन्नाक्षरश्च । तत्र यस्यैकैकमक्षरं श्रुतज्ञानगम्यपर्यायैः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्कारिकाभेदेन भिन्नं वितिमिरतामित, स भिन्नाक्षरः। तस्य च श्रुतज्ञानसंशयापगमात् प्रश्नाभावः। ततश्च आहारकलब्धिं सतीमपि नैवोपजीवति विनालम्बनेन, स एव श्रुतकेवली भण्यते। शेषः करोति, तस्य कृत्स्नश्रुतज्ञानालाभादवीतरागत्वाच्च [ तत्त्वार्थटीका ] इति। तत् पूर्वगाथया विरोधमधिरोहदासीत्। यतः आहारकवर्णनपरायां पूर्वस्यां श्रुतकेवलिन आहारककरणमाख्यायि, परं संशयापनोदमात्र-निराकरणप्रयोजनं न तस्य तत्करणं, स्याद्यदि, तथापि प्राणिदयर्द्धि-दर्शनार्थं तु तस्याप्याहारककरणमुचितिमङ्गत्येव। तत्त्वतस्तु श्रुतकेव-लिनामप्यवीतरागत्वात् भवत्येव कचित्तथाविधेऽतिसूक्ष्मे आरेका। यत उच्यते-'नहि नामाऽनाभोगश्छद्मस्थस्येह कस्यचिन्नास्ति। ज्ञानावरणीयं हि ज्ञानावरणप्रकृति कर्म'॥ इति। श्रुतकेवलित्वं च प्रज्ञाप्यार्थप्ररूपणामाश्रित्य केवलज्ञानान्वितश्रीमदकलङ्कभगवत्तुल्यत्वा-देवेत्यनुसन्दध्मः, कथमन्यथा 'संखाईए उ भवे साहइ जं वा परो उ पुच्छिज्जा। न य णं अणाइसेसी वियाणइ एस छउमत्थो' ॥१॥ त्ति। पारमर्षव्यावर्णितमहिमवतामपि भगवतां गौतमपादानां संशयादि सङ्गच्छेतेति।

अथावग्रहश्चापूर्वस्यातीन्द्रियस्य पर्यायादेर्वा सङ्ग्रहः तस्मै, संशयश्च पूर्वोक्तरीत्या यो जातः, तद्व्युच्छेदाय। श्रुतज्ञानस्य नहि सर्वे पर्याया विषयो न वा सर्वद्रव्यविषयकमध्यक्षम्। ततः सम्भव-त्येव संशयोत्पादोऽवगतेऽपि चार्थे, भवत्येव वा संशयः अवग्रहनिश्च-ययोर्भिन्नत्वात् निश्चयविशेषाय वा संशयस्योपपद्यमानत्वाद्वाऽनुभव-सिद्धम्। नन्वस्तु परं 'विसिट्ठलद्धीए' त्ति किमर्थं ? सत्यं, भवेन्नि-रर्थकं यदि श्रुतकेवलिनां आहारकाख्यैव लब्धिर्भवेदेका, परं वैक्रिया-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिलब्धिसद्भावाद् आहारकलब्ध्यपेक्षया विशिष्टलब्ध्येति। वैक्रियलब्धिश्च 'समणेणं०' इत्यादिभगवत्यागमशेखरपाठात् स्पष्टैव।

ननु च स्यादेवं शरीरपञ्चकं, निषिद्धमपि 'युगपदेकस्याऽऽचतुर्भ्यः' [तत्त्वा०] इति वचनेनेति चेत्। सत्यं निषिद्धं, न तु लब्धिनिषेधो विहितस्तेनेति। सत्यां वैक्रियलब्धौ किमित्याहारककरणमिति चेद्, असावद्यत्वादप्रमत्तत्वाच्चैतस्य। वैक्रियमुपजीवन् हि नियमेन प्रमत्त आरम्भकश्च तस्य, अस्य त्वारम्भे प्रमत्ततासद्भावेऽपि उपजीवने सुतरामप्रमत्ततेति किं न पर्यालोचयथ?। अत एव च 'शुभं विशुद्ध'मिति पठ्यते आहारकस्वरूपाख्याने। आ–मर्यादया रत्न्यादिकया, नियमस्त्वेषः, अन्येषामनेवंविधत्वात्। ह्रियते–गृह्यते इत्याहारः, तदेवाहारकम्। अथवा स्वभावस्थत्वलक्षणया मर्यादया हरणं-ग्रहणम्। वैक्रियं हि दण्डकरणादिप्रयोजनकविशिष्टसमुद्घातादिना क्रियते, नैवमिदं, शरीरस्थायिनैव अस्य साध्यमानत्वात्। सामान्यो ह्यस्य समुद्घातः, नैवं वैक्रियादेरिति। आहरति–गृह्णाति हितमेतदिति आहारकम्। कर्त्तरि णकविधानात्। हितानुबन्ध्येवैतत्, नान्यतनुवदनियतम्, हितायाह्रियते वेति। आहरणप्रधानं वाऽऽहारकम्, यतो न तावद्वैक्रियवत् स्थूलपुद्गलनिष्पन्नमेतत् 'प्रदेशतोऽसङ्ख्येयगुणं प्राक्तैजसाद्' [तत्त्वा०] इति नियमाद्। अत्यन्तमाहार्या एव तत्पुद्गला नैतावन्त एतावन्मात्र वैक्रियकरण आहरणीया इति प्रयत्नबाहुल्यादाहरणक्रियायां तत्प्राधान्यमेतस्येति।

तथा तैजसं शरीरं, तच्च 'सव्वस्स उम्हसिद्धं रसादिआहारपागजणगं च। तेयगलद्धिनिमित्तं तेयगं होइ णायव्वं'॥१॥ ति।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र ' सर्वस्य उम्हसिद्ध 'मित्यनेन प्रमाणं दर्शितं, औदारिकस्य प्रत्यक्षसिद्धत्वाद् वैक्रियाहारकयोश्च लब्धिप्रत्ययमेवाविर्भावात् । ' रसाद्याहारपाकजनकं ' रसादिलक्षणो य आहारपाकः तस्य जनकं, आह्रियमाणो हि आहारः श्लेष्माशयं च प्राप्य द्रवीभवति, अम्लीभवति च प्राप्य पित्ताशयं, वाय्वाशयं च प्राप्य यावद् विभज्यते, पश्चात् तदन्तरैवानेन खलरसौ क्रियेते विपाच्येति प्रयोजनं ज्ञापितम् । वक्रियाहारकयोः पूर्वं ज्ञापितमेव । औदारिकमपि सर्वेषां विशिष्टशरीररहितानां गमनागमनादि–दानादानादिक्रियायै भवति । ज्ञापितं चैतदौदारिकशब्देनैव, अन्यथा वृद्ध्याद्यभावात् । ' तैजसलब्धिनिमित्त '-मित्यनेन विशिष्टं कार्यमस्य प्रादर्शि, तैजसलब्ध्या निमित्तमिति विग्रहाद् । अन्याचार्यपक्षे तु चकारस्यैवकारार्थत्वे, तस्य च व्यवस्थावाचित्वे एवं व्याख्येयम्–तैजसलब्धिः निमित्तं यस्य तत्तैजसलब्धिनिमित्तमित्याख्यान्ति केचित् नयवादान्तरं चैतदिति । विचित्रा हि नयवादाः । केचित् कारणप्रधानाः, केचित् कार्यप्रधानाः, तन्नैषोऽप्यसङ्गत आगमानुसारेण पूर्वव्याख्यात एव पक्षः, तैजसकार्मणयोः सर्वदा सर्वस्य प्रत्येकं भावाभिधानात् । तेजसो विकारस्तैजसम्, तेजोविकारत्वं चोष्णवीर्यपदार्थजन्मत्वात् । कर्म तु मूलकारणभूतमस्त्येव सर्वत्र । तेजोमयं वा तैजसं, तेजस्मयता चोष्णस्पर्शवत्त्वात् । तेजःस्वतत्त्वं वा तैजसं, यदा हि जाता लब्धिस्तैजसी, प्रादुर्भूतं च प्रयोजनम्, निःसारयति तदा असावनेन तद्वान् ज्वलज्ज्वालामालावलीढशिखासहस्रपरिकरितमनलं योजनशतसहस्रगतयावद्वस्तुदाहसमर्थमिति यथार्थमेवास्य तेजःस्वतत्त्वतेति ।

नन्वस्तु तेजोनिर्गमः तैजसशरीरजन्यः तैजसलेश्यया, परं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शीतनिसर्गो भवेत् कथं तत ? इति चेत् । सत्यं, लब्धिप्रभावेनैव तत्पुद्गलानां तथापरिणामः । यथा शापवितरणप्रवृत्तो लब्ध्यैव तेजोनिसर्गं तेजःस्वभावं करोति, तथा अनुग्रहप्रवृत्तो भावितात्मा शीतनिसर्गं करोति तदेव तथापरिणमय्य, एष एव च प्रभावस्तस्येति । अत एव च भाष्यादौ शापानुग्रहप्रयोजनमित्याख्यायि ख्यातकीर्तिभिर्महापुरुषैरस्योभयथा प्रयोजनम् ।

तथा कार्मणं पञ्चमम् । तत्र क्रियते-मिथ्यात्वाविरत्यादिहेतुभिः निर्वर्त्यते यद् जीवेनेति कर्म । न च वाच्यं सदात्विक्यैव कर्मवर्गणा, लोकस्याञ्जनपूर्णसमुद्गकवत्तया पूर्णत्वात् किं निर्वर्त्यते तेनेति । वर्गणानां सदात्विकत्वेऽपि प्रकृत्यादिको बन्धो मिथ्यात्वादिभिरेव विधीयते, संसर्गो वा जीवेनाऽस्या एभिरेव विधेयः । नहि लोकस्थत्वमात्रेण स्वावगाहप्रदेशस्थत्वमात्रेण वा कर्म कुर्यात् स्वकार्यं ज्ञानावरणादि, किन्तु जीवप्रदेशैः सह क्षीरनीरवत् सम्बद्धमेवान्योन्यानुगततया ।

अनेन ये आहुः-कथं कर्म तिरस्कुर्याद् गुणाद् बद्धमबद्धं वा । आद्ये, कथं बन्धः सर्वतोऽभिव्याप्य वा ? । आद्ये, कर्मणो निरावार्यत्वप्रसङ्गः आवार्यस्यान्तरेव सद्भावात् तदसम्बन्धाच्च कथमावरणता, अन्यथा सिद्धानामपि लोकस्थकर्म भजेदावारकताम् । प्रान्त्ये च कथमावारकता, समप्रदेशत्वादुभयोः । असम्बद्धत्वेऽपि चावारकत्वे तु स्पष्टैव सिद्धज्ञानानामप्यावार्यतेति । निरासश्च पूर्वोक्तरीत्या आवरणादिसम्भवस्याप्रत्यूहत्वादिति । कर्मणो विकारः कार्मणम्, अष्टानामपि विकारो व्यपदिश्यतेऽनेन, यदाहुः-'कम्मविगारो कम्मण अट्ठविहविचित्तकम्मणिप्फण्णं । सव्वेसिं सरीराणं कारणभूयं मुणेयव्वं ॥१॥ ति । 'कर्मविकार' इत्यनेन वर्गणानिर्देशः । अष्टानामपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विविधकर्मणां विकाररूपमित्यनेन तु बन्धानन्तरमेव एतादृशव्यपदेशभाक्त्वमावेद्यते । अत एव च पठ्यते—कार्मणं हि स्वस्यान्येषां वा शरीराणां कारणमिति ।

ननु च यदि कर्माष्टकनिष्पन्नमेतत्, किं तर्हि नामकर्मभेदभूतमिदम् ?, नामकर्मप्रकृतिष्वेव च 'गइजाइतणुउवंगे' त्यत्र शरीरशब्देन पञ्चानामप्यौदारिकादीनां ग्रहणादिति चेत् । सत्यम्, यथाहि औदारिकादीन्यात्मना स्वायत्तीकृतानि तथा तथाऽऽत्मानं परिणामयन्ति तथैवैतदपीति नामकर्मान्तर्गणनप्रयोजनमवेयते । अत एव कार्मणे न बन्धनसङ्घातने अपि शास्त्रकृद्भिराम्नायेते । स्थितिस्त्वस्य कर्मापेक्षया या लघीयसी, सा परिणामान्तरतामेवापेक्ष्येति ।

कर्मैव वा कार्मणम् । अत्र च बद्धकर्मणामेव कर्मता समाम्नायि आम्नायवेदिभिः । एतद्व्युत्पत्तिप्रयोजनं तु निरुपयोगिताव्यवहारेण स्थापनम्, यत उच्यते ' निरुपभोगमन्त्य 'मिति । तथा च यैरुच्यते वर्गणानां परिवर्तनाभावात् किमिति नाङ्गीक्रियते कार्मणस्यैक तथा तथापरिणाम औदारिकादिसकलवस्तूनामिति परास्तम् । यतो यद्यप्यस्य सर्वतन्वनन्तगुणत्वान्न पुद्गलप्रदेशसङ्ख्याविरोधः तथापि नैतत्पुद्गलाः सामान्येन आत्मना तथा परिणमयितुं शक्या इति पृथक्क्लेषवर्गणाऽऽदानं आवश्यकमेव । तत एव च कर्ममयं कार्मणमित्यप्यनुसन्धेयं बुद्धिमद्भिः । यन्न ह्येतस्यान्यः परिणामः कोऽपि भवत्युपभोगाय वा साक्षादागच्छति, सूक्ष्मतमपरिणामोपेतत्वात् । एषां च शरीराणां यथा सञ्ज्ञान्वर्थताकृतो विशेषः, तथा कारणादिकलापकृतोऽपि । यत उच्यते एभ्य एव चार्थविशेषेभ्यः शरीराणां नानात्वं सिद्धम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किञ्चान्यत् कारणतो विषयतः स्वामितः प्रयोजनतः प्रमाणतः प्रदेशसङ्ख्यातोऽवगाहनतः स्थितितोऽल्पबहुत्वत इत्येतेभ्यश्च नवभ्यो विशेषेभ्यः शरीराणां नानात्वं सिद्धमिति। तत्र कारणतस्तावत् स्थूलतरपुद्गलोपचितमौदारिकम्, यदपेक्ष्य 'उरलं थेवपएसोवचियं च महल्लगं जहा भिंड 'मिति प्रतिपादितम्। वैक्रियं च ततः सूक्ष्मपुद्गलैः, आहारकं तु ततोऽपि सूक्ष्मैः, तैजसं सूक्ष्मतरैः, कार्मणं सूक्ष्मतमैश्च निर्वर्तितं स्यादिति। अत्र कारणमुपादानकारणमिति। निमित्तकारणं तु सर्वत्राप्यविशेषेणात्मप्रयत्न एव। यद्वा–कारणमुत्पत्तिकारणम्, तत्रौदारिकस्य स्त्रीगर्भादि, वैक्रियस्य देवशय्या–कुम्भीपाक–लब्ध्यादि, आहारकस्य तु लब्धिरेव, तैजसस्य सातापनं तपः प्रभृति उष्णवीर्यपुद्गलादानं वा, कार्मणस्य पुनर्मिथ्यात्वादिकं योगावसानमिति व्याख्येयम्।

नन्वाद्यं परित्याज्यमेव व्याख्यानम्, यत इतः पञ्चमे विशेषद्वारे प्रदेशसङ्ख्येति द्वारं वक्ष्यन्त्येव। सत्यम्, परं प्रदेशसङ्ख्याबहुत्वं विद्यमानमपि स्थूलत्वानुसारि, अन्यथा बृहत्परिमाणं कार्मणमेव भवेत् सर्वेषु, एतच्चतुर्थं प्रमाणद्वारं वक्ष्यन्ति ततोऽवगन्तव्यं भविष्यत्येतत्। सत्यमेतदपि, परं तत्र समग्रशरीरप्रमाणं चिन्त्यते, न तु प्रदेशस्थौल्यमिति नापकर्णनीयं प्रथमं व्याख्यानम्। 'परं परं सूक्ष्म 'मिति वचनमप्येतदर्थमेव। अन्यथा 'प्रदेशतोऽसङ्ख्येयगुण' [तत्त्वा०] मित्यादिवचनतो निरर्थकता स्यादस्य ध्रुवैव।

तथा विषयतः, तत्राऽन्यत्र तावज्ज्ञानेच्छाकृत्यादिषु प्रसिद्धो विषयः, शरीरस्य तु नैव। तथापि शरीरवतां गतिमपेक्ष्य विषयो वाच्यः। तथा चानेकार्थीयं वचः–' विषयो यस्य यो ज्ञातस्तत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गोचरदेशयोः। शब्दादौ जनपदे चे'ति। गोचरश्च यथेन्द्रियाणां तथा गतेरपीति नासङ्गतं किञ्चित्। तत्रौदारिकवतां विद्याधराणां आनन्दीश्वरात्, जङ्घाचारणविद्याचारणानां त्वारुचकात् तिर्यग्लोकविषय एषः। उर्ध्वं तु पाण्डुकवनान्तम्। वैक्रियवतां देवदानवादीनां असङ्ख्येयद्वीपसमुद्रावसानं यावद्गमनात् तावान्। आहारकस्य तु तद्वतो जिनमूलगमननियमाद् यावन्महाविदेहान्, ऋद्धिदर्शनार्थावग्रह–संशयव्युच्छेदानां तत्रैव भावात्। तैजसकार्मणे तु तद्वत्त्वात् सर्वस्य सर्वत्रैव विषयः, विग्रहगतिसमापन्नानां सर्वत्र भावात्, केवलयोरेतावद्विषयताऽव्याहतैव। केवल्यपि च समुद्घातगतः समस्तलोकव्याप्येव चतुर्थे समये 'लोकव्यापी चतुर्थे त्वि'तिवचनात्। कार्मणं तु तत्रापि 'कार्मणशरीरयोक्ता चतुर्थके पञ्चमे तृतीये च' [प्रशम०] इति वचनात्। तैजसं च तत्सहचरितमेव। युक्त उपरितनात्तोऽनयोर्विषयः।

स्वामिनश्च तिर्यग्मनुष्या औदारिकस्य, 'गर्भसम्मूर्च्छनजमाद्य' [तत्त्वा०] मितिवचनात्। देवा नारकाश्च वैक्रियस्य, 'वैक्रियमौपपातिक'मितिवचनात्। मनुष्यतिरश्चामपि स्यात् चेल्लब्धिः भवेदेवैतद्। यत आहुः–'लब्धिप्रत्ययं च' इति। पारिशेष्याच्चात्र नृतिरश्चामिति लभ्यते। तिर्यञ्चश्च न सर्वे, किन्तु वाय्वादिका विशिष्टाः। नरा अपि च गर्भजा एव। आहारकस्य तु चतुर्दशपूर्वविद्भिरेव विधानात् मनुष्यसंयतानामेव। अन्ययोस्तु सर्व एव संसारिणः 'सर्वस्य' [तत्त्वा०] इत्यस्य सर्वेषां संसारिणामित्येव व्याख्यानात्।

तथा प्रयोजनतो भिन्नता एषाम्–औदारिकं तावत् धर्माधर्मसुखदुःखकेवलज्ञानावाप्त्यादिनाऽर्थवत्। विशिष्टतामपेक्ष्य 'धर्माधर्मा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दी 'ति । यतः सम्पूर्णो ज्ञानादिको वा धर्मः तद्वतामेवाधर्मोऽपि च महारम्भादिकः । सुखं चात्र प्रशमादिप्रभवम्, अन्यत्तु वैक्रियवतामपि सातिशयम् । दुःखं च ज्वरादिजन्यं आध्युद्भवं वा, अन्यथा तु महायातना एव नारका वैक्रियवन्तः, परं परस्परोदीरितं सङ्क्लिष्टासुरोदीरितं तु तेषां । वैक्रियं देवानपेक्ष्य स्थूलसूक्ष्मैकत्वानेकत्वव्योमचरक्षितिगतिविषयाद्यनेकविभूतिमत्, नारकानपेक्ष्य तु पारदवत् पुनः संयोगो दुःखौघसहनताक्षुत्पिपासाशीतोष्णादिनाऽविद्रावणमित्यादि, नृतिरश्चां तु यथेप्सितमन्यान्यत् । तैजसस्य तु आहारपाकः शापानुग्रहप्रदानसामर्थ्यं च । कार्मणस्य पुनर्भवान्तरगत्याद्यनेकविधम् । भवान्तरगतौ हि केवलं कार्मणमेवेत्येवं व्यपदिश्यते ।

प्रमाणतस्त्वेवं विशेषः–यत् औदारिकं तावत् सातिरेकयोजनसहस्रमानम्, तद्वतां वनस्पतीनां समुद्रादौ तथाऽगाधे भावात् प्रमाणयोजनमितत्वात्तस्य, शेषस्य पृथ्वीपरिणामत्वात् । न च वाच्यं तत्रानेका जीवाः तिलवर्त्तिकान्यायेनेति । व्यापिन एकस्य जीवस्यापि तत्राभ्युपगमात् । अभ्यूह्यं चैतद् द्वितीयाङ्गीय–द्वितीयश्रुतस्कन्धीयाहारपरिज्ञाध्ययनतः स्पष्टम् । वैक्रियं तु योजनलक्षप्रमितम् ।

ननु प्रतिपादितं तावदौदारिकस्वरूपाख्याने 'वित्थरवंतं वणस्सइं पप्प ' इति । अत्र च महत्तरं वैक्रियमेवोच्यते औदारिकात् शतगुणं किञ्चिन्न्यूनं यत इति चेत् । सत्यं, नैतावदेतत् स्वाभाविकं, तत्तु पञ्चधनुःशतमानमेवेति नोक्तव्याघातः । उत्तरवैक्रियं हि एतावत्, तच्च पक्षात् परतो न तिष्ठति ' देवेसु अद्धमासो 'त्ति वाक्यात् । आहारकं तु रत्निप्रमाणम्, रत्निश्च 'बद्धमुष्टिरसौ रत्नि'रितिलक्षणो ग्राह्यः । अन्त्ये तु लोकायाममाने । एतच्च पूर्वोक्तसमुद्घातरीत्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपत्तव्यम् , अन्यथैकस्यैतावन्मानस्य तैजसस्य कार्मणस्य वाऽभावात् । न च कस्याप्यवगाहना विद्यते एतावती । न च विना केवलिनमन्यजीव एतावन्तं लोकमात्रमाकाशमभिव्याप्नोति ।

तथा प्रदेशसङ्ख्याविहितोऽपि भेदः । अत्र प्रदेशत्वं न पारिभाषिकं ग्राह्यं किन्तु 'प्रवृद्धो देशः प्रदेश' इति । तत्र औदारिकयोग्योऽनन्ताणुकोऽपि स्कन्धो यदि परैरसङ्ख्यैरनन्ताणुकस्कन्धलक्षणैः प्रदेशैर्वृद्धो भवति, तदा वैक्रिययोग्यः । सोऽपि पूर्ववदसङ्ख्यैरेवानन्ताणुस्कन्धलक्षणैः प्रदेशैर्वर्धते, तदा आहारकयोग्यः । एवमग्रेऽपि । परं परयोर्द्वयोरनन्तगुणप्रदेशवृद्धतेति वाच्यम् । प्रदेशाश्चात्रापि पूर्वपरिभाषिता एवेति ।

केचित्त्वाहुः—पारिभाषिकपरित्यागे मानाभावः, अर्थसङ्गतिश्च नैवं व्याख्यायते यदि स्यात् कदापि यथा—अङ्गुलमात्रक्षेत्रावगाढे औदारिके ये प्रदेशाः ते असङ्ख्येयगुणा वैक्रिये, आहारके ततोऽप्यसङ्ख्यगुणिताः । तैजसे त्वनन्तगुणाः ततः , कार्मणे तु ततोऽप्यनन्तगुणिताः । अपेक्ष्यैवैतत्प्रदेशार्थतां शरीराणां सर्वत्राल्पबहुत्वविचार आहतो दृश्यते आर्षे इति । भाष्यमपि चैवमेव, यदि निभाल्यते सम्यक् । न च वाच्यं अवगाहनाविषयमेतदिति । अवगाहना हि शरीरस्य चिन्तयिष्यन्ति स्वयम् ।

अवगाहनाजनितश्च भेद एषां-यथा औदारिकं यावत्सु असङ्ख्येयभागेष्ववगाढं लोकस्य, ततो बहुष्वसङ्ख्येयेषु भागेषु वैक्रियमवगाढम् , पूर्वस्मादस्य किञ्चिन्न्यूनशतगुणत्वात् , आहारकं तु रत्निमात्रत्वात् स्तोकावगाढमौदारिकावगाहादपि, तैजसकार्मणे तु पूर्वोक्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रीत्या लोकाकाशीयसमग्रप्रदेशावगाढे। औदारिकादीनां चोक्तावगाहना 'असङ्ख्येयभागादिषु जीवाना'मित्यादिवचनाद् अवगन्तव्या। कारणस्य द्वितीयव्याख्यानापेक्षया तु यद्यपि न पौनरुक्त्यम्, तथाप्याद्यव्याख्यानापेक्षया तु स्यादेव तदिति केचित्। ननु प्रमाणादस्य कः प्रतिविशेष? इति चेत्। सत्यम्, प्रमाणं तु सूचिवद् दीर्घस्य प्रतरापेक्षया भवेन्महत्, परं नावगाहनेति भिन्नताऽस्य सप्रयोजनैव द्वारस्य।

स्थितिसम्पाद्यश्च भेदः। तत्र स्थीयतेऽनयेति स्थितिः। स्त्रियां क्तिः। अवस्थानहेतुस्तद्रूपेण स्थापकः कालस्ततश्च औदारिकादीनामवस्थानकालस्तद्रूपेण वाच्योऽत्र। जीवपरिगृहीतिं यावदिति तु स्वयमेवाभ्यूह्यम्। अन्यथा वक्ष्यमाणस्थितेः सिद्धान्तोक्तबद्धमुक्तस्थितिकालेन विरोधापातात्। औदारिकस्य तावत् स्थितिकालो जघन्येनाऽन्तर्मुहूर्त्तमुत्कर्षतः पल्योपमत्रयं च, तद्वतां नृतिरश्चां जघन्यत उत्कर्षतश्चैतावत्स्थितिकत्वादिति। वैक्रियस्य जघन्येनान्तमुहूर्त्तमुत्कृष्टतः त्रयस्त्रिंशत् सागरोपमाणि। कथं? यतो न देवानामर्वाग्दशवर्षसहस्र्या न्यूना स्थितिः। सत्यम्, परमन्येषां वाय्वादीनां तद्भावस्य पूर्वमुक्तत्वात्, तेषां च जघन्यत एतत्स्थितिकत्वात्। आहारकं त्वन्तर्मुहूर्त्तस्थित्येव जघन्यत उत्कृष्टतोऽपि, आरभ्य नवभ्यः समयेभ्य आरान् मुहूर्त्तादन्तर्मुहूर्त्तत्वाख्यानात्।

ननु वैक्रियाहारके लब्धिप्रत्यये अपि भवतः, आयुषश्च क्षयोऽनियत इत्यारम्भकाल एव मृतस्य कथं नैकसमयो जघन्यतोऽनयोः? नह्यते तैजसकार्मणवद् भवान्तरानुयायिनी, न चौदारिकवत् नियतः पर्याप्तभावोऽपि, यतो नहि औदारिकप्रारम्भकोऽसमाप्य तदकृत्वा चेन्द्रियपर्याप्तिं म्रियते जन्तुः कोऽपीति नियम आयुर्बन्धावश्यकता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नियमितः, न त्वेवमत्रेति वाच्यम् । वैक्रियाहारकारम्भकयोः स्फूर्त्त्यादिभावापेक्षया तथाकाले तद्विधानाभावात् । तैजसकार्मणे त्वनाद्यन्ते अभव्यापेक्षया, भव्यापेक्षया चानादिसान्ते एव ।

ननु च तैजसकार्मणयोः कथं तथा स्थितिः ?, यत औदयिके एवैते अपि, उदयश्च कर्मणां स्थित्यपेक्षः, स्थितिश्चोत्कृष्टतोऽपि सप्ततिसागरकोटीकोटीमाना इति चेत् । सत्यम्, कालेनैतावता बद्धे ते अवश्यं विनश्यत एव, परं यथौदारिकं वैक्रियं वा गत्यन्तरे विजह्यते सर्वथा, नैवमिमे, अवश्यं उदयवत्त्वाद् अनयोः । मुक्तानां सर्वथा विलयाद् भव्यानामेव तद्भावाच्च भव्यानपेक्ष्य अनादिसान्तता । न च वाच्यं तर्हि औदारिकादीनामप्यन्यान्यपुद्गलागमापगमभावात् न युक्तैव यथोक्ता स्थितिरिति । विहितोत्तरत्वात्, यन् नाऽऽभवं विरहितस्तैर्जन्तुः, भवान्ते चावश्यं विप्रजहातीति ।

अल्पबहुत्वं च–आहारकाणि तावत् सर्वाल्पानि, कदाचिच्च न तानि भवन्त्यपि, यदि भवन्ति तदापि नवसहस्राण्येवोत्कृष्टतः । अन्तरं च जघन्यत एकं समयमुत्कृष्टतः षण्मासाः । वैक्रियाणि तु तद्गतां वायु-देव-नारकाणामसङ्ख्येयत्वात् असङ्ख्येयगुणानि । असङ्ख्यातं चासङ्ख्येयोत्सर्पिण्यवसर्पिणीसमयमानम्, औदारिकाणि तु ततोऽप्यसङ्ख्येयगुणं (णानि) मनुष्यतिरश्चां तद्भावात् । असङ्ख्यातता च वैक्रियशरीरस्थानप्रतिपादितैव ।

ननु 'जीवा पोग्गल' इत्यादिना जीवानामानन्त्यात् प्रत्येकं शरीरवत्त्वस्य नियमात् कथं युक्तमेतावत्त्वमेषामिति ? चेत् । सत्यम्, यदि प्रत्येकं भिन्नमेव स्यादौदारिकं, स्यादयुक्तता यथोक्तपरिमाणस्य, तदेव तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न विद्यते, अनन्तानामनन्तकायिकानां काये एकस्मिन्नवस्थानात् । तैजसकार्मणे त्वनन्तगुणे, अनन्तं चानन्तोत्सर्पिण्यवसर्पिणीसमयमानम्, कथमेतद् ? यतो नहि औदारिकादिशरीरहीनानां भवत एले विहाय गत्यन्तरालस्थान् । असङ्ख्यभागश्च तादृशात् औदारिकादिमतोऽपेक्ष्येति । सत्यम्, सर्वेषामसुमतां भिन्नभिन्नमेवैते इति जीवप्रमाणत्वादेतयोः न यथोक्तबाहुल्यव्याघातः । यथाहि शरीराणि पुद्गलानामुपकारः, तथाख्यानेन आख्यायि एतद्यद्गुत-कार्मणं कर्मैव । तथा च य आहुः–धर्माधर्मौ गुणाविति, ते निरस्ताः । यतः कस्यायं गुणः ?, आत्मनः पुद्गलानां वा ? । आद्ये, सिद्धभावापन्नानामपि कथं न तौ ? । अन्त्ये, स्पष्टैव द्रव्यता तयोः ।

तथा वागिति । तत्रोच्यते इति वाग् । सापि पुद्गलानामेवोपकारः । यत उच्यते–' यत्र पुद्गलस्कन्धस्य वर्णभावापत्तिः तत्स्थानमिति स्थानशब्दव्याख्याने हेमसूरिभिः । अन्यैश्चापि तथैवोक्तं, यदाऽऽपिशलिः–' नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो नाम वायुरूर्ध्वमाक्रमन्नुरःप्रभृतीनां स्थानानामन्यतमस्मिन् स्थाने प्रयत्नेन विधार्यते, स च विधार्यमाणः स्थानमभिहन्ति, तस्मात् स्थानाभिघाताद् ध्वनिरुत्पद्यते आकाशे, सा वर्णश्रुतिः, स वर्णस्यात्मलाभ ' इत्यादि । अत्रापि पुद्गलजन्यत्वमेवाभ्यधायि वर्णानाम् । वैशेषिकाद्या आकाशगुणत्वेन शब्दमङ्गीचक्राणा अपि पुद्गलजन्यत्वं त्वामनन्त्येव, मूर्त्तसंयोगविभागाभ्यां तदुत्पादाभ्युपगमात् । परा–पश्यन्ती–मध्यमा–वैखरीस्वरूपनिरूपका वाण्या नैतत्स्वरूपं अपलपन्ति । भाषावर्गणाग्रहणानन्तरं यथा प्रयत्नमोचने च वाक् सम्पद्यते इति तु परमर्षिव्यवहारः । उच्यते चात एव—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'गिह्लइ य काइएणं निसिरइ तह वाइएण जोगेणं । एगंतरं च गिह्लइ णिसिरइ एगंतरं चेव ॥१॥ अत्र केचिद् 'एकान्तर'मित्यस्य समयविरहेणेत्याख्यान्ति । तत्राहुः—जह गामाओ गामो गामन्तरमेवमेग एगाओ । एगंतरंति भण्णइ समयाओऽणंतरो समओ ॥१॥ त्ति । तथा च अनुसमयं ग्रहणमनुसमयमेव च निसर्गः सूत्रितः । अन्यदीयमतमनूद्य दूषयति—

'केई एगंतरियं मण्णंतेगंतरं ति, तेसिं च । विच्छिन्नावलिरूवो होइ धणी सुयविरोहो य' ॥१॥ एकेन गृह्णात्याद्येन, द्वितीयेन मुञ्चति, तृतीयेन गृह्णाति, चतुर्थेन मुञ्चतीत्येवमावाग्योगं वाच्यमित्यङ्गीकारे हि विच्छिन्नावलिरूपो ध्वनिः स्याद् । यदि च समयसूक्ष्मतया न तथाभानमित्युच्येताऽन्येन, तथापि द्वितीयो दोषः श्रुतविरोधाख्य इति ज्ञापनाय चकारः । सूत्रं च–'अणुसमयमविरहियं निरंतरं गिह्लइ' इति प्रज्ञापनोपाङ्गीयभाषापदीयमनुसन्धेयम् । न च वाच्यमत्र ग्रहणमेव तथाऽऽम्नायि, न निसर्गः, तमन्तरेण तथाग्रहाभावात् । पर आह—

'आह सुए वि (चि)अ निसरइ संतरियं न उ निरंतरं भणियं । एगेण जओ गिह्लइ समएणेगेण सो मुयइ' ॥ सान्तरनिसर्गवचनाच्चावश्यं सान्तरमेव ग्रहणं वाच्यम्, 'अपि चे'ति तु स्वपक्षस्य श्रुतानुसारितादाढ्याय । सूत्रं च तदिदं–'संतरं निसिरइ, णो निरंतरं निसिरइ, एगेणं समएणं गेह्लइ एगेणं समएणं निसिरइ' इत्यादि । निसर्गस्य सान्तरताभिधानादत्र स्पष्टैव ग्रहणस्यापि सान्तरताऽऽपन्ना, भवतां ग्रहणनैरन्तर्येण निसर्जननिरन्तरतावदिति । पर आह–कथं नेतव्या सूत्रयुगली विरुद्धा परस्परं?, यदि विचार्यते न तदा विरोध

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यभिप्रेत्याहुः सूरयः–'अणुसमयमणंतरियं गहणं जओ विमोक्खो वि। जुत्तो निरंतरो च्चिय 'त्ति। परः स्यावलम्बनीभूतसूत्रोपष्टम्भेनाऽऽह–' भणइ कह संतरो भणिओ ' इत्यवतार्य।

' गहणाविक्खाइ तओ निरंतरं जंमि जाइं गहियाइं। नवि तंमि चेव निसिरइ जह पढमे निसिरणं नत्थि '। निसर्गापेक्षया ग्रहणस्यापादितां सान्तरतां समादधते–' निसिरिज्जइ नागहियं '। परः–कथं पुनः सान्तरतेति चेत्। ' गहणंतरियंति संतरं तेणं। न निरंतरं निसिरई ' त्यस्य का गतिः? इति चेत्। ' न निरंतरं न समयं न जुगवमिह होंति पज्जाया ' इति।

अत्रेदम्पर्यमिदम्–विवक्षाकालं मर्यादीकृत्य ग्रहणस्य ग्रहणकालं चाद्यं व्यवधाय निसर्गस्य व्याख्याने सर्वं समीचीनमेव निरन्तरतयोभयस्येति। निसर्गश्च भाषेत्याहुः तत्र।

' गहणं मोक्खो भासा समयं गहनिसिरणं च दो समया। होंति जहन्नंतरओ तं तस्स च बीयसमयंमि '॥ ' ग्रहणं मोक्खो भासा गहण–विसग्गा य होंति उक्कोसं। अंतोमुहुत्तमित्तं पयत्तभेएण भेओ सिं '। ग्रहणं न भाषा, निसर्गमात्रमेव भाषा ' भासिज्जमाणी भासे 'ति प्रवचनान्निसर्गस्यैव भाषाया उल्लेखः निसर्गस्य समयमानज्ञापनाय च तन्निर्देश इति। केचित्तु निसर्गसमयानन्तरमेव भाषापरिणामः, अत एव म्रियमाणस्योपरतस्य वा द्वौ समयाविति। निसर्गश्च ताल्वाद्यभिघातान्तः, भाषा च तदनन्तरं भाष्यमाणपर्यवसानसमयोऽपि स एवेति। अत्र ग्रहणनिसर्गयोः नैरन्तर्याभिधानजामारेकामुदीरयते–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गहण–निसग्गपयत्ता परोप्परविरोहिणो कहं जुत्ता ?। समए दो उवओगा णत्थि। आ० किरियाण को दोसो ?। ननु क्रियायोगपद्यमपि कथं भवति ? तासामुपयोगपूर्वकत्वादिति चेत्। नैष नियमो, यत उच्यते–' भंगियसुयं गुणंतो वट्टइ तिविहेवि झाणंमि 'त्ति निर्युक्तिवचनात्। कर्माण्यपेक्ष्योदीरणोदय–निर्जरा-बन्धादीनामनेकानां क्रियाणामवश्यं स्वीकार्यत्वात्। उत्पादव्यययोध्यानङ्गीकारे समकं सल्लक्षणव्युपगमापत्तेः। व्यवहारेणापि अङ्गुल्यादिसंयोगविभागयोः तथा पूजावसरे वामेन हस्तेन घण्टावादनं, दक्षिणेन धूपोद्ग्रहः, दृग्भ्यां च महानुभावश्रीमत्तीर्थकरबिम्बविलोकनं न किं चक्षुषा गोचरीकृतं ? यदेवं स्यादारेकणम्। कायिकयोगस्यौदारिकादिभेदेन पञ्चविधविधत्वाद् गृह्णाति कायिकेनेत्यत्र कः काय ? इत्याहुः—

' तिविहंमि सरीरंमि जीवपएसा हवंति जीवस्स। जेहि उ गिह्णइ गहणं तो भासइ भासओ भासं '॥ शरीरेष्वन्येषामपि प्रदेशानां सद्भावाद् ' जीवे 'ति। हस्तपादावच्छेदेन पृथक् पृथग् ज्ञानसुखादिसद्भावात् सावयवत्वाज्जीवस्य प्रदेशा इति। लोकव्यापित्वनिरासाय ' जीवस्से 'ति शरीरेष्वेव वर्त्तमानस्य जीवस्येत्यधिकरणसप्तम्या तथार्थलाभात्। ' राहोः शिर ' इतिवद्भेदे षष्ठीति ज्ञापनाय ' जीवस्से 'तीति केचित्। विवेचयत्येतदेव ' ओरालियवेउव्विय आहारओ गिण्हइ मुयइ भासं। सच्चं सच्चामोसं मोसं च असच्चमोसं च ॥ त्ति। भाषाचातुर्विध्यं च व्याख्यातपूर्वं शब्दपरिणामव्याख्याने।

ननु च भाषिषा कियन्तं प्रदेशं यावदेति श्रुतिपथं, द्वादशयोजनानि ' बारसहिं जोयणेहिं 'ति वचनात् चेत्, परतः सा नास्त्येव न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रूयते वा ?, आकस्मिकविनाशभीतेर्द्वितीयविकल्पाश्रयणे कथं न श्रूयते ? कीदृशी साऽवतिष्ठते कुत्रेति चेद्, आहुरत्रेति । यद्वा-भाषाद्रव्येषु विसृष्टेषु गत्यापन्नानि तानि किं यावत् कियता कालेन कथं च गच्छन्तीत्यादिद्वापरविरेकायोच्यते ससमाधानम् । तत्रारेका यथा—

'कइहि समएहि लोगो भासाए निरंतरं तु होइ फुडो । लोगस्स य कइभागे कइभागो होज्ज भासाए' ।। अत्र समाधानं-'चउहिं समएहिं लोगो भासाए निरंतरं तु होइ फुडो । लोगस्स य चरमंते चरमंतो होइ भासाए' ।। आद्ये पक्षे श्रवणयोग्यतारहितत्वाद् व्याप्तावपि न श्रवणम्, अन्त्ये तु स्पष्टमेव । अथ किं सर्वैवं, नेत्याहुः—

'कोई मंदपयत्तो निसिरइ सयलाइ सव्वदव्वाइं । अन्नो तिव्वपयत्तो सो मुंचइ भिंदिउं ताइं' ।। तथा च प्रयत्नद्वैविध्यात् किमित्याह-'गंतुमसंखेज्जाओ ओगाहणवग्गणा अभिन्नाइं । भिज्जंति धंसमिंति य संखिज्जे जोयणे गंतुं' ।। अवगाहनवर्गणाश्च भाषाद्रव्यस्कन्धाश्रयभूतक्षेत्रविशेषसमुदायः । एतच्च 'जाइं अभिन्नाइं निसिरइ ताइं असंखेज्जाओ ओगाहणवग्गणाओ गंता भेयमावज्जंति, संखिज्जाइं जोयणाइं गंता विद्धंसमागच्छंति 'त्ति सूत्रमाश्रित्यावसेयम् । न मन्दप्रयत्नोत्सृष्टानि सर्वं लोकं व्याप्नुवन्तीति तत्त्वम्, तद्द्रव्याणां स्थूलत्वात् तत एव तथा वृद्ध्यभावात् तथाऽवासकत्वाच्च । अन्योत्सृष्टानि तु—

'भिन्नाइ सुहुमयाए अणंतगुणवड्ढियाइ लोगंतं । पावेंति पूरयंति य भासाइ निरंतरं लोगं' ।। एतदपि 'जाइं भिन्नाइं निसिरइ ताइं अणंतगुणपरिवुड्ढीए परिवड्ढमाणाइं लोयंतं फुसंति 'त्ति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रवचनवचनमाश्रित्य । एतच्चाऽन्यतथावासनोत्पादकाभावापेक्षया ज्ञेयम् । एवं च सुरालयविमानेषु सङ्ख्यातीतयोजनायामेषु हरिणैगमैषिघोषणाश्रवणमपि सङ्गच्छते, अपूर्वापूर्वघण्टावृन्देन तदनुवादात्, विद्युच्छब्दयन्त्रेऽप्येवमेवोत्पद्यते शब्दः । यद्वा—विप्रकिरणविरहतोऽधिकमपि यायात् तदा कोऽपि न विरोधः स्वाभाविकव्याख्यानस्य ताभ्यामिति । कथं च लोकव्याप्तिरित्युपदर्श्य एकीयमतं सिद्धान्तयिष्यन्त आहुः—

'जइणसमुग्घायगइए केई भासंति चउहि समएहि । पूरइ सयलो लोओ अण्णे उण तीहि समएहिं' ॥ घटनामाह—'पढमसमए च्चिय जओ मुक्काइं जंति छद्दिसि ताइं । बीयसमयंमि ते च्चिय छदंडा होंति छम्मंथा ॥ मंथंतरेहि तइए समए पुन्नेहि पूरिओ लोगो' इति । अत्र यत् प्रथमसमये गमनं तत् समुद्घातीया दण्डा मन्थानश्चैकस्मिन्नेव समये ते, लोकमध्यस्थितभाषकापेक्षयैतत् । एतच्च स्वयम्भूरमणापरपर्यन्तवर्त्तिनो भाषकस्य भाषापेक्षयाऽप्यवगन्तव्यं, लोकान्तासन्नीभावभावात्तत्र ।

केचित्तु त्रसनाड्या बहिरपि चतसृषु दिक्ष्ववस्थितस्येत्यपि व्याचक्षते, परं सम्भावनामात्रमेव तत्, त्रसनाड्या बहिस्त्रसानां वाचकानामेवासम्भवात् । चतुर्भिः समयैर्लोकपूरणे घटनामाह—'दिसिवट्ठितस्स पढमोतिगमे ते चेव सेसया तिन्निति । स्वयम्भूरमणपर्यन्तस्याऽप्यूर्ध्वाधोऽलोकस्खलितत्वात् चतुर्भिरेव पूरणं, प्रथमे लोकप्रवेशात् शेषास्त्रयः पूर्ववत् । अन्यत्र त्रसनाड्यां प्रवेशः प्रथमेन । त्रसनाडीबहिर्विदिक्स्थितभाषकापेक्षया तु पञ्चभिरेव लोकपूरणं समयैः, कथमिति ? युक्तिमाह—'विदिसिट्ठियस्स समया पंचाइ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गमंमि जं दोन्नि 'त्ति । अत्रानुश्रेणि गतिरिति वचनाद् विदिशो दिशि गमनं, द्वितीयेन प्रवेशस्त्रसनाड्यां, शेषास्त्रयः पूर्ववत् । समयाविरोधं सामयिकं परिहरति—

'चउसमयमज्झगहणेत्ति पंचगहणं तुलाइमज्झस्स । जह गहणे पज्जंतग्गहणं चित्ता य सुत्तगइ ॥ चित्रगतित्वं तु 'कत्थइ देसग्गहणं कत्थइ घिप्पंति निरवसेसाइं । उक्कम-कमजुत्ताइं कारणवसओ निउत्ताइं ॥ तिवचनात् । प्रसिद्धं सदृशतमदृष्टान्तं दर्शयित्वा पुष्णाति स्वमतं—

चउसमयविग्गहे सति महल्लबंधंमि तिसमओ जह वा । मोत्तुं तिपंचसमये तह चउसमओ इह निबद्धो ॥ 'महल्लबंधंमि 'त्ति भगवत्यङ्गीयाष्टमशतकान्तर्गतमहाबन्धोद्देशके । कतिभागो लोकस्य भाषायाश्चेति व्याख्यानयन्नाह—'होइ असंखेज्जइमे भागे लोगस्स पढमबिइएसु । भासा असंखभागो भयणा सेसेसु समयेसु ॥ वक्तृमुखानुसारेण दण्डमथिसम्भवाद् आद्यद्वितीययोस्त्रिसमयव्याप्तौ लोकस्य भाषायाश्चासङ्ख्यातभागस्पर्शश्चतुःसमयव्याप्तौ प्रथमेन लोकप्रवेशो द्वितीयेन दण्डीभाव इति । तत्रापि स एव युक्तः, पञ्चसमयपक्षे तु विदिशो दिशि तस्याश्च लोके प्रवेशात् सुगम एवासङ्ख्यातभागस्पर्शः, शेषसमयेषु तु त्रिसमयव्याप्तिपक्षे सर्वोऽपि लोकस्तृतीयस्मिन् स्पृष्टः चतुःसमयव्याप्तिपक्षे तृतीयस्मिन् समये लोकस्य भाषायाश्च सङ्ख्यातो भागः ।

इयमत्र भावना—स्वयम्भूरमणापरतटे स्थितो वक्ता आद्ये पूर्वतटानुसङ्गिनं चतुरङ्गुलबाहल्यं दण्डं करोति तदा द्वितीये चोर्ध्वाधश्चतुर्दश-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रज्जूच्छ्रितो रज्जुबाहल्यदण्डः । एष च पराघातद्रव्यनिर्मितदण्डैर्भवति, तदैव च लोकमध्ये वासितद्रव्यदण्डोद्गमैरुत्तरदक्षिणलोकान्तगमनं, दण्डाश्च चतुरङ्गुलविस्तृता एव, तृतीये तु मन्था ऊर्ध्वाधोदण्डात् लोकमध्ये च ये दण्डास्ते विस्तृताः पुनस्त्रसनाडीं व्याप्नुवन्ति, एवं च लोकस्य सङ्ख्याततम एव भागः स्पृष्टश्चतुःसमयापेक्षया तृतीये चतुर्थे तु सर्वो लोकः स्पृष्ट एवेति, पञ्चसामयिक्यपेक्षया तु लोकस्य भाषाया अपि चासङ्ख्येयतम एव भागः स्पृश्यते, तत्र दण्डीभावाद् । भावना च सुकरैव, चतुर्थे च समये दण्डमथीभावात् पूर्वप्रतिपादितयुक्तेर्लोकस्य भाषायाश्च सङ्ख्येयतमो भागः, पञ्चमे तु पूर्णत्वात् सर्वोऽपि लोकः स्पृष्टः । एतच्च सर्वं तीव्रप्रयत्नवक्तृभाषामाश्रित्यैव, अन्यस्य तु लोकव्यापनस्यैवाभावात् । तथा च 'लोगस्स य चरमंते चरमंतो होइ भासाए' इति सम्पद्यते, परं समयवैषम्यमित्येतदेवाह—

'आपूरियंमि लोगे दोण्हवि लोगस्स तह य भासाए । चरमंते चरमंतो चरमे समयंमि सव्वत्थ ।। त्ति । चरमान्तव्याख्यानं चालोकगमनाभावप्रतिपादनाय भाषाया, अन्यथा लोकव्याप्तिकथनेनैव तत्प्राप्तेः । किमत्र प्राप्तं किं समयचतुष्केन त्रिभिर्वा समयैः पञ्चभिर्वेति ? चेद्, अस्तु सर्वेऽप्येते आदेशाः, परं चतुःसामयिकं यत् समुद्घातगत्येति यदादेशान्तरं, तदुपेक्षणीयमिति दूषयन्तस्तदाहुः—

'न समुग्घायगईए मीसयसवणं मयं च दंडंमि । जइ तो त्रि तीहि पूरइ समएहिं जओ पराघाओ'।। अत्र यद् दण्डसमये मिश्रश्रवणविरोध आपादितः । मिश्रश्रवणं चैवमाम्नायते यथा—'भासासमसेढीओ सुणेइ जं सुणइ मीसयं सद्दं । विसेढी पुण सद्दं सुणेइ नियमा परा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घाए' ॥ त्ति । विरोधश्चैवं—यत् समुद्घातगत्या लोकपूरणे यथा समुद्घाते प्रथमसमये ऊर्ध्वाऽधोलोकान्तस्पर्शी भवति दण्डः, तथाऽत्रापि भवेद् । एवं च ऊर्ध्वाऽधोव्यवस्थितानामेव मिश्रशब्द-श्रवणं सम्पद्येत, न पूर्वापरदक्षिणोत्तरासु दिक्षु । यथा हि विदिक्षु पराघातवासितान्येव शब्दद्रव्याणि श्रूयन्ते तथा दिक्ष्वपि प्रसज्येत, यदि च 'समश्रेणिस्थित' इत्यस्य 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षण'मितिन्यायादूर्ध्वाऽधःश्रेणिस्थित इति क्रियते व्याख्यानं, 'विश्रेणिस्थित' इत्यस्य चोर्ध्वाधोव्यतिरिक्तश्रेणिस्थित इति, न स्याद् यद्यपि सूत्रविरोधः स्पष्टः, तथापि नैतद्युक्तं, कथमिति चेद्, उक्तं 'जइ तो वी 'त्यादि । समुद्घाते हि जीवप्रदेशानामेव व्यापारः, अत्र तु वासितानामपरेषामपीति नात्र कपाटकरणकालो योग्यः । तथा च दण्डादनन्तरमेव मन्थीभावात् स्पष्टैव त्रिसामयिकी व्याप्ति-र्भवदनिष्टा समापद्येत ।

ननु कथं वैषम्यमेतयोरिति चेत्, स्पष्टमेतदुच्यते—'जइणे न पराघाओ स जीवजोगो य तेण चउसमओ । हेऊ होज्जाहि तहिं इच्छा कम्मं सहावो वा' ॥ यथाहि शब्दपराघातपरिणतशब्द-द्रव्याणामपि शब्दद्रव्यकार्यकरणं न तथा केवलिसमुद्घाते इति विषमता । तथाऽग्रेऽपि वाच्यम् । स समुद्घातो जीवव्यापारभूतः, अयं तु स्वाभाविकः । तत्र हि केवलिप्रयत्नविहिता व्याप्तिः, अत्र तु नैवं तथापि तत्र कपाटकरणे केवलिनामिच्छा कर्म तथाविधं स्वभावो वा, अत्र तु नैवैते युक्ता हेतव इति, भाषाद्रव्याणां स्वनु-श्रेणिगमनं पराघातपरिणतिश्च स्वभावः । तथा च स्यादेव दण्डादन-न्तरमेव मन्थाः, न तु कपाटमिति । काशकुशप्रायमालम्बयन्तम-पाकुर्वन्ति—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'खंधो वि वीससाए न पराघाओ य तेण चउसमओ। अह होज्ज पराघाओ हविज्ज तो सो वि तिसमइओ'॥ तथा च न समुद्घातवद्वृत्तिमहास्कन्धवद्वा भाषाद्रव्याणां लोकव्यापिता। अन्ये पुनरन्यथाहुः तन्निराचिकीर्षयाहुः–' एगदिसिमाइसमए दण्डं काऊण चउहि पूरेइ। अन्ने भणंति तंपि य नागमजुत्तिखमं होइ'॥ आगमविरोधः श्रेणिस्थितस्यापि पराघातद्रव्याणामेव श्रवणात्, युक्त्या तु यदि पुद्गलानामनुश्रेणिगमनं स्वभावस्तर्हि किमित्येकदिक्क एव दण्डो येनेदमुक्तं युक्त्यनुसारि स्यात् इति पर्यालोचने। अथ प्रयत्नजन्यो हि शब्दः, प्रयत्नश्च ताल्वादिद्वारा, वक्ता च दिगभिमुख इति तदा विश्रेणिमुखे तस्मिन् विश्रेणिस्थितो मिश्रं शृणुयादित्यापन्नम्, पटहादीनां तु न प्रयत्नो न चैकदिक इति तच्छब्दव्यापकता अन्यैव वाच्या, तन्नैतदादर्त्तव्यमागमाहतिभिः।

नन्वास्तां तावल्लोकव्याप्त्यादिविस्तरः, परं कायिकेन गृहीत्वा वाचिकेन निसृजति वक्तेति प्राक् प्रतिपादितम्। तत्र कथमन्यो गृह्णाति मुञ्चति चान्यः, को वा कायिको योगः?, कथं वा वाचिकेन निसर्गो भाषायाः?। सत्यम्, एकजीवविहितत्वान्नैष विरोधः। नहि वामेन हस्तेनाऽऽदाय दक्षिणेन नार्पयितुं शक्यते दृश्यते वा विरोधः। कायिको योगश्च जीवस्य कर्मपरवशतया गृहीतपरिणामितौदारिकादिकायजनितो व्यापारः, तदुपगृहीतश्च वचननिसर्गव्यापारो वाचिको योगः।

अत्राह–ननु वाक् कथं योगः?, यतः पुद्गलपरिणामः सा, पुद्गलपरिणामस्यापि च योगत्वे तस्याः, रसादीनामपि भवेद्योगता स्यादिति। किञ्च–कथं कायव्यापाराहृतवाग्द्रव्यविसर्गस्य भिन्नयोगता, कथं च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाग्योगरूपवाचिकेन योगेन निसर्गो वाच ? इति चेत्। सत्यम्, जीव-व्यापारसम्पाद्यत्वाद् वचोयोगता रूपादिकाश्च काययोगगता एवेति तेऽपि योगान्तर्गता एव। तथा वाग्योगस्य कायव्यापारनिर्वर्त्यत्वान्न योगताक्षतिः, लब्धिमतां द्वीन्द्रियादीनामेव तद्भावात्। केवलकाय-योगत्वे चैकेन्द्रियाणामपि भवेद्वाग्योगः, तथैव जीवव्यापारः काय-व्यापारो विशिष्ट एव वाग्योगविसर्जनपरायणो वाचिको योग इति न काचिदपि क्षतिः। सिद्धान्तेऽभिप्रेत्यैतदाहुः—

'गिह्णिज्ज काइएणं किह निसिरइ वाइएण जोगेण। को वाऽयं वा जोगो किं वाया कायसंरंभो ॥१॥ वाया न जीवजोगो पोग्गल-परिणामओ रसादिव्व। न य ताए निसिरिज्जइ सच्चिय निसिरि-ज्जए जम्हा ॥२॥ अह सो तणुसंरंभो निसिरइ तो काइएण वत्तव्वं। तणुजोगविसेसच्चिय मण-वयजोगत्ति जमदोसो ॥३॥ अहवा तणु-जोगाहिय-वइदव्वसमूहजीववावारो। सो वइजोगो भण्णइ वाया निसिरिज्जइ तेणं' ॥४॥ ति। तथा वाग्योगो जीवस्य पुद्गलप्रचयो-पष्टम्भक एवेति सुष्ठूच्यते वागिति।

तथा मन इति। तत्र 'मनिंच् ज्ञाने मनूयी बोधने' इति दैवादिकः तनादिकश्च, तस्माद् 'अस्' [९५२] इत्यौणादिकेऽसि सिद्धं मन इति। मन्यते—चिन्तयत्यनेन, मनुते—अवबोधयत्यनेनेति वा मनः। मनोवर्गणापुद्गलानाहृत्य कायिकेन योगेन मनस्तया परिण-मय्य मोचनं, मन्यमानानि मनोद्रव्याणि मन इति तत्त्वम्, तथा चाहुः—'तह तणुवावाराहियमणदव्वसमूहजीववावारो। सो मण-जोगो भण्णइ मन्नइ नेयं जओ तेणं ॥१॥ ति। एतच्च सामान्यतः सर्वेषामपि, धनबाहुल्येन धनी प्रशस्तरूपवत्त्वेन रूपीत्यादिवद् बहुल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनोद्रव्यपरिणमनाद् सञ्ज्ञिनामेव भण्यते । अत एवोच्यते- ‘सञ्ज्ञिनः समनस्का’ [तत्त्वा०] इति ।

ननु किमप्रसिद्धतममुच्यते एतद्यद्–सर्वेषां मनस्तद्विशेषेणैव च सञ्ज्ञीत्यादिव्यपदेश इति चेत्। सत्यम्, प्रथमं सामान्यतस्तावद-वधारय–‘प्रार्थनाप्रतिघाताभ्यां चेष्टन्ते द्वीन्द्रियादयः। मनःपर्यायवि-ज्ञानं युक्तं तेषु न चान्यथा’ ॥ इति सिद्धसेनीयं० ‘सव्वेसिं चउ दह वा सन्न’त्ति प्रसिद्धतरं च वाक्यं, सञ्ज्ञाया अभिलाषरूपत्वाद-भिलापस्य च सङ्कल्पविकल्परूपत्वेन मनस्त्वानपायादिति। विशेपस्तु सञ्ज्ञित्वविचारो हि अयमिति स एवोच्यते महापुरुषप्रणीतगाथाभिः–

‘जइ सण्णासंबंधेण सण्णिणो तेण सण्णिणो सव्वे। एगिंदिया-इयाण वि जं सण्णा दसविहा भणिया ॥ [विशेषा०] ‘एगिंदियाणं भंते! कइविहा सण्णा पण्णत्ता? गोयमा! दसविहा, तं जहा–आहारसण्णा भयसण्णा मेहुणसन्ना परिग्गहसन्ना कोहसण्णा माणसण्णा माया-सण्णा लोहसण्णा ओहसण्णा लोगसण्णा [प्रज्ञापना]। एवं द्वीन्द्रियादी-नामपी’ति प्रज्ञापनासञ्ज्ञापदसत्कश्पष्टाक्षरसद्भावादेवमुक्तम्। परिहा-रस्त्वत्रैवम्–‘थोवा न सोहणा वि य जं सण्णा नाहिकीरए इहइं। करि-सावणेण धणवं न रूववं मुत्तिमेत्तेणं’ ॥ मूर्तिश्च रूपादिसंस्थानाश्रय इति पूर्वं व्याहृतमेव, कथं व्यपदेशस्तर्हीत्याहुः–‘जह बहुदव्वो धणवं पसत्थरूवो अ रूववं होइ। महईए सोहणाए य तह सण्णी नाण-सण्णाए’ ॥ त्ति। अत्र हि प्रशस्तया महत्यैव ज्ञानावरणक्षयोपशम-जन्यमनोज्ञानसञ्ज्ञयैव सञ्ज्ञित्वम्। सञ्ज्ञा च त्रिधा ज्ञानरूपा, यदाहुः–‘सा सण्णा होइ तिहा कालिय–हेउ–दिट्ठिवाओवएसेण’त्ति। तत्र किं कालिक्याः स्वरूपम्? इत्याहुः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'इह दीहकालिगी कालिगित्ति सण्णा जया सुदीहंपि । संभरइ भूयमेस्सं चिंतेइ य किह णु कायव्वं ॥ ति । अत्र दीर्घशब्दः लुप्तो द्रष्टव्य इति ज्ञापनाय 'कालिगी 'त्ति पर्यन्तम् । भूतमेष्यच्च सुदीर्घमपि चिन्तयति तथा 'कथं नु कर्त्तव्यमिति चे 'त्यनेन त्रिकालगोचरता चेतसो न्यदर्शि दीर्घकालिकीसञ्ज्ञावताम् । उच्यते चात एव 'सर्वार्थानन्तरचरं नियतं चक्षुरादिवत् त्रिकालविषयं चेत' इति चेतसोऽप्राप्यकारिता आख्याताऽनेन महर्षिभिः । सत्यपि तथात्वेऽतीतानागतादीनां विनष्टानुत्पन्नानां ग्रहणान्न सर्वार्थान् प्रत्यविशेषादप्राप्यत्वस्य निखिलार्थगोचरताप्रसङ्गः, क्षयोपशमपाटवाधीनत्वात् तद्विषयस्य । एतेन चक्षुषोऽप्राप्यकारित्वे स्यात् सर्वार्थगोचरत्वं तस्येत्यपि प्रत्युक्तम्, क्षयोपशमानुसारितायाः तत्रापि सद्भावात् । योग्यदेशावस्थितानामेव विषयता, ततो न तत्रापि विरुद्धेति । निदर्श्यैवं सञ्ज्ञिनं तत्कार्यं चाहुः—

'कालियसण्णित्ति तओ जस्स तई सोय जो मणोजोग्गे । खंवेऽणंते धित्तुं मन्नइ तल्लद्धिसंपन्नो ' ॥ स कालिकसञ्ज्ञीति हेतुवाद—दृष्टिवादोपदेशाभ्यां भवन्ति सञ्ज्ञिन इति कालिकेन विशिष्यते । कोऽसावित्युक्तं 'यस्य सके 'ति । तथा चासौ प्रतिपादितकालिकसञ्ज्ञालब्धिसम्पन्नत्वाद्विशेषणद्वारा हेतुरयं काव्यलिङ्गाकारेण ज्ञेयः । किमित्युक्तं मनस्त्वपरिणमनयोग्याननन्तान् स्कन्धान् गृहीत्वा चिन्तयति । पूर्वं प्रतिपादितं 'भूतादी 'ति तु प्रकरणगम्यं कर्म ।

तथा च—' रूवे जहोवलद्धो चक्खुमओ दंसिए पयासेणं । तह छव्विहोवओगो मणदव्वपयासिए अत्थे ' ॥ अत्र षड्विधोपयोगश्च रूपादिविषयपञ्चकं षष्ठं सुखादि चेति गदितम् । मनसा स्पष्टात्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भासादेव रूपादीनामपि मनोविषयता, चक्षुरादिगोचरताव्यपदेशस्तु रूपादीनामसाधारण्याद् भवत्येव। यथा गोधूमाङ्कुरो यवाङ्कुर इत्यादि। नहि अत्र न पार्थःपवनप्रभापत्यादयो कारणानि, परं साधारणानि। असाधारणं च गोधूमादि परं, ततस्तेन तत्र व्यपदेशः तस्य तस्य। एवमेवात्रापि। न च वाच्यं मा भूत् मनोविषयता तर्हि तेषामिति, आलोकस्पष्टितरूपालोकन्यायेन तद्दैशगस्य तन्निबन्धनत्वात्, न चैतत् सर्वथाऽविषयतायां घटते। अथेतरेषां किं सर्वथैव न मनः, तथात्वे कथं ज्ञप्तिरर्थस्य, 'आत्मा सहैति मनसा मन इन्द्रियेण' इति-नियमात् अन्धकारनिकरे च वस्तुमात्रानवलोकनाद् दृष्टान्तवैषम्यमेव इतरथाऽदर्शनस्यैवापातात् सत्त्वे च को विशेष? इति मनसिकृत्य पराभिप्रायं परेषां स्तोकां मनोलब्धिं विवक्षवो दृष्टान्तपरमार्थं स्वतन्त्रे प्रकटयन्त ऊचुः—

'अविसुद्धचक्खुणो जह नाइपयासंमि रूवविन्नाणं। असण्णिणो तह ऽत्थे थोवमणो दव्वलद्धिमओ'॥ अत्रापि 'अविशुद्धचक्षुष्कस्ये'-त्यनेन तथाविधमननविकलचक्षुष्मतः स्थितिरुक्ता। तथा च बाला-दीनामपि संस्कारदार्ढ्याभावः सङ्गमितः। 'नातिप्रकाश' इत्यनेना-सञ्ज्ञिनां मनोवर्गणाल्पत्वप्रतिपादनेन उद्योतमनसोर्दृष्टान्तदार्ष्टान्ति-कताऽऽविष्कृता, कारणदर्शनायैव च 'स्तोकमनोद्रव्यलब्धिमता'-मिति। ननु चात्राऽसञ्ज्ञिनां स्तोकापि मनोद्रव्यलब्धिरुक्ता, परं नैतावता सर्वेषां संसारिणां मनःसत्त्वमिति प्रस्तुतप्रकरणशङ्कायां अन्येषामसञ्ज्ञिशब्दाऽप्रतिपाद्यानां विकलानामेकेन्द्रियाणां च किम-र्थोपलम्भ इति द्वापरायां चाहुः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



' जह मुच्छियाइयाणं अव्वत्तं सव्वविसयविन्नाणं। एगिंदियाण एवं सुद्धयरं बेंदियाईणं ' ।। ति । अत्र च ' अव्यक्त 'मिति स्तोकमनोद्रव्यप्रभवता वेदिता । ' सर्वविषये ' त्यनेन अतिदेश्यैकेन्द्रियादिष्वपि भावेन्द्रियपञ्चकस्य यथायथं सम्भवता ज्ञापिता, यत उच्यते– ' पंचिंदिओ वि बउलो नरोव्व सव्विंदिओवलंभाओ 'त्ति । अत्र ' सर्वेन्द्रियोपलम्भ ' इति सर्वेन्द्रियोद्भवज्ञानम्, न तु सर्वाणीन्द्रियाणि । सर्वेषामारभ्यैकेन्द्रियेभ्यो यावत्संमूर्च्छनपञ्चेन्द्रियाः तावच्छुद्धशुद्धतरशुद्धतमो बोध इति तत्त्वम् । तारतम्यनिमित्तं किं तर्हि तेषां ? समानेऽप्यप्रशस्ते लघुनि च मनने सतीति निरस्तमेतेन, तथापि स्पष्टमाहुः—

' तुल्ले छेयगभावे जं सामत्थं तु चक्करयणस्स । तं तु जह्कमहीणं न होइ सरपत्तमाईणं ' ।। ति । यद्यपि वैशिष्ट्यनिबन्धनं हेतुवादोपदेशिक्यस्ति सञ्ज्ञा द्वीन्द्रियादीनामेकेन्द्रियेभ्यः स्पष्टतमवस्तुबोधने, तथापि न साऽऽदृता अत्र, द्वीन्द्रियादितारतम्यस्यैतेनैव साध्यत्वात् । कीदृशी सेत्याहुः द्वितीयां वाऽऽहुः सञ्ज्ञां—

' जे पुण संचितेउं इट्ठाणिट्ठेसु विसयवत्थूसुं । वट्टंति नियट्टंति य सदेहपरिवालणाहेउं ।। पाएण संपए च्चिय कालंमि न याइदीहकालन्ना । ते हेउवायसन्नी निच्चेट्ठा होंति अस्सण्णी ' ।। ' स्वदेहपरिपालनहेतु 'रिति कथनेन अन्यव्यापाराभावः । ' प्रायेण साम्प्रते काले ' इत्यनेन कीटिकादीनां स्वालयविधानादिकदीर्घकालिकीसम्भवेऽविरोध इति ज्ञापयाञ्चक्रुः । अत एव चातिदीर्घकालज्ञा नैते इति स्पष्टं स्पष्टितम् । दृष्टिवादोपदेशिक्यपि प्रसङ्गानुरोधादेवात्र कथ्यते । सा चैवं—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'सम्मद्दिट्ठी सण्णी संते नाणे खओवसमियंमि। असण्णी मिच्छत्तंमि दिट्ठिवाओवएसेणं'॥ अत्र 'ज्ञाने क्षायोपशमिके' इति, केवलिनामेतत्सञ्ज्ञारहितत्वात् कथमिति 'खयनाणी किं सण्णी न होइ होइ व खओवसमनाणी। सण्णा सरणमणागयचिंता न सा जिणे जम्हा'॥ अत्रापेक्षिकसञ्ज्ञिवादसिद्धिं सङ्गमयितुमाहुः–'ऊहो न हेऊए हेउई न कालम्मि भण्णई सण्णा। जह कुच्छियत्तणाओ तह काले दिट्ठिवायंमि'॥ अत्रोहो–वितर्कमात्रम्। हेतुः–इष्टानिष्टप्रवृत्तिनिवृत्तिकारणं 'काल'त्ति कालिक्याख्या सञ्ज्ञा। पूर्वपूर्वस्योत्तरोत्तरापेक्षयाऽशोभनत्वं तदपेक्षया पूर्वपूर्वेषां उत्तरोत्तरापेक्षयाऽसञ्ज्ञित्वं न व्याहतम्। कुत्सायामप्ययमत्येव नञ्, यथाऽसतीत्यादौ। कस्य कासामित्यप्याहुः—

'पंचण्हमूहसण्णा हेउसण्णा बिइंदियाईणं। सुरनारयगब्भुब्भवजीवाणं कालिगी सण्णा'॥ छउमत्थाणं सण्णा सम्मद्दिट्ठीण होइ सुयणाणं। मइवावारविमुक्का सण्णाईया उ केवलिणो'॥ दीर्घकालिकी सञ्ज्ञापेक्षयैव सञ्ज्यसञ्ज्ञित्वव्यपदेश इति ज्ञापयितुं प्राकरणिकमुच्यते साऽऽशङ्कम्–'मोत्तूण हेउ–कालिय सम्मत्तकमं जहुत्तरविसुद्धं। किं कालिओवएसो कीरइ आईइ सुत्तंमि'॥ 'यथोत्तरं शुद्धं क्रम' मित्यनेन एतत्क्रमे प्रामाण्यमपरत्र वाऽऽनादरः सहेतुक इति सूचितम्।

'सण्णि त्ति असण्णि त्ति य सव्वसुए कालिओवएसेणं। पायं संववहारो कीरइ तेणाइए स कओ'॥ एतावता च प्रपञ्चेन सर्वेषां मनोद्रव्यसद्भावः साधितः, सञ्ज्ञित्वादिव्यपदेशश्च दीर्घकालिकी सञ्ज्ञयेति च साधितम्। स्पष्टं नेदं वृत्तावपि तत्त्वार्थस्य भगवतः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(२-२५)। 'तच्च सम्प्रधारणमेवं रूपं कस्य सम्भवति ? योऽनन्तानन्तान् मनोयोग्यान् स्कन्धान् आदाय मन्यते तल्लब्धिसम्पन्नो मनोविज्ञानावरणक्षयोपशमादिसमेतः। तथा च रूपोपलब्धिश्चक्षुष्मतः प्रदीपादिप्रकाशपृष्ठेन तद्वत् क्षयोपशमलब्धिमतो मनोद्रव्यप्रकाशपृष्ठेन मनःषष्ठैरिन्द्रियैरर्थोपलब्धिः, यथा चाऽविशुद्धचक्षुषो मन्दमन्दप्रकाशे रूपोपलब्धिः। एवमसञ्ज्ञिनः पञ्चेन्द्रियसम्मूर्च्छनजस्याल्पमनोद्रव्यग्रहणशक्तेरर्थोपलब्धिः। यथा चेह मूर्च्छितादीनामव्यक्तं सर्वविषयविज्ञानम्। एवमतिप्रकृष्टावरणोदयादेकेन्द्रियाणाम्, अतः शुद्धतरं शुद्धतमं च द्वीन्द्रियादीनाम् आपञ्चेन्द्रियसम्मूर्च्छनजेभ्यः, ततश्च तत् सञ्ज्ञिनामतिप्रकृष्टतरमिति'। एतावता सर्वेषां मनस्वितासिद्धावपि किं तदणु वा अनणु ? वा।

अत्राह कश्चिदात्मनः शरीरे सर्वत्र सत्त्वाद् युगपत् पञ्चेन्द्रियविषयोपलब्धिर्न भवति, ततो नैव युक्ता मनसोऽनणुतेति। परम् अज्ञानविलसितमेतत्। यतोऽणुनि तस्मिन्नभ्युपगम्यमानेऽपि तदवस्थैव युगपज्ज्ञानोत्पत्तिः, कथमिति चेद्। भव सावधानमनाः, स्पर्शनेन्द्रियं तावत् सर्वशरीरपर्यन्तवर्त्ति जेगीयते, अन्तर्दाहोपलब्ध्याऽस्थिक्वाथेऽपि च पीडोपलब्धेरसत्यत्वं यद्यप्येतस्य, तथापि तदभ्युपगमेनापि रसनेन्द्रियस्थानादिषु वर्तत एव तत्तत् किमिति न विषयद्वयोपलम्भप्रसङ्गः। रसाद्युपलब्धौ प्रतिबन्धकताकल्पने च किं निमित्तं तत्र, येन सा सत्यां च तत्कल्पनायां मनसो यावच्छरीरव्यापकतायां किं बाधकम्, प्रतिबन्धकान्यपि चानेकानि कल्प्यानि, तदपेक्षया लघोरेवोपयोगस्वभावस्य तथाकल्पनमेव न्याय्यम्।

किञ्च–यत्रेन्द्रियं रसनादि, तत्र चात्मापि विद्यत एव। स च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुखदुःखाश्रय इति किं सुखादिज्ञानं नोत्पद्यते विषयैः सार्कं पञ्चभिरपि ?। अपि चानुव्यवसायस्मरणादिकमपि कथं न भवति युगपत्, कथं चानेकाः क्रियाः शरीर एकस्मिन् ?, तन्न मनसोऽणुता न्याय्या। किञ्चाऽणुत्वे मनसः चक्षुरिन्द्रियकनीनिकायामल्पोपघाते किमिति तेजसो मान्द्यम् ?। किञ्चाऽवलोकनं मन्दं कथं चाग्निकणेन दाहे शरीरस्याग्निप्रचयेन वा दाहे पीडातारतम्यं मनसोऽणुत्वेऽणुमात्रदुःखवेदनेन साम्यप्रसङ्गात् उभयत्रापि।

एवं शरीरैकदेशे शैत्यग्रस्ते सर्वस्मिँश्च तथाभूते न कोऽपि स्याद्विशेषः, उपलभ्यते च कम्पविशेषोपलम्भः। न च वाच्यं स्मरणनिमित्तः स इति तदुल्लेखस्य ततस्तथादुःखोपलम्भस्य चाभावात्, अस्त्येव स्वप्ने इति चेत्, न तत्र केवलं स्मरणं किन्तु विद्यमानतयावभासः। न चैवमत्र। न चेन्द्रियत्वादसर्वगतत्वं तस्येति वाच्यम्। स्पर्शनस्य तथाभ्युपगमात् तथा प्रतिबन्धाभावाद्वा। अल्पबहुव्यापकता च दृश्यत एवेन्द्रियाणाम्, अप्राप्यकारित्वं तु न तेनाभ्युपगतं चक्षुषः, येन सिद्ध्येत् प्रतिबन्धो बहिर्व्याप्त्यापि। न च मूर्त्तत्वमप्यणुत्वसाधकं तस्य, तस्यापि तथाव्याप्त्यभावात्, गतिमत्त्वं चेन्द्रियत्वे स्पष्टमेव विरुद्धं, नियमितं च स्थानं न भवेदेवं तस्य, यदा च न कोऽपि विषयोपलम्भो विषयाद्यभावात्तदा क्वेदं तिष्ठतीत्यपि विचार्यमेव। सर्वशरीरगतत्वे च न कापि क्षतिरित्यलं विस्तरेण।

तथा 'प्राणापाना'विति। तत्र प्रकर्षेण अन्तर्मुखतया अन्यते—गृह्यते श्वास इति प्राणः, तथा अपैति बहिर्मुखतया अन्यते—श्वासो निष्काश्यते सोऽपानः। यदाहुः—'श्वासस्तु श्वसितं सोऽन्तर्मुख उच्छ्वास आहरः। आनो बहिर्मुखस्तु स्यान्निःश्वासः पान एतनः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[अभिधान०] इति । अथवा ऊर्ध्वगतः श्वासवायुः प्राणोऽधोगतः स एवापान इति । यदुच्यते–' प्राण ऊर्ध्वगतिर्वायुरधोगोऽपान उच्यते ' इति । यद्यपि प्राणादिकाः पञ्च वायव उच्यन्ते ।

' प्राणो नासाग्रहृन्नाभि–पादाङ्गुष्ठान्तगोचरः । अपानः पवनो मन्थापृष्ठपृष्ठान्तपार्ष्णिगः ।। समानः सन्धिहृन्नाभिपूदानो हृच्छिरोन्तरे । सर्वत्वग्वृत्तिको व्यान इत्यङ्गे पञ्च वायवः ' ।। [अभिधान०] इत्यादिना, परं सर्वे एतेऽन्ये चत्वारः प्राणानुसारिणः प्राणस्यैव वा स्थानविशेषतोऽभिधानविशेषा एते इति न तेऽत्रोक्ताः । अनुसारित्वं च व्यवहारलोकसिद्धमेव । यत आहुर्लौकिकाः—

' अथ ह प्राण उच्चिक्रमिषन्स्स यथासुहयः षड्वीशशङ्कून्सङ्खिदेदेवमितरान् प्राणान् समखिदत्तं हाभिसमेत्योचुर्भवगन्नेधि त्वं नः श्रेष्ठोऽसि मोत्क्रमी'रिति । अत एव चोपचारविधिनोच्यते–प्राणो वा आशाया भूतान्यथा वा अरा नाभौ समर्पिता एवमस्मिन् प्राणे सर्वं समर्पितं प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणाय ददाति प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राणः आचार्यः प्राणो ब्राह्मण इति [छां० ७–१५–१] प्राणो वै ब्रह्मेति व्यजानात् प्राणा ह्येव खल्विमानि भूतानि जायन्ते प्राणेन जातानि जीवन्ति प्राणं प्रयन्त्यभिसंविशन्तीति च । भृगुवल्ल्याम् ।

ननु किमिति तर्हि प्राणापानोभयग्रहणमिति चेत् , सत्यम् , प्राणग्रहणेनापि स्याद्ग्रहणं, परमुच्छ्वासनिःश्वासयोः स्पष्टो भेदो विरुद्धा प्रवृत्तिश्चेतिज्ञापनाय । यद्वा–प्राणायामादिषूभयोरुपयोगविशेषेणेति । अथवा आप्तागमेऽपि उच्छ्वासनिःश्वासयोरायुः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कारणतया विशेषितौ इति । यदि वा भवत्येवाऽसञ्ज्ञिनां नराणामुच्छ्वासमात्रग्रहो, न निःश्वासस्य तस्य प्राप्तिरायुःक्षयादिति सन्त्यनेकानि कारणान्युभयोक्तौ ।

ननु च किमिति प्राणापानाविति द्विवचनान्तम्, यतः प्राण्यङ्गत्वेन 'प्राणितुर्याङ्गाणा' [ ३-१-१३७ ] मित्येकत्वनियमादिति चेत् । सत्यम्, परमत्र नाङ्गाङ्गीभावः । नपुंसकत्वमेकत्वं च तत्रैव भवति । प्राणापानौ तु न प्राण्यङ्गभूतौ । अङ्गत्वं हि कर्णनासिकादेरेव । यद्वा-'सर्वो द्वन्द्वो विभाषयैकवद् भवती'-तिन्यायान्न क्षुण्णं किञ्चित् । अत एव च मुखनासिकाभ्यामुच्चार्यमाण इत्यादि सङ्गच्छते । एतेन 'शरीरवाङ्मनःप्राणापाना' इत्यत्रापि किं नैकत्वमित्यपि निरस्तम्, समानसमाधिकत्वात् ।

ननु चोक्तेष्वपि शरीरादिष्विन्द्रियायुराहारादीनि किं नोक्तानि?, न च वाच्यं न तानि पुद्गलरूपाणि, यतो भावेन्द्रियाणामतथात्वेऽपि द्रव्येन्द्रियाणां तथात्वस्याव्याहतेः, आयुश्चापि पौद्गलिकमेव, आहारस्तु स्पष्टः पौद्गलिक एवेति चेत् । सत्यमुक्तम्, अयुक्तं तूक्तम्, यतो द्रव्येन्द्रियाणि शरीराङ्गभूतान्येव आयुश्च श्वासकारणम्, आहारस्तु शरीरतया परिणमतीति शरीरलक्षणकार्यग्रहणगृहीत एवेति न न्यूनता । न च वाच्यं तर्हि मा भवतु वागादीनामपि ग्रहणम्, यतस्तान्यपि शरीरकार्यभूतान्येवेति । यतः शरीरवतामेकेन्द्रियाणां वाचः, वचस्विनामपि द्वीन्द्रियादीनां मनसः, प्राप्तकरणपर्याप्तभावानामपि लब्ध्यपर्याप्तानां श्वासपर्याप्तेरभावाच्च आवश्यकमेव शेषग्रहणस्य । न च कश्चिदपि शरीरी भवतीन्द्रियायुराहारशून्य इति विशेषता वागादीनाम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न च वाच्यं कथं क्रम एष, यतो यदि पर्याप्तिक्रमेणोद्देशः, तदा शरीरप्राणापानवाङ्मनांसीति वाच्यम्, यदि चोत्तरभावे पूर्वभावस्यावश्यकताज्ञापन, तदापि तथैव वाच्यमिति। योगस्य प्राधान्यादादौ योगानां वाच्यताऽभिप्रेता, तत्र च यथेच्छया पर्याप्तिक्रमेण पूर्वोत्तरलाभालाभक्रमेण वा न्यासः सुखावसेयः। श्वासोच्छ्वासयोः 'आद्यन्तयोर्ग्रहणे मध्यस्यापि ग्रहण'मिति न्यायेन, तदभावे वाऽङ्गमनसोरभावाच्च स्यादेव ग्रहणम्, परं लौकव्यवहारसिद्धत्वात् तयोरायुः कारणत्वाच्च स्पष्टग्रहणम्। योगानां च सति शरीरे वाग्, सति च वचने मन इति नियमादनुक्रमश्चोद्य एव न। एवं पुद्गलानां साक्षादुपकारं परिणमनोपकारं वा प्रदर्श्य नैमित्तिकमुपकारं प्रदर्शयन्त आहुः—

'सुखदुःखजीवितमरणोपग्रहाश्च' [तत्त्वा०] इति। तत्रोपग्रह इत्यनुवर्त्तमानमासीत् 'गतिस्थित्युपग्रहो धर्माधर्मयोरुपकारः' [तत्त्वा०] इत्यतः सूत्रात्, परं पूर्वसूत्रे पुद्गलानां परिणम्यमानाः पदार्थाः प्रतिपिपादयिषिता इति न तत्र तत्सम्बद्धं, मण्डूकप्लुतिन्यायः चकारेण 'प्रत्यये च' इत्यत्रेव वा अनुवृत्त्यभावेऽपि पुरतः सा भवेदिति ज्ञापनं च दुरवबोधमिति नादृते सूरिवर्यैः, निमित्तकारणता च ज्ञापिता पुद्गलानां सुखादिषु, शरीरादीनां तूपादानभूता इति।

तत्र सुखयति–आह्लादयति जीवमिति सुखम्। यद्यप्यात्मस्वभावभूतमेतत् तथापि ज्ञानस्य स्वभावभूतस्यापीन्द्रियादिवदुपष्टम्भकाः पुद्गलाः। यत इष्टस्पर्श–रस–गन्ध–वर्णवत्पुद्गलसमागमे इष्टशब्दादिसमागमे च सम्पद्यत एव सुखम्। न च विहायाऽऽत्ममननक्षान्त्यादिजं सुखमन्यद् विना पुद्गलान् भवति। तथा च नियम एव यदुत—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वैषयिकं सुखं पुद्गलोपगृहीतमेव, सातवेदनीयमप्येतद्धेतुकमेव । अनेन कथमदृष्टवियुक्तानां सिद्धात्मनां सुखम्, सुखमात्रेऽदृष्टजन्यत्वावधारणात् तदुत्कर्षे तदुत्कर्षात्तदपकर्षे तदपकर्षाच्चेति प्रलापो निरस्तः । पौद्गलिकस्यैवास्य तथात्वाद्, अन्यथा योगिनां सुखित्वाभावप्रसङ्गात्, आत्मोद्भवस्य तस्य तदजन्यत्वात् । न चादृष्टमात्रस्य सुखजन्यता किन्तु तद्विशेषस्य, विशिष्टादृष्टस्य विशिष्टसुखकारणत्वावधारणाद्, अन्यथाऽनेकविधानां सुखानामेकस्मिञ्जीवे दृश्यमानं तारतम्यं न कथञ्चिदपि घटामियृयात् ।

तथा दुःखयति–विमुखं करोति प्राणिनमिति दुःखम्–असातोदयसम्पाद्य आत्मपरिणामविपर्यासः । सोऽप्यनिष्टस्पर्श–गन्ध–वर्णवत् पुद्गलशब्दादिसमागमे । ननु चाऽऽधिजमपि विद्यत एव दुःखम् । सत्यम्, तस्यापि इष्टवियोगानिष्टसंयोगवेदनादिभवत्वात्, इष्टादयश्च पुद्गलरूपा एव । तत्त्वतस्तु सर्वमपि वैषयिकं सुखं वा दुःखं वा तथा तथा पुद्गलसान्निध्येऽपि विकल्पजमेव, यदाश्रित्योच्यते—

'कारणवशेन यद्यत् प्रयोजनं जायते यथा यत्र । तेन तथा तं विषयं शुभमशुभं वा प्रकल्पयति ॥ अन्येषां यो विषयः स्वाभिप्रायेण भवति तुष्टिकरः । स्वमतिविकल्पाभिरतास्तमेव भूयो द्विषन्त्यन्ये ॥ तानेवार्थान् द्विषतः तानेवार्थान् प्रलीयमानस्य । निश्चयतोऽस्यानिष्टं वा न विद्यते किञ्चिदिष्टं वा ॥ [प्रशम०] इत्यादि । सर्वमपि चैतद्व्यवहारपथानुसारेण । निश्चयस्तु वैषयिकस्य सर्वस्य दुःखोत्पादकत्वमेव विकल्पस्य, यदाश्रित्योक्तं योगाचार्यैरपि–' परिणाम–ताप–संस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन' इति, गौतमेनापि विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः । (न) सुख-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यान्तरालनिष्पत्तेः । बाधनाऽनिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः । दुःखविकल्पे सुखाभिमानाच्च ' [न्यायदर्शनम्] इति । तथा बाधनालक्षणं दुःखं । तदत्यन्तविमोक्षोऽपवर्गः । श्रुतिकारा अपि ' सुखं स्वाभाविकं यत्र बुद्धिग्राह्यमतीन्द्रिय 'मित्यादिनाऽस्यास्वाभाविकतां ज्ञापयन्तस्तदेवाहुः । आहुश्चात एव 'अशरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाऽप्रियाभ्यां, न वै शरीरस्य प्रियाऽप्रिययोरपहतिरस्ति, अशरीरं वा वसन्तं न प्रियाऽप्रिये स्पृशतः । अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्येतानि तद्यथैतानि अमुष्मादाकाशात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन स्वेन रूपेणाभिनिष्पद्यन्ते ' इत्यादि । आर्षवचनानुसारिणस्तु स्पष्टतरमेवाहुर्वैषयिकस्य सुखस्य दुःखानुबन्धताम् , यथा—

' दुःखद्विट् सुखलिप्सुर्मोहान्धत्वाददृष्टगुणदोषः । यां यां करोति चेष्टां तया तया दुःखमादत्ते ॥४०॥ [प्रशम०] कलरिभितमधुरगान्धर्वतूर्ययोषिद्विभूषणरवाद्यैः । श्रोत्रावबद्धहृदयो हरिण इव विनाशमुपयाति ॥ गतिविभ्रमेङ्गिताकार–हास्यलीलाकटाक्षविक्षिप्तः । रूपावेशितचक्षुः शलभ इव विपद्यते विवशः ॥ स्नानाङ्गरागवर्त्तिकवर्णकधूपादिवासपटवासैः । गन्धभ्रमितमनस्को मधुकर इव नाशमुपयाति ॥ मिष्टान्नपानमांसौदनादिमधुररसविषयगृद्धात्मा । गलयन्त्रपाशबद्धो मीन इव विनाशमुपयाति ॥ शयनासनसम्बाधन सुरतस्नानानुलेपनासक्तः । स्पर्शव्याकुलमतिर्गजेन्द्र इव बद्ध्यते मूढः ॥ एवमनेके दोषाः प्रणष्टशिष्टेष्टदृष्टिचेष्टानाम् । दुर्नियमितेन्द्रियाणां भवति बाधाकरा बहुशः ॥ एकैकविषयसङ्गाद्रागद्वेषातुरा विनष्टास्ते । किं पुनरनि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यमितात्मा जीवः पञ्चेन्द्रियवशार्त्तः ॥ नहि सोऽस्तीन्द्रियविषयो येनाभ्यस्तेन नित्यतृषितानि । तृप्तिं प्राप्नुयुरक्षाण्यनेकमार्गप्रलीनानि ॥ रागद्वेषोपहतस्य केवलं कर्मबन्ध एवास्य । नान्यः स्वल्पोऽपि गुणोऽस्ति यः परत्रेह च श्रेयान् ॥ आदावत्यभ्युदया मध्ये शृङ्गारहास्यदीप्तरसाः । निकषे विषया बीभत्सकरुणलज्जाभयप्रायाः ॥ यद्यपि निषेव्यमाणाः मनसः परितुष्टिकारका विषयाः । किम्पाकफलादनवद् भवन्ति पश्चाददतिदुरन्ताः ॥ यद्वच्छाकाष्टादशमन्नं बहुभक्ष्यपेयवत् स्वादु । विषसंयुक्तं भुक्तं विपाककाले विनाशयति ॥ तद्वदुपचारसम्भृत-रम्यकरागरससेविता विषयाः । भवशतपरम्परास्वपि दुःखविपाकानु-बन्धकराः ॥ अपि पश्यतां समक्षं नियतमनियतं पदे पदे मरणम् । येषां विषयेषु रतिर्भवति न तान् मानुषान् गणयेत् ॥ विषयपरिणा-मनियमो मनोनुकूलविषयेष्वनुप्रेक्ष्यः । द्विगुणोऽपि च नित्यमनुग्रहोऽ-नवद्यश्च सञ्चिन्त्यः' ॥ [प्रशम०] इत्यादिना स्थाने स्थाने 'प्रीतेरा-त्माश्रयत्वादहेतुः (दप्रतिषेधः) । न पुत्रपशुस्त्रीपरिच्छदहिरण्यान्ना-दिफलनिर्देशा'दिति तु गौतमीयं वचो वैषयिकस्यापि सुखस्यात्म-मात्रकारणतानिवारणपरम्, परं न ततः सुखदुःखयोर्वैषयिकयोः कल्पनोद्भवत्वहानिः । 'विषयनिमित्ते च सुखदुःखे' इत्यत्रापि कल्पनोद्भवमध्याहृत्यैव व्याख्येयम् । तथा च सत्यपि मनोज्ञस्पर्शादौ आर्त्तस्य सुखानुपलम्भः कीटिकादीनां च विपरीतत्वेऽपि न हानिः, न वा संसारभीरूणां मनोहरविषयत्यागोपदेशे त्यागे वा सुखत्यागो-पदेशः सुखत्यागो वाऽयमित्यनिष्टानुबन्धिताज्ञानम् ।

तथा जीवितमिति । तत्र जीवनं जीवितं भावे क्तविधानात् । यद्वा–जीवतीति जीवितं–प्राणधारणम्, अकर्मकात् क्तः कर्तरि धात्वर्थे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नोपसङ्ग्रहाज्जीवतेरकर्मकत्वम् । अत एव च नेदं प्राग्गृहीतशरीरपद-सूचितायुषा गतार्थम्, आयुष एव जीवितकारणात् तस्याप्युपग्रहः पुद्गलैरेव । यत उच्यते 'दश जीवितधामानि शिरोरसनबन्धनम् । कण्ठो स्रं हृदयं नाभिर्बस्तिः शुक्रौजसी गुद'।। मिति । धारणं चैतेषां यथायथमाहारं विज्ञाय देशकालमात्रद्रव्यगुरुलाघवं यथर्तु चोपयोजयेद्यदा । अत एवोच्यते-'धर्मो ह्यधीनो देहस्य देहश्चाहार-सम्भवः । शरीरे तु निराहारे दुष्करा कर्मनिर्जरा ।। अपेक्ष्य चैतदेव 'सव्वत्थ संजमं संजमाओ अप्पाणमेव रक्खिज्जे'त्यादि । श्रीपरम-मुनिभिरपि-'अहो जिणेहिं असावज्जा वित्ती साहूण देसिया । मोक्खसाहणहेउस्स साहुदेहस्स धारणे'ति । देहस्स धारणं संजमाय तयसम्भवे कओ तस्से'त्यादि च । अत एव चान्यैः-'अन्नं वै प्राणा' इति 'अन्नमय आत्मे' त्यादि चोच्यते ।

ननु सत्यायुषि किमेतेनाऽसति चापि चेति चेत् । सत्यम्, यथै-वायुषः सद्भाव आवश्यको जीविते श्वासोच्छ्वासयोश्चैवमेवाहारा-देरपि । नहि कार्यमेकतरकारणजन्यं किन्तु 'सामग्री वै जनिके'ति नियमात् । अनेन भक्तपाननिरोधस्य कथमतिचारतेत्यपि प्रतिपादितम् । विना जीवितनैरपेक्ष्यं तद्विधानस्यापि वधवदसम्पत्तेः । अत एव चान्यैरतिशयितमुच्यते 'अन्नं ब्रह्मेति व्यजानात् अन्नाद् ह्येव खलु इमानि भूतानि जायन्ते, अन्नेन जातानि जीवन्ति अन्नं प्रयन्त्यभिसं-विशन्तीति तथा तदप्यन्नाद्यं जायते' इत्यादि च । अनेन च केवलिनां कवलाहाराभावः प्रत्युक्तः, जीवितोपग्राहकाभावे तदभावात् ।

तथा मरणं-जीवितापगमः । स च यद्यपि प्राणिलाभावजनित इति पुद्गलयोगाभावजनितः, तथापि तस्यापि कारणासंयोगसद्भावे एव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाव इति यथार्थैव पुद्गलनिमित्तता मरणस्य । अनेन चेदमावेदितं यदुत–येषामौपपातिकादीनामायुरनपवर्त्तनीयं, न तेषां मरणं पुद्गलविहितम् , सोपक्रमा यद्यपि ते । इतरेषां तु जीवितमपवर्त्तते एवाग्न्याद्यैः । यत उच्यते—

'सोपक्रममायुष्कं वेदनयाऽऽर्त्तस्य मूर्च्छतो जन्तोः । बन्धप्रायोग्याभ्यां विगच्छति स्नेहरौक्ष्याभ्यां ॥१॥ निरुपक्रमं तु न तथाऽऽयुष्कं दृढसंहतं यदिष्टं तत् । न त्वग्न्याद्यैरनुपक्रम्यं कङ्कटुकमिव राद्धं ॥२॥ आयुष्कस्यावयवा बन्धनमुक्ता झटिति ते तस्मात् । आर्द्राद् वस्त्राद् यद्वत् प्रशोष्यमाणा जलावयवाः' ॥३॥ कानि च तानि कारणानि ? येभ्यो मरणमिति चेद्, एतानि–'प्राणाहारनिरोधा–ध्यवसाननिमित्तवेदनाघाताः । स्पर्शश्चायुर्भेदे सप्तैते हेतवः प्रोक्ताः ॥ इति । शीतोष्णदण्डकशाङ्कुशरज्जुखड्गादयोऽपि यथायथमत्रैवान्तर्भवन्तीति न पृथक् प्रतिपादिताः ।

ननु च यदि एतैः सम्पाद्यते मरणम् , आयुषो वैयर्थ्यम् , अन्यथा च मरणोपग्रहत्वं निरर्थकं चेत् । सत्यं, निरुपक्रमायुष्कस्य तु न किञ्चिद् विहाय पीडामन्यत् कर्तुं शक्नुवन्ति प्राणाहारनिरोधादीनि प्रकृष्टान्यपि । सोपक्रमायुषां तु व्यपरोपयन्त्येव जीवितम् । न चैवं कर्मणोऽऽनर्थक्यं तस्यैवोपक्रमात्तेः तथा बद्धं च तदिति नाऽनाश्वासः कश्चित् । ननु कथं दीर्घकालवेद्यं कर्म वेद्यतेऽल्पेन ? कथमन्यथा न कृतनाशाऽकृतागमप्रसङ्गः ? परभवीयस्यातथाविहितस्य तथानुभवप्रसङ्गादिति चेत् । न तावत् परभवीयं न निबद्धमतथानिबद्धं वा, दीर्घकालिकस्यापि च तस्यापवर्त्तनं तु विततवेष्टितवस्त्रशोषणन्याय उपरि प्रतिपादितो यस्तं नीरोग–भस्मकरोगभोजनन्यायश्च यस्तमनुसृत्यानुशीलनीयम् । तथा चाहुः पूज्याः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'कम्मोवक्कामिज्जइ अपत्तकालंपि जइ तओ पत्ता। अकयागमकयनासा मोक्खाणासासआ दोसा ॥१॥ न हि दोहकालियस्स विनासो तस्साणुभूइओ खिप्पं। बहुकालाहारस्स व दुयमग्गियरोगिणो भोगो ॥२॥ सव्वं च पएसतया भुंजइ कम्मं णुभागओ भइयं। तेणावस्साणुभवे के कयनासादओ तस्स ? ॥३॥ किंचिदकाले वि फलं पाइज्जइ पच्चए य कालेणं। तह कम्मं पाइज्जइ कालेण विपच्चए अण्णं ॥४॥ जह वा दीहा रज्जू डज्झइ कालेन पुंजिया खिप्पं। वितओ पडो व सुस्सइ पिंडीभूओ उ कालेणं' ॥ [विशेषा०] इत्यादि। तत्त्वतस्तु यदि कर्म नोपक्रम्यते तर्हि त्यक्तसांसारिकसुखासङ्गानां महात्मनां निष्फलमेव तपोनियमादि प्रसज्येत, भोगादेव क्षयस्याङ्गीकारात्। न च स्यादेवं मोक्षोऽपि, अनुक्रमवेदनात् सम्यक्त्वाद्यप्राप्तेः कालनियमाप्राप्तेश्च। अनेन 'हिंस्यकर्मविपाकेऽपि निमित्तत्वनियोगतः। हिंसकस्य भवेदेषा दुष्टा दुष्टानुबन्धत'॥ [अष्टके] इत्यपि समर्थितम्। तदेवं पुद्गलविहितोपकारव्याख्यानात् तदुपकारस्य सकलप्राणिसिद्धतया तेषां च प्रत्यक्षतया सिद्धिरप्रत्यूहा ध्वनिता। एतदेव ज्ञापनाय च 'ज्ञेया' इति अत्र योजितं पूज्यैरिति।

'धम्माऽधम्माऽऽगासे'ति द्वितीयगाथाया व्याख्या-अत्र हि गाथायां 'धम्माधम्मागासा' इति समस्तं यत् पदम्, तत् तेषामेकैकद्रव्यत्वेन सम्भ्रमाभावात्, यतो बहुवचनं बहुत्ववत्स्वेव भवति। बहुत्वं च जघन्यतोऽपि त्रिरूपम्, तच्च सर्वेषामेषां प्रत्येकमेकत्वात् सङ्गच्छत एव। एकत्वं च तेषामखण्डत्वेन तथाभावात्। तथा च प्रदेशार्थतयाऽसङ्ख्यातानन्तत्वे अपि भवन्ती न विरुद्धे। न च वाच्यं असङ्ख्या धर्मास्तिकाया इत्यादिवाच्यप्रसङ्गः। एवं प्रदेशा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्थापेक्षया तस्यापीष्टत्वात् प्रसङ्गत्वाभावात्, प्रसङ्गो हि अनिष्टापत्तौ, सैव च नात्र। व्यपदिश्यते च–' असङ्ख्येयाः प्रदेशाः धर्माधर्मयोः' ' आकाशस्यानन्ता ' [ तत्त्वा० ] इति । असङ्ख्येया धर्मास्तिकाया इति त्वसमर्थत्वान्नाभिधेयम्, प्रदेशापेक्षयैवासङ्ख्यातत्वात् । यद्-पेक्षयैव बहुत्वं वस्तुगतं तदपेक्षया तद्वचनस्य न्याय्यत्वाद्, यथाहि– व्यवहारे दारशब्दस्य पुंसि बहुवचनान्तत्वे नियते, न तदर्थवाचकस्त्री-योषिदादिशब्दानामपि तथाप्रयोग उचितः । एवमत्रापि । किञ्च-असङ्ख्यप्रदेशो लोको गतिस्थित्यवगाहसाहाय्यस्वभावानि चैतानि प्रतिप्रदेशं विद्यन्त एव, तन्नानेकद्रव्यता तेषां सफला, न चास्ति ।

कथं भवत्यवस्थानमेकस्मिन् प्रदेशे त्रयाणां भिन्नरूपाणामिति ? चेद्, रूपिणामपि तावत् पूर्वप्रतिपादितसुवर्णपारदन्यायेनाविरोधे को विरोधोऽमूर्त्तानां तथास्थाने ?, अवधारयतु वा यथा दीपशतप्रभा एकत्रावतिष्ठन्ति, भिन्नाश्च ताः, एकैकापसारणे तत्तत्प्रभाणामेवाप-गमात् । कथमेतन्निर्णय ? इति चेद्, विविधवर्णकदीपालयनिवेशेन निर्णयम् ! न च मातृमोदकवद् यथा तथा वचनगौरवमात्रेण ग्राह्यम् । अनेन चैतदपि प्रत्युक्तमेवावसेयम्–यत् पञ्चचत्वारिंशल्लक्ष-योजनमिते सिद्धिक्षेत्रे कथमनन्ता अवस्थिताः सिद्धाः परस्परं भिन्ना *विविधावगाहनाश्च ? इति, समानयोगक्षेमत्वात् । अवगाहनाश्च* तेषां न शरीरविहिताः, किन्तु स्वप्रदेशावगाहरूपैवेति । *तथा* चोच्य-तेऽपि–' आऽऽकाशादेकद्रव्याणि ' [तत्त्वा०] इति । न चास्ति तेषां गमनादिका क्रिया, अमूर्त्तत्वात्, जीवानां तु मूर्तिमत्त्वात् कथञ्चित् संसारिणां न विरोधः । मुक्तानां तु नास्त्येव गमनादि । ' अलोकप्र-विष्टस्य सततोर्ध्वगमन'मिति तु दुर्जनप्रलाप इति निदर्शितमेव । यापि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च इतो लोकालोकान्तं यावद् गतिर्मुक्तानाम्, सापि न स्वयं विहिता, किन्तु पूर्वप्रयोगादिजैवेति । तथा च गमनाभावान्न शून्यता त्रैलोक्यप्रदेशस्यापीति युक्तैवैकद्रव्यता तेषाम्। आनर्थक्यं च यदि स्वीक्रियते तदापि बहुत्वस्यैकं तन्मुक्त्वा शेषाणामर्थकारित्वाभावात् स्पष्टमेवावस्तुत्वापत्तेः । प्रत्येकसाध्यमेव च गत्यादि, तद्युक्तमेकैकद्रव्यत्वं त्रयाणामेतेषाम् । जीवाः पुद्गलाश्चानन्ता इति प्रत्येकं बहुवचनान्तमभ्यधायि सूरिभिः ।

ननु च कथं जीवानां बहुत्वं ? यत एकस्यैव ब्रह्मणोऽवयवा एते, यथा च कृशानुकणस्यापि दहनसामर्थ्यं, विस्फुरन्ति विस्फुलिङ्गास्तस्मात् । तद्वदेवात्रापि ब्रह्मणः शेषजीवविनिर्गमः । गमनाद्यभावादात्मनस्तद्रहितप्रदेशाभावान्नैतत् सङ्गतम्। अग्नेर्हि न सर्वव्यापकत्वम्, तथा च तस्यावयवाः स्युर्भिन्नाः । न चैवमत्र । तथा नाग्नेः स्वाभाव्येन स्फुलिङ्गोत्पत्तिः, किन्तु दाह्यवस्तुवैचित्र्योत्पादिता, अन्यथा लोहाद्यग्नेरपि भवेत् सा । किञ्च नामांशत्वं भवेदसम्बद्धत्वे सति, लोकविरुद्धत्वं चैतत्, तन्निर्गममात्रेण चांशत्वे घटमृदिव पृथिव्याः, कः किमाह ?–जीवस्योत्पत्तिः तावदभ्युपगता भवतीतरस्येश्वरत्वात्, न्यूनता च ब्रह्मणोऽवयवापगमात् क्रमेण वस्त्रस्यैव तन्त्वपगमे ।

किञ्च–एकद्रव्यत्वं यद् ब्रह्मणोऽभिमन्यते भूयोवयवबद्धत्वं प्रतिनियतावयवबद्धत्वं सर्वावयवबद्धत्वं वा ? । आद्ये, निर्गमे अंशानां स्पष्टैवानेकद्रव्यता, अंशस्यापि गुणादिमत्त्वेन द्रव्यत्वानपायात्। नहि अग्निकणो न द्रव्यं । प्रतिनियतावयवत्वेऽपि निर्गतानां तावदादित एव भिन्नद्रव्यतेति कथङ्कारमञ्चति घटाकोटिमेतत्। सर्वावयवसम्बद्धत्वे च स्फुटं दृष्टान्तवैधर्म्यम्, भिन्नत्वात् स्फुलिङ्गानामग्नेः। सत्यपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च भिन्नत्वे चेद् अंशत्वं, लोकबाधः स्पष्ट एव। लोके हि सत्येव सम्बन्धे अंशांशिभावः, न व्यतिरिक्तत्वे। अत एव च 'एगो काओ दुहा जाओ' इत्यादि पठ्यते। किञ्च–सम्बद्धत्वे अंशानां कथं न सुखदुःखोद्भवप्रसङ्गो ब्रह्मणः, अविद्यारहितत्वाच्चेत्, तदसङ्गतम्, अंशस्य सम्बद्धवत्त्वात्। नहि शरीरैकदेशे जायमाना नान्यत्र वेदना। किञ्च–कथं शुद्धब्रह्मणः अंशाः सङ्गता अविद्यया ?, शुद्धेषु च कथं 'न च पुनरावर्तते' इति योग्यम्। कर्मापरनामाविद्यासम्बन्धे कथं च अंशस्य भवति शरीरव्यापिता, मनोऽणुपक्षोदीरितदोषाणां वज्रलेपायमानत्वात्। हरिचन्दनदृष्टान्तोऽपि विप्रतारकताज्ञापकः, यतो नहि पुद्गलानामप्रारे भवेत्तथा शैत्यम्, न चानवयवः स। दीपदृष्टान्तोऽपि प्रत्युक्त एव। अनेन तेजःपुद्गलानां तत्र प्रसरणदर्शनान्न चास्यांशत्वात् प्रसरो, ज्ञानं चेत् तस्य प्रसरति शरीरे, तदप्यसत्यं ज्ञानस्यांशाविनाभावित्वान्न प्रसरो युक्तः। नहि गुणो गुणिनं विहायाऽवतिष्ठते कचिद्, गुणगुणित्वलोपप्रसङ्गात्। कथं च ब्रह्मणोऽविद्यारहितत्वेऽपि इतरांशानां तत्सहितत्वान्न भवतीतरेतरसुखदुःखोपभोगः ?, तथाभावेऽपि ब्रह्मण इतरेषां चांशांशित्वाभ्युपगमो न मोहमतिवृत्य ख्यापयति भावुकतां भद्रस्य।

ननु यथा अग्निकणो भिन्नोऽग्नेः स्वप्रकाशमात्रव्यक्तोऽप्यंश इति सुवर्णस्य वांऽश इति भिन्नत्वेऽपि, तथाऽत्रापि किं न भवेदिति चेत्। सत्यम्, स्यात् परं सामान्यापेक्षमेवैतत्, न तु विशेषापेक्षम्। अत्र तु ब्रह्मण इति विशेषेण निर्देशः। चूतनिम्बकदल्यादीनां वनस्पतिरिव जीवसामान्यस्याऽस्तु इयमाख्येति चेद्। जीव चिरं, परं नैवमंशकल्पना युक्ताऽत्र, सामान्यस्य निरवयवत्वात्। सांशता हि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशेषः, तस्या अपि स्वयं निरवयवता, समुदायापेक्षयैवावयवता यतस्तस्याः, तथा चापेक्षिकी स्यादेवं सा, यतो न विद्यते परस्परावयवसम्बद्धता, तत् परमार्थतोऽसत्यप्यंशता कल्पितैवेति प्राप्तं, वनस्पतेरिव व्यपदेशे च तथा वृक्षविशेषाणामिव जीवानां न कोऽपि विरोधः, आपेक्षिकवादाभ्युपगम एव च दोषो भवतो महानापद्यते। एतेन यदुच्यन्ते—

अंशो नानाव्यपदेशादन्यथा चापि दास–कितवादित्वमधीयत एके। मन्त्रवर्णाच्च। अपि च स्मर्यते। प्रकाशादिवन्नैवं परः। स्मरन्ति च। अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्। असन्ततेश्चाव्यतिकरः। इति सूत्राणि। सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति ब्रह्मदासा ब्रह्मदासा ब्रह्मैव इमे कितवा इति, त्वं स्त्री त्वं पुमानसि त्वं कुमार उत कुमारी त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः इति, सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिभवदन्यदास्ते इति, नान्योऽतोऽस्ति द्रष्टा इति, तावानस्य महिमा ततो ज्यायाँश्च पुरुषः पादोऽस्य सर्वभूतानि त्रिपादस्यामृतं दिवि। तथा ममैवांशो जीवलोके जीवभूतः सनातन इति, एकस्तथा सर्वभूतान्तरात्मा न लिप्यते दुःखफलेन बाह्य' इत्यादिश्रुति–स्मृतिवाक्याद्याश्रित्य विहितानि सङ्गतान्येव तानि।

यद्यपि च नैतानि वाक्यानि केवलविशेषरूपेऽपि विरुद्धानि। यथाहि–'सोऽन्वेष्टव्य' इत्यत्र श्रुतपूर्वामवस्थां शुद्धां जीवस्य प्रत्यभिज्ञाप्य उपदिश्यते जीवस्य ज्ञानगुणलक्षणत्वाज्ज्ञानवत्त्वेऽपि किमेते आचरन्त्येवमिति कर्मप्राबल्यं विचारयन् ब्रूयात् कश्चन यदुत–'ब्रह्मदासा' इति, वचनव्यत्ययस्तु छान्दसत्वात् 'त्वं स्त्री त्वं पुमानसी'

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्याद्यपि च जीवस्यैवैकस्य तथा तथा भावोत्पादज्ञापनेन निर्विण्णतां जनयति वक्ता श्रोतुः । तथोच्यते चार्षेऽपि—

'माता भूत्वा दुहिता भगिनी भार्या च भवति संसारे । व्रजति सुतः पितृतां भ्रातृतां पुनः शत्रुतां चैव' ।। [प्रशम०] इत्यादि । तथा 'सर्वाणि रूपाणी'ति तु आत्मनोऽनादिं संसारभ्रान्तिं दर्शयन्निर्वेदयति वक्ता भवान् । आर्षेऽपि—'न सा जाइ न सा जोणी न तं ठाणं न तं कुलं । न जाया न मुआ जत्थ सव्वे जीवा अणंतसो' ।। इत्यादिवचनमुपलभ्यत एव । परं यदा धीरत्वं केवलज्ञानादिना युक्तत्वमाविर्भवति तदैवैषामभिभव इति ज्ञाप्यते । 'तावानस्ये'त्यादिनापि कर्मप्राबल्यं जगद्वैचित्र्यादिनोपदर्श्यात्माख्यपूरुषस्याऽऽम्नायतेऽभिसम्पन्नता । 'सर्वाणि भूतानि पादोऽस्ये'त्यादि तु कर्मप्राबल्यानवधिताप्रदर्शनपरम् । तथा 'ममैवांश' इति तु स्वकीयां शुद्धां दशामाश्रित्य वक्ति कोऽपि—यत् जीवभूतः सारभूतो जीवत्वख्यापको वा सनातनोऽक्षरानन्ततमो भागः, स ममांश एव । यद्वा—जीवलोके जीवनवदाधारभूतः केवलात्मकः सनातनो बोधः, सोऽनन्तज्ञानदर्शनचारित्रसुखवीर्यरूपस्य ममांश एवेति । महिमा चानेनाख्यायि केवलवत्त्वेन स्वस्य, अत एव च 'जीवभूत' इति । अन्यथा 'सर्वं खल्विदं ब्रह्मे'तिवचनात् स्यादनर्थकता तस्य । तथा 'एकस्तथे'त्यनेनापि जीवात्मनोऽपि स्वकर्ममात्रसहचरिततयाऽशरणतामेकत्वं प्रदर्श्य 'सर्वभूते'त्यादिना 'आत्मवत् सर्वभूतेषु यः पश्यति स पश्यती'-त्यादिश्रुत्युदितप्रवृत्तिमत्तां निरूप्य दुःखरहितत्वं ज्ञापयति कश्चित् कश्चित् । अत एव च 'दुःखफलेने' त्युच्यते । अन्यथा कर्मफलेन सुखदुःखयुगलेनेत्याद्यभिधेयं स्यादित्यादिः स्याद्विचारः सम्यग्दृशामेव परं सः । यदपि कृशानुकणाख्यानात् कृशानुकणवद्गीताः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवद्' ॥ इत्यादिश्रुत्या 'आभास एव चे'त्यादि-सूत्रेण वा नांशत्वमङ्गीक्रियते, दोषभूयस्त्वापातात्। तत्सृष्ट्वा तदेवानुप्राविशत्। तै. २-६। नान्योऽतोऽस्ति द्रष्टा। बृ. ३-७-२३। मृत्योः मृत्युमाप्नोति य इह नानेव पश्यति। बृ. ४-४-१९। तत्त्वमसि। छां. ६-८-७। अहं ब्रह्मास्मि। बृ. १-४-१०। इत्याद्यनेकश्रुतिविरोधाज्जीवात्मनां प्रतिबिम्बभावमामनन्ति समादधति च-'सोऽन्वेष्टव्यः स विजिज्ञासितव्य' इति 'एतमेव विदित्वा मुनिर्भवति य आत्मनि तिष्ठन्नात्मानमन्तरो यमयती'त्यादि, सर्पः स्वशरीरेण स्वशरीरे स्वशरीरं वेष्टयतीत्यादिवद् अहं मां जानामीत्याद्यागमव्यपदेशसद्भावाच्च अनेककारकयोगस्याविरोधाद्, एकस्मिन्नेव वस्तुनि विवक्षाधीनानि हि कारकाणि यतः। परमेतदपि नैवावितथम्, यतः प्रतिबिम्बं तद्वद्रूपिणामेव। न चाकाशस्यातथाविधस्याप्यस्त्येव प्रतिबिम्बीभाव इति। यतस्तदपि प्रभायाः सूर्यादिकाया एव, अन्यथाऽऽत्मनामपि प्रतिबिम्बनप्रसङ्गात्।

प्रतिबिम्बीभावश्च किं पुद्गलस्वभावेनात्मस्वभावेन वा?, उभयत्रापि सर्वत्र तत्प्रसङ्गो दुर्निवारः, पुद्गलानां सर्वत्र भावात् आत्मनश्च। किञ्च-भवान्तरादि कर्म तदनुभवश्च पलायित एव एवं सति, नहि प्रतिबिम्बस्य भवति देशान्तरगत्यादि, आपद्यते चैवं सति सम्पूर्णं नास्तिक्यमेव तत्त्वतः। यतो जलस्य स्वभावश्चन्द्रप्रतिबिम्बग्रहणे तथा आत्मप्रतिबिम्बग्रहणेऽपि च भूतसमुदायस्य कायाकारपरिणतस्य स्यात्। परभवाभावे च तपोनियम-ब्रह्मज्ञानाद्यपि च व्यर्थमेव।

किञ्च-नहि प्रतिबिम्बं भवति चेतनं, प्रतिबिम्बत्वस्यैव तथात्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भावात्। प्रतिबिम्बत्वे वा वर्तुलत्वादयो यथा धर्माश्चन्द्रस्य विलोक्यन्ते, तथैवात्र ब्रह्मधर्माः सर्वज्ञत्वादयः स्फुरेयुः किं न ?। न च वाच्यं यथैव हि जलमलिम्ना प्रतिबिम्बमालिन्यं, तथा अत्रापीति। तथा सति स्पष्टैव भूतवादितापत्तेः प्रभावस्य च कुतोऽपि प्रतिबिम्बे गमनाभावात्। नहि खड्गप्रतिबिम्बेन च्छेदो, दाहो वाऽग्नेः प्रतिबिम्बेन भवति, तद्वदत्रापि प्रतिबिम्बभावे न कथञ्चनापि चेतनासङ्क्रमो युक्तः। न चान्तर्मलिनं प्रतिबिम्बं, न चात्र बहिस्थो द्रष्टा, आपद्यते च स्पष्टमेवं शरीरविकारमात्रेण चैतन्यविकारः। न चैवमनुभूयतेऽभिमन्यते वा। तन्न कथञ्चिदपि न्याय्यं प्रतिबिम्बीभावमननम्।

किञ्च–पूर्वसिद्धेषु कुण्डादिषु प्रतिबिम्बभावः। कश्चात्र प्रत्येकचेतनानभ्युपगमे विधाता भूतसञ्चयस्यापि, यतो भवेत् प्रतिबिम्बं, न वा प्रतिबिम्बं प्रतिबिम्ब्यविकाराभावे स्वरूपतो विकारमाप्नुयात्। न चैवमत्र। तथाभावे च निरर्थकैव ब्रह्मज्ञानादिप्रक्रियेत्यलमतिप्रसङ्गेन। एतावता नाऽऽत्मानोंऽशा ब्रह्मणो न वा प्रतिबिम्बिताः, किन्तु स्वतन्त्रा एव स्वविहितादृष्टानुसारिसुखदुःखभोगिन इति सिद्धम्। बहुवचनं चाप्येतज्ज्ञापनार्थैव सूचितं सूत्रकारैः। पुद्गलास्तु दृश्यन्त एवानेकविधाः प्रत्यक्षमिति (न) तेषामनेकत्वे विशेषचसूर्या। शून्यवादिनां तु प्रमाणसद्भावासद्भावविकल्पेनैवोपहतेरकिञ्चित्करत्वात्।

ब्रह्मवादिभिश्चोच्यते–'यतो वा इमानि भूतानी'त्यादिश्रुतेर्ब्रह्मात्मत्वं पुद्गलानाम्। तदपि न क्षमम्। यतो नहि पुद्गला जीवोपादानभूताः। सच्चिदानन्दादिकल्पनापि द्वितीयमन्तरेणासमीचीनैव। जीवस्य स्वलक्षणमेव च चैतन्यं, न च तद् घटादिषु। अल्प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वान्न लक्ष्यते इति तु वार्त्तमेव, प्रमाणाभावात्। भवेद्वा शरीरे अनेकचैतन्यप्रसङ्गः, शरीरमहत्त्वे वा चैतन्यविभवबहुत्वप्रसङ्गो वा। न चैते दृश्यमानेषु नर-करि-तुरङ्गशरीरेषु। अन्यथादृष्टेः। युक्तं स्वप्नोपमत्वं चेत् सर्वेषां ब्रह्मव्यतिरिक्तत्वम्। तदपि नालं त्राणाय। यतः स्वप्नोऽपि हि न केवलशून्यतायामेकत्वे वा, अनुभूतादिहेतूनामेव स्वप्नोत्पादकत्वात्। दृश्यापेक्षया च स्वप्नस्यासत्यता कीर्त्यते। अत्र तु न किमपि दृश्यमेव। तथा च स्वप्नदशापि जागरापेक्षिक्येव, सापि नात्र। ब्रह्मप्राप्तौ जाग्रद्दशेति चेत्। सत्यम्, परं विभाजकासत्यत्वे कथं तस्यापि सत्यत्वम्, सत्यत्वे च तस्य कथमितरस्यासत्यत्वम्। श्रुतिश्च पूर्वोक्ता जीवनिर्वर्त्यत्वाद् वनस्पत्यस्मदादिशरीरवद् वनस्पतिजीवास्मदादिजीवैर्भूतानां सङ्गमितुं शक्यैव। न चाऽत्राऽपरो मायादिविशेषश्चर्च्यते, पूर्वप्रदर्शितलक्षणोपकारादिप्रबन्धेन तस्य सिद्धत्वादध्यक्षम्।

यतो मायापि सत्यसती वा पुद्गलोपादानताद्वारा जीववैचित्र्यहेतुर्जगद्वैचित्र्यहेतुश्च स्याद्। आद्ये, स्पष्टैव द्वैतापत्तिः। जीवत्वे च तस्या विचित्रताहेतुत्वाभावात् स्पष्टमेवाजीवत्वं स्वीकार्यम्। अन्यथा वैचित्र्याभावाज्जीवानेकत्वाभावात्। असत्त्वेऽपि च तस्याः कथङ्कारं वैचित्र्यहेतुत्वं शशशृङ्गादेरिव। सदसती चेत्, स्पष्टं द्वैतापत्तिर्जडत्वाभ्युगमश्च पूर्वोक्तयुक्त्या। तथाविधाया अपि सत्त्वाविशेषात् सत्त्वगौणत्वेऽसत्त्वप्रधानीभावेऽपि च न विहाय कल्पनां लभ्यते भावुकं भव्यं, सत्त्वाविशेषादेव। तथापि अनिर्वाच्या चेत्, तस्या अपि स्वरूपं वाच्यं, यदेव तस्य स्वरूपं तेन सा सत्येव, अन्यथा निर्वाच्यत्वाभावात्। न चानिर्वाच्यस्वरूपत्वे च तस्याः स्याज्जगदुत्पत्तिकारणता,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्यापि तथात्वे स्पष्टैव व्यवहारविरुद्धता उपदेशाद्यभावश्च । प्रोच्यते चासौ श्रुत्या 'आत्मा वा अरे अयं श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यादिकया ।

अन्यच्च–असत्यत्वेऽविद्यायाः कथं सत्त्वं विद्याया अपि, अविद्योन्मूलनत्वात्तस्याः । असति च मूले कैवाऽऽशा वृक्षस्येव विद्यायाः ? । नहि रज्जौ सर्पभ्रान्तिरपि भवति रज्ज्वभावे । न च विना विप्रतारकान् कोऽप्युपदिशति सर्पदष्टानिव रज्जुसर्पदंशभीतान् मन्त्राद्युपचारान् । न च भवति रज्जुसर्पदंशभ्रममात्रेण जीवितव्युपरतिः । अत्रापि च नैव स्यादेवं सति आत्मनोऽसर्ववित्ता । अविद्याया असत्यत्वे तस्य निवर्त्तनोपायोपदेशोऽपि च न युक्तः । तथा च समापतितं शाङ्करानुसारिणां बिपश्चित्तिरस्कारावाप्तभ्रमनाशानां शङ्कराचार्याणामिव कान्दिशीकत्वम् । तन्नासत्त्वं मायायाः, सैव च पुद्गलसंहतेर्वाच्यान्तरम् । शब्दभेदे च न चिवादो नैगमानुसारिणामिति सिद्धमस्तिकायपञ्चकमप्रतिहतप्रमाणेन बिदुषाम् । तथा च ।

व्याख्याय पञ्चास्तिनिकायरूपान्, यदर्जितं पुण्यमलं सुबुद्ध्या ।
भवे भवे तेन भवन्तु लोकाः, सज्ज्ञानशुद्धा गतसर्वशोकाः ॥१॥

व्याख्यायैवं पञ्चास्तिकायं प्रस्तुते लोकानादित्वे योजनाय तेषां तथाभावे हेतुं चाहुः—

एए अणाइनिहणा तहा तहा नियसहावओ नवरं ।
वट्टंति कज्जकारण-भावेण भवे ण परसरूवे ॥२॥

तत्र 'एसे' अनन्तरोदिताः । एतच्छब्दनिर्देशेन च समीपतरवर्तिता निरदेशि भगवद्भिः, तत्रैवैतच्छब्दप्रयोगाद् । यत उच्यते–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'इदमस्तु सन्निकृष्टे समीपतरवर्ति चैतदो रूपम्। अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात्'॥ इति। कीदृशा एते?' इत्याहुः– 'अनादिनिधना' इति। तत्रादीयते–गृह्यते अस्मादित्यादिः 'उपसर्गादः किः' [सि० ५।३।८७] इति किः। तथा निदधाति–धारयत्यन्त्यावस्थायां, पोषयति वा विनाशपक्षमिति वा निधनं–नाशः। 'तुदादिवृजिरञ्जिनिधाभ्यः कित्'[२७३] इति किद्ने रूपनिष्पत्तिः। आदिश्च निधनं चेति आदिनिधने, निर्गते आदिनिधने येभ्यो, यद्वा–निर्गता आदिनिधनाभ्यां ये ते अनादिनिधनाः। धर्माधर्माकाशजीवपुद्गलरूपाणां पञ्चास्तिकायानां न विद्यतेऽसतः प्रादुर्भावरूपोत्पत्तिः, न वा सतोऽभावरूपो विनाशोऽपीति।

ननु किमेतत्? तथा सति असत्त्वापत्तेः, उत्पादव्ययध्रौव्यलक्षणमेव हि सत्तयाऽभिमन्यते, पञ्च चैते न तथेति विरुद्धमिदमिति चेत्। सत्यम्, द्रव्यापेक्षया हि अत्रादिनिधने प्रतिषिध्येते, न चास्ति द्रव्यार्थिकेऽपि तत्, द्रव्यार्थिकेन ध्रौव्यस्यैवाऽऽम्नानात्। सत्यम्, परं न शास्त्रता तथा, दुर्नयत्वात् तस्य। यथार्थमुक्तम्, परं परव्यवच्छेदप्राधान्येनैव तस्य तथात्वम्, स्वप्राधान्यसमर्थनं तु न शास्त्रत्वव्याघाति। तदुक्तम्–'नयानामेकनिष्ठानां प्रवृत्तेः श्रुतवर्त्मनी'ति। अत एव च स्वार्थसत्यताऽनया नयानामाम्नाता, 'नयानां स्वार्थे सत्याना'मित्यादिना। ननु चैवमप्यस्य नयार्थतैव वाक्यस्य, न तु प्रमाणता, तस्यास्तु सम्पूर्णार्थविनिश्चायकत्वात्। तदुक्तम्–'सम्पूर्णार्थविनिश्चायि स्याद्वादश्रुतमुच्यते' इति चेत्। सत्यम्, परमेकान्तिकौत्पत्तिकवादिनिराकरणायैतस्यारब्धत्वात्, नयस्य नयान्तरैः खण्डनस्यैव च शास्त्रार्थत्वात् न व्याहृतिः। यद्वा–द्रव्यार्थतयेत्यनादृत्य स्यादित्यध्याहार्यम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा स्याद्वादाङ्गपरिग्रहात् स्यादेव प्रमाणवाक्यता। स्यादेतत्, परं कथं लभ्या अनुक्तत्वादिति चेद्। अनुक्तोऽपि प्रतीयतेऽसौ एवकारादिवत् तदुक्तम्—

सोऽप्रयुक्तोऽपि वा तज्ज्ञैः सर्वत्रार्थात् प्रतीयते। यथैवकारोऽयोगादि–व्यवच्छेदप्रयोजनः॥ अत्रेदं तत्त्वम्–यथाहि क्वचिदप्रयुक्तोऽप्येवकारः प्रकरणादिबलेनाध्याहृत्य व्याख्यायते। स च क्वचिदयोगव्यवच्छेदफलः। यथाऽत्र देवत्वमपेक्ष्य जैनेन्द्रीयं—

'जिनेन्द्र! यानेव विबाधसे स्म, दुरन्तदोषान् विविधैरुपायैः। त एव चित्रं त्वदसूययैव, कृताः कृतार्थाः परतीर्थनाथैः॥ अत्र हि जिनेन्द्रस्य विलीनदोषत्वमयोगताव्यवच्छेदकं तच्चावधार्यैवैवकारम्। अन्येषां तद्वत्त्वप्रदर्शनं तु व्यतिरेकिदृष्टान्तप्रकरणात्, न तु तत्र योगव्यवच्छेदोऽभिप्रेतः। अन्ययोगव्यवच्छेदश्च यथा–तत्रैव पक्षे—

'यत्रैव यो दृष्टगुणः स तत्र, कुम्भादिवन्निष्प्रतिपक्षमेतत्। तथापि देहाद्बहिरात्मतत्त्वमतत्त्ववादोपहता पठन्ति॥ इत्यादौ। क्वचिच्च असम्भवव्यवच्छेदप्रयोजनो, यथा–'दोषाऽऽवरणयोर्हानिर्निःशेषाऽस्त्यतिशायनाद्' इत्यादौ। व्यावहारिके वा यथा–'चैत्रो धनुर्धर एव, पार्थ एव धनुर्धरः, नीलं सरोजं भवत्येवे'ति विशेषणविशेष्यक्रियासङ्गतैरेवकारैर्भवत्येवं त्रिधा व्यवच्छेदोऽनुक्तेऽप्येवकारे। एवमत्रापि स्याच्छब्देऽनुक्तेऽपि स्वयमध्याहार्यः। आचार्याणां तथावादित्वात्। वक्ष्यन्ति चात एव–'वट्टन्ति कज्जकारणभावेणे'ति। तथा–'तथा तथा परिणतिस्वभावा' इति। न चैवं युज्यते प्रस्तुत एवकारयोजनामन्तरेणेति। विवादो वा द्रव्यविषय एव, अन्यैस्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्याप्युत्पादस्वीकारात् । पर्यायोत्पादस्वीकारकाणां तु शुष्कार्द्रदहनन्यायेन । यद्वा–प्राक्काले पर्यायरहितताभ्युपगमस्य परप्रवर्त्यता वा द्रव्ये पर्यायाणां निराकर्त्तुमभिप्रेतेत्यलमतिप्रसङ्गेन ।

कथमेतत् ? इति चेद्, उच्यते–'तथा तथा निजस्वभावत' इति। हेतुरुक्तोऽनेन पूज्यैः । एषां चानादिनिधनत्वं तथा तथा तेषां स्वभावादेव । न च स्वभावे शक्या कर्तुं विप्रतिपत्तिम् । अन्यथा ' दहति कृशानुः, नाऽऽप' इत्यत्रापि विलोकनीयमेवाकाशम्। 'तथा तथे'ति द्विर्वचनं धर्मादीनां प्रत्येकस्वभावताज्ञापनाय। ' निजे'ति तु परस्परभिन्नस्वभावाताज्ञापनाय । 'स्वभावे'ति च कृत्रिमत्वाभावाय, पञ्चमी च हेतुत्वाय । तथा च स्वभाव एव धर्मास्तिकायस्य तथाविधः तस्य, यन्नोत्पद्यतेऽसौ न च याति नाशम्। तथाऽधर्माद्या अपि । कथमिति चेद्, आद्यास्त्रयस्तावदरूपा अजीवाश्च । अरूपाणां च विनाशकारणमुत्पादकारणं च न किञ्चित् । तद्धि भवत् किं रूपि भवेदितरत् वा ? । आद्ये, नहि नभसः खड्गादिना खण्डनं मण्डनं वा भवति यथा, तथारूपिणोऽकिञ्चित्करा एव पदार्था अरूपिविषये ।

किञ्च–न तावदरूपिभिर्भवति सम्बन्ध एव रूपिणां तथाविधः, येन विदध्येरन् किञ्चित्ते । न च ते चेतनाः, येनाऽध्यवसायेन भवेद् बन्धवदात्मनो रूपिभिस्तथा सम्बन्धः। इतरच्चेत्, तदपि परिफल्ग्वेव वचः । यतो नह्यरूपि करोति किञ्चिदप्यचेतनमुपग्रहोपघातौ । तन्न रूपिभिररूपिभिर्वा धर्मादीनां विनाश उत्पादो वा घटामञ्चति । विनश्य वा किं भवेत् रूपवदरूपवद्वा अन्यत् किञ्चिद् । नाद्यः, रूपाद्यागमस्यान्यतोऽभावादन्यथा आत्माकाशयोरपि तथात्वापत्तेः। अरूप-

१२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वदन्यभवने च तत्तत्कार्यविगमे न किञ्चिदपि कार्यं स्यात्, क्रियास्थित्यवगाहानृते किञ्चिदपि विधातुमशक्यत्वात्। उत्पत्तिरपि कुतः कथं वा भवेत्तेषामित्यप्यनेन प्रतिपादितमेव।

यत्तु 'आत्मन आकाशः सम्भूत' इत्यादि। तत्रापि चिन्त्यमेव। अचेतनोपादानाच्चेतनानुपपत्तेरिव चेतनोपादानादचेतनस्याप्यनुपपत्तेः। अस्वीकारे चैतस्य ब्रह्मणोऽपि भवेदाकाशादुत्पत्तिः। यच्च उदाह्रियते–सचेतनात् पुरुषात् केशादिप्रभवो दृश्यत एव। तदप्यबोधविलसितमेव, शरीरोपादानत्वात्तस्य। उच्यते चात एव–पित्रङ्गमात्रङ्गप्रभवत्वं तस्य तस्य केशादेस्त्वगादेश्च। न चाचेतनोपादानतामन्तरेण युज्यते एतद्विधानमाम्नातं वा। यच्चोच्यते–'सत्त्वं सर्वत्र' इति। तदप्यसमञ्जसमेव, यतो नहि सत्तामात्रेण कार्यसम्पत्तिः, तेनान्वयव्यतिरेकानुपलब्धेः, अन्वयव्यतिरेकानुविधाय्येव च कारणमिति।

किञ्च–ब्रह्म काऽभूत् प्राक्, यदा नाभूदाकाशः, अन्तरा तमवगाहाभावेन अवस्थानस्यैवाभावात्। अन्यच्च–'आत्मन आकाशः सम्भूत' इति गीयते। तत्र किं मृदो घट इव उपादानभूतादात्मन आकाशस्योत्पत्तिः? किं वा विकासः कमलानां दिनकरादितिवदुत्पादनादुत्पत्तिः?। आद्ये, ब्रह्मणि जडत्वापातः। अस्त्येव चेत्, सर्वव्यापकं तत् तत्र च जडत्वमिति सिद्धमनादिरेवाकाशादिः। द्वितीये तु वक्तव्यं तस्योपादानम्। न चानुपादानं क्रियते कुम्भजीवकेन कुटाद्यपि। यदेव चोपादानतयाभिमन्यते तच्चेत् चेतनं, स्पष्टोऽचेतनोत्पादश्चेतनात्, स्पष्ट एव च भविता भवतामपि जडीभावश्चेतनत्वाविशेषात्। तन्नोपादानभूतात् निमित्तभूताद्वा आत्मनो घटते विहायस

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्पत्तिः । कथमुक्तमिति चेद् ? यथाकथञ्चिदस्तु, विशेषप्रयोजनेच्छा वा तथावाक्ये, तदालोचनीयं पौर्वापर्येण, भविष्यति व्यक्तमेतद् ।

यदुत–औपचारिक्येव इयं समग्रा सङ्कथा । पूर्वमेव तत्र प्रतिपादितं तथा यत् ' स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः । पृथिवीन्द्रियं ' इति प्रश्नोपनिषदि, तथा ' एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ' । इति मुण्डकोपनिषदि च । तथा न स्वाभाविक उत्पादोऽयमाकाशस्य । तथा च ' तत्तेजोऽसृजते 'त्यादि छान्दोग्योक्तसृष्टिक्रमापलापोऽपि नैवाकाशस्य । उपचारस्त्वनेकधोपलभ्यते श्रुतिषु–' यथा स य एषोन्तर्हृदय आकाशः तस्मिन्नयं मनोमयः अमृतो हिरण्मयः अन्तरेण तालुके य एषस्तन इवावलम्बते इति तैत्तिरीयोपनिषदि । तथा चावबोद्धव्यः प्रवक्तुरभिप्रायः । नहीच्छामात्रेण विप्रलम्भनीयम्, कोऽसाविति चेत्, प्राणेन विधीयमाना या चलनक्रिया, यद्वा-नाड्यादि, परं न पारमार्थिकस्योत्पादो युक्तियुक्तः । एवमेव धर्माऽधर्मयोरपि । एतावता धर्माऽधर्माकाशानामनादिता, तत एव चानिधनता साधिता ।

अथ जीवानपेक्ष्य पूर्वसूरिप्रतिपादितमेव प्रकरणमाख्यायतेऽत्र, तथाहि—

जम्हा ण कित्तिमो सो तम्हाऽणादीत्थ कित्तिमत्ते य । वत्तव्वं जेण कओ सो किं जीवोऽजीवो त्ति ? ॥१॥ अनादिनिधनत्वसाधनेऽभिप्रेतेऽपि ' न निधनमनादेर्भावस्ये 'ति नियमाभ्युपगमेनाऽनादित्वसिद्धिनान्तरीयका सिद्धिरनिधनताया इत्यभिप्रेत्यानादित्वस्य साध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नायोपक्रमः । यद्वा—न कार्यभूताहते विनाशोऽन्यस्येत्यकार्यतासाधनायाऽनादित्वसाधनं प्रक्रते । यद्वा—प्रसाध्योभये आदिधर्मोऽनादित्वाख्य इति स प्रसाध्यतेऽमीभिः । तत्रापि स्वयमुत्पत्तिमत्त्वमनादृत्य । अन्यविहितत्वमेव निराकुर्वन्ति । स्वयमुत्पत्तिमत्त्वे हि पर्यायत एव स्यात् तेषामुत्पादः, न चासौ निषेध्यः । असतश्च स्वयं नैव भवेदुत्पादोऽनुपादानत्वादिति प्रयोजनयुक्तोऽनादरस्तत्र । अथाऽन्योत्पाद्यत्वे विहितं विकल्पयुगलं निराचिकीर्षव आहुराद्यविकल्पे तस्यापि कृत्रिमाकृत्रिमत्वे विकल्प्य—

' जइ जीवो जेण कओ सो अन्नेणं ति एवमणवत्था । चरमो अकित्तिमो अह सव्वेसु तु मच्छरो को णु ॥२॥ जो सो अकित्तिमो सो रागादिजुओ हविज्ज रहिओ वा । रहियस्स सेसकरणे पओयणं किं ति वत्तव्वं ॥३॥ पू०—तेसिं चेवुप्पत्ती किं च सहावो य तस्स एसो उ । अपरायत्तत्तणओ कुणइ विचित्ते तओ सत्ते ॥४॥ फलं तावत्तेषामुत्पत्तिरेव प्रवर्तते च तस्यैष एव स्वभावः, तुर्हेतौ यतः । यदि च नोद्येत कथं वैचित्र्यं, यद्वा—स्वयमन्याज्ञया वा प्रवर्त्तेतेति, तत्राह- अपरायत्तो विचित्रान् सत्त्वान् करोति ।

आ०—तेसिं उप्पत्तीए को तस्सत्थो त्ति सेव उ ण जुत्ता । कुंभारादीण जओ ण घडादुप्पत्तिरेवत्थो ॥५॥ न जीवानामुत्पत्तेः प्रयोजनसिद्धिस्तस्य काचित् । यच्चोदितं कुम्भकारादीनां घटकृतिवदुत्पत्तिरेवार्थः, तत्रापि विरोध एव । यतो न कुलालादीनां घटोत्पत्तिरेवार्थः, किन्तु भृत्यादि, नेयमस्य सा ।

पू०—सिय कुंभाराईया अणिट्ठियट्ठत्ति णिट्ठियट्ठो य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(आ०) सो इय ण जुज्जई से उप्पत्तिं काउ सत्ताणं ॥६॥ इति हेतोर्निष्ठितार्थत्वादेव। यो यो निष्ठितार्थः स स विरतो व्यापाराद्यथा विहितघटः कुम्भकृद्। एवं चास्यापि तथाविधत्वात् सर्वथा सर्वदा नोत्पादयितुं युक्ताः सत्त्वाः।

पू०—एसो य सहावो से (आ०) किमेत्थ माणं ? न सुंदरो य जओ। तक्करणकिलेसस्स उ महतो अफलस्स हेउ त्ति ॥७॥ नहि स्वभावो वचनमात्रेण प्रमाणभूमिरिति किमत्र मानमिति। अग्न्यादीनां प्रत्यक्षं दाहकत्वादिसिद्धौ न पर्यनुयोगोऽर्हति योग्यताम्, अत्र तु स एव साध्य इति युक्तः प्रश्नः। स्वभावोऽपि चकारेण च हेत्वन्तराभ्युच्चयः। अभ्युपगमसिद्धान्तेनाभ्युपगम्यापि स्वभावपक्षम्। अपरायत्तत्वं निराकुर्वन्त आहुः—

अपरायत्तो य कहं जो कुणइ किलेसमेत्तियं जम्हा। अण्णो वि परायत्तो किलेसगारी उ लोगंमि ॥८॥ पू०—अह न किलेसोत्ति मती सत्तामेत्तेण कारओ जम्हा। आ०-तब्भवणतुल्लकाला सत्ता सव्वेवि सिद्धमिणं ॥९॥ इयमत्र भावना—यदि सत्तामात्रेण—स्वसद्भावमात्रेणाग्निरिवोद्योतं करोति सत्त्वाँस्तदापन्नमेव तस्यानादितया सत्त्वानामप्यनादित्वम्, कादाचित्कत्वस्य कारणजन्यत्वात्तस्य चानभ्युपगमात्। आहुः—स्पष्टतरमेतदेव—

एवं च अणादित्तं सव्वेसिं चेव हंदि सत्ताणं। तस्सत्ताणादिमती जं णो चे कित्तिमो सो वि ॥१०॥ पू०—अह सत्तामेत्तेणेव कारओ किंतु ण समकालत्ति। आ०—पच्छावि परिमियद्धाए होइ तस्सादिमत्तं तु ॥११॥ अपरिमितकालातिक्रमे कारकत्वे अभ्युपग-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म्यमाने स्पष्ट एवावस्थाभेदविहितः पराभ्युपगतैकान्तनित्यत्वबाधः, आदिमत्ता च ततः । एतदेवाहुः—

अपरिमितद्धाए वि य सहावभेदंमि तस्सऽणिच्चत्तं । पुव्वं व अकरणं पच्छओ वि तेसिं अभेदंमि ।।११।। कारकेतरत्वस्वभावयोरभेदेऽविशेषे करणाकरणलक्षणविशेषोऽपि नैव युक्त इति तत्त्वम् ।

पू०—एषो चेव सहावो से णंतद्धाए कुणइ तीयाए । आ०—एगसहावत्ते सइ करणं वाऽणिच्चया भेदे ।।१२।। अथ स्वभावकृत्रिमतापक्षमौपचारिकमाश्रित्य तमाह्–तेसिं चेव सहावो जं तस्सत्तामवेक्ख होंति तया । आ० जायाण पुणोऽभवणाऽजुत्तोऽजायाण उ विरुद्धो ।।१३।। विवक्षितकालात् पूर्वं जाताश्चेत् जाता एवेति न भवनम् । तथा चायुक्तोऽनुपयोगी स्वभावाङ्गीकारः । अजातानां च कथं स्वभावकल्पना युक्ता । तत्त्वतस्तूपादानं किञ्चित्तस्य च कल्पेत स्वभावः, तदेव तु नाङ्गीकृतं, करणे वा तत्राप्येष एव वादः सादित्वेऽन्यथा तु किमपराद्धं सत्त्वैः । अपरायत्तत्त्वमेवाश्रित्योच्यते—

मज्झत्थो य किमत्थं चित्ते इस्सरियमादिभेदेणं । सत्ते कुणतित्ति सिया कीडत्थमसंगया सा वि ।।१४।। 'मध्यस्थ' इति । कर्मादिवैचित्र्याविर्भावाभावात् कर्माऽप्रेरितो वीतरागत्वाद्रागाप्रेरितश्चेति । 'ऐश्वर्यादिभेदेन चित्रान् सत्त्वानि'त्यनेन प्रत्यक्षेणाभ्युपगतेन च वैषम्येण कर्त्तुरुपहासो माध्यस्थ्यविषयो ध्वनितः । 'अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा' ।। इति वचनादैश्वर्यादिवैशिष्ट्यमपि तत्कृतमेवेति प्रोक्तमैश्वर्यादिभेदेन चित्रानिति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जं रागादिविजुत्तो सा उ सरागस्स दीसई सो वि। रागादि जुत्तोत्ति मती णसेसकत्ता तदन्नो व्व ॥१५॥ पू० जमकित्तिमो ण अन्नो तेण ण कत्तत्ति ( आ० ) तुल्ल एवेह। रागादिदोसभावे णेयंपि विसेसणं जुत्तं ॥१६॥ दृष्टान्तेन समर्थयन्ते —

ण हि तुल्लंमि दियत्ते वेदज्झयणगुणसंपउत्ताणं। केसाणप्पबहुत्तं दाणंमि विशेषणं होइ॥१७॥ रागादिदोसवसगो बंधइ कम्मं किलिट्ठ-मच्चंतं। तप्पच्चयं तयं पुण वेयंतो सेसतुल्लो उ ॥१८॥ तत्प्रत्ययं—रागादिदोषप्रत्ययमित्यर्थः। तकत्–क्लिष्टं कर्मेत्यर्थः। 'सेसतुल्ल'त्ति संसारिजीवतुल्यः, क्लिष्टकर्मवेदनादेतस्यैव संसारित्वनिबन्धनत्वात्।

पू० अह णो बंधइ (आ०) एवं ण संति रागादओत्ति से पत्तं। संतेसु विय अबंधे किं बंधो होति सेसाणं ॥१९॥ 'से'त्ति तस्य जगद्विधातुः सन्ति रागादयो नेति प्राप्तम्, तत्कार्यस्य बन्धस्याविधानाद्, अर्थक्रियाकरणे एव वस्तुनोऽभ्युपगम्यते सत्ता, यतः वीतरागत्वे च वैषम्यमनुपपन्नमेवेत्युक्तपूर्वमेव। रागादिषु सत्सु च तस्य कर्माबन्धे शेषाणां कथं बन्ध ? इति।

पू० एसो चेव सहावो संतेसु वि तस्स जेण णो बंधो। होयन्नेसिं ण य इह पज्जणुओगो सहावस्स ॥२०॥ (आ०) जलसंजोयनिमित्तं वत्थे परुसत्तमत्थि णो पत्ते। सब्भावे अविसिट्ठेवि जुज्जती तेसिं जं भणियं ॥२१॥ वस्त्रपत्रयोर्जलसंयोगसद्भावस्याविशिष्टत्वे वैचित्र्यं स्वभावोद्भवं युज्यते वक्तुम्।

इह उण बंधनिमित्तं जम्हा रागादिपरिणती चेव। तब्भावे अविसिट्ठे बंधाबंधा ण जुज्जंती ॥२२॥ अत्र बन्धकारणं रागादिपरिण-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिरेव, स्वीक्रियते च सा तस्येति कथं बन्धाभावः। इदमैदम्पर्यम्—वस्त्रपत्रयोर्जलसंयोगेऽप्युभयत्र परुषत्वानुपलम्भात् कचिज्जलसंयोगे परुषत्वं हेतुः मृदुतायामदर्शनाद् वस्त्रस्वभावस्तादृशः कल्प्यते यज्जलसंयोगे तस्य पारुष्यं कारणं नेतरस्य, अतथात्वात्। अत्र च सर्वत्र रागादिपरिणतेरेव बन्धकारणत्वेन स्वीकारान्न स्वभावशरणं वादत्राणशरणम्। अन्वयव्यतिरेकाभ्यां च स्वीक्रियत एव च रागपरिणतेरेव बन्धकारणत्वमिति नानभ्युपगतमिदम्।

एतेणं पडिसिद्धा विसजलणादीवि हंदि दिट्ठंता। जं णत्थऽविसेसेणं सव्वत्थ विसेसहेउत्ति ॥२३॥ अविशेषेण—सर्वसहचार्यनुगतत्वेनेति। 'विसेसहेउ'त्ति सोपक्रमायुष्कत्वादि। एतदेव दर्शयन्ति—

सोवक्कमादि इज्झादि चेव सव्वत्थ अतिपसंगाओ। ण य सत्तामेत्तेणं इट्ठत्थपसाहगा ते वि ॥२४॥ आद्यादिशब्देन मन्त्रासंस्कृतादिग्रहः। द्वितीयेन तु तेन शुष्कत्वपवनादिसहचारित्वादिग्रहः। अन्यथा विषं विषं मारयेत्, दहेच्चाग्निमग्निः, सर्वं वौषधोपयुक्ताद्यपि मारयेत्, जलमपि च ज्वालयेदित्यतिप्रसङ्गो विशेषानभ्युपगमे। बन्धे विशेषहेतुमाहुः—

रागादिपरिणती पुण परुसत्तसमा विसेसहेउ त्ति। अप्पाणे तंमि य जओ (अप्पाणगंमि य जओ) वेहम्मं तेण दोण्हंपि ॥२५॥ परुषत्वं यथा जललेपकारणं तथाऽत्र विधातर्यन्यस्मिँश्चात्मनि रागपरिणतिर्बन्धकारणं सममेव। यदि च सत्यपि रागादौ न बन्ध इति वैधर्म्येणाभ्युपगमः, तदा न द्वयोरपि स्याद्बन्धः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तब्भावो अविसिट्ठो जदि णो थेवतरदोससब्भावो । पावेति तस्स अहवा रागादीणं अभावो उ ॥२६॥ तद्भावो रागादिपरिणतिसद्भावोऽविशिष्टः—केनापि विशेषणेन रहित इति । सति परिणतिवशिष्ट्ये एव बन्धस्य स्तोकतरत्वं भवेन्नान्यथेति तत्त्वम् । स्तोकबन्धाऽभ्युपगमेऽपि सकलकर्तृताभावः स्पष्ट एव । न च वादिना तदभ्युपगम्यते, सोऽभ्युपगमवादेनैव च प्रसञ्जितः किन्तु सूरिभिः । तथा च न परिणतितारतम्ये बन्धतारतम्यं न स्वीकुर्वन्त्याचार्या इति मन्तव्यम् । अत एवोक्तमविशिष्ट इति । 'अथवे'ति रागादिपरिणत्यनभ्युपगमे इति । रागाद्यभावप्राप्तौ च क्रीडादिचित्रभेदानैश्वर्यादिभेदेन सत्त्वाँश्च न युज्यते कर्तुं तस्य । सर्वस्यास्य मूलं तत्प्रतिकारं च सङ्क्षेपत आहुः—

तस्स अणादित्तं तह अन्नेसिं वाऽऽदिमत्तमहिकिच्च । भणियमिणं न उ सिद्धं तस्सेवाणादिमत्तं तु ॥२७॥ एतत् पूर्वोक्तं जीवोत्पत्त्यादि यद् हि भवत्यादिमद्, भवेत् सकर्तृकं, कर्त्ता च कार्यात् प्राक्कालीन एवेति समाश्रित्य तस्य विधातुरनादित्वमितरेषां संसार्यात्मनां सादित्वं चाभ्युपेत्योक्तम् । यद्वा—यदि भवेदीश्वरे बन्धप्रसङ्गो न स्यादनादितेति । बन्धाभावोऽभिमतः तत्रान्यत्र चातथात्वान्न तथेति चेदाहुः—भणितं वाङ्मात्रेणेदं वचनमात्रमेव, न तु प्रमाणप्रतिष्ठितम् । अन्योन्याश्रयात् । सिद्धे ह्यनादित्वे बन्धाभावः, बन्धाभावसिद्धौ चानादित्वं यतः । न च सिद्धमेकतरमपि प्रमाणादिति । अपरथोत्पत्तिपक्षं निराकुर्वन्ति—

तह संतेऽसंते वा कुणति ततो ते उ पढमपक्खंमि । किं तस्स कारगत्तं चरमे तु ण संगयं करणं ॥२८॥ 'तथे'ति पूर्वदूषितोत्पत्ति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वादे अभ्युपगम्यमानेऽपि 'तता'त्ति । सक ईश्वरस्तान संसारिप्राणिनः । सतः करणाभावो भावे वा क्रियावैकल्यादिसङ्ख्यातीतदोषप्रसङ्गः । चरमश्चासत्करणाख्यः पक्षः, तत्राभ्युपगम्यमानेऽसङ्गतिः, शशशृङ्गगगनारविन्दादेरपि करणापत्तेः, तस्याप्यसत्त्वाविशेषात् उपादानग्रहणादिनियमोच्छेदापत्तेश्च । ननु कथं तर्हि कार्योत्पादः ? जगत्यामपि उत्पद्यन्त एव च घटादय इति चेत् । सत्यम् , कारणात्मना द्रव्यरूपेण सत्त्वाभ्युपगमे कार्यात्मना च पर्यायरूपेणाऽसत्त्वाभ्युपगमे । न चायं न्यायो वादिना स्वीकर्त्तुं पार्यते, जीवानां द्रव्यरूपेण सत्त्वस्वीकृतौ परपक्षप्रवेशप्रसङ्गात् हीयते च प्रतिज्ञा तस्य इति । एवं जीवकर्तृत्वपक्षं निरस्य निरस्यतीतरम्—

अजोवो उ ण कत्ताभिप्पायाभावओ घडादिव्व । अन्नेसिं सत्ताणं दोसा एत्थंपि पुव्वुत्ता ॥२९॥ तु शब्द एतत्समालम्बनस्य निर्गतिकालम्बनतां सूचयति । अजीवादुत्पद्यन्ते इति पक्षो जीवस्वभावनिराकरणपक्षातिद्वेशदूषित इति कर्तृत्वमिच्छापूर्वकप्रयत्ननिर्वर्त्यत्वलक्षणमभिप्रेत्य दूषितम् 'अभिप्रायाभावा'दिति । यद्वा—साभिप्राया जीवा न निरभिप्राया जीवकर्तृका इत्युक्तमभिप्रायाभावादिति । यदि वा परैरभिप्रायवतामेव कर्तृत्वमभिमतम्, अन्यथा विधात्रङ्गीकारप्रयोजनाभावादित्येवं निरस्यन्ते ते पूर्वोक्ताः । सोऽपि कृत्रिमोऽकृत्रिमो वेत्यादिका अवतारणीया वनस्पतेरङ्कुरादिदर्शनेनौषध्यादीनां चामयोपशान्त्यादिदर्शनेन अभिप्रायाऽभावेऽपि कर्तृतोपगमे पूर्वोक्ता दोषा इति वा । अथवा भूतवादोक्ता न भूतधर्मश्चेतनेत्यादिका भौतिकवादिनः प्रति प्रेरिता दोषा अत्रापि समानाः । ईश्वरकर्तृत्वादोक्तपरिणत्यभावादिवैषम्यवत्त्वादजीवानामिति । निगमयन्त आहुः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीवाजीवविभिन्नं न अत्थि वत्थंतरंति जप्पभवा । होज्ज इमे खलु जीवा ण कत्तिवादो तओ जुत्तो ॥३०॥ चेतनावान् हि जीवः तद्वियुक्तश्चाजीव इति । न तदुभयाभावान्वितः कोऽपि यतः, ततो न वस्त्वन्तरं जीवाजीवविभिन्नम् । तादृशवस्त्वभावे कुतस्तत्प्रभवत्वं भवेज्जीवानाम्, 'सति धर्मिणि धर्माः ग्रामे च सीमे'ति नियमात् । तथा च ईश्वरलक्षणाज्जीवात् तद्व्यतिरिक्तादजीवादसम्भवित्वाच्चान्यस्याध्यक्षमवगमाच्च जीवानां, नेमे विहिताः केनापीति सिद्धम् । तथा च जीवकर्त्तृत्ववादो न युक्तो मनीषिणामभ्युपगन्तुमपि नो युक्तः, युक्तस्यैव तैरभ्युपगमात् । एवं कर्त्तृवादनिराकरणेन साधितं अनादिनिधनत्वं जीवानां साधयन्त आहुः—

कारणविरहा परमरिसिवयणतो भणियदोससब्भावा । तम्हा अणादिनिहणा जीवा सव्वेवि सिद्धमिणं ॥३१॥ कारणम्—उपादानकारणादि, यथा घटस्य मृत्पिण्डादि, तस्य विरहः—अभावस्तस्मात् । स च भौतिकवादनिराकरणादीश्वरकर्त्तृत्वप्रतिविधानाच्च । ननु किमेतत् ? उपादानकारणता निराकृता, न शेषेति चेत् । तदनुसारित्वादेव शेषायाः तन्निराकरणनिराकृतत्वं तस्या अपि । यद्वा—स्वसिद्धान्तप्रतिपादनप्रस्तावात् न द्रव्यषट्केऽप्यस्ति तद्वस्तु, यद् जीवोत्पत्तौ कारणतां बिभृयात् । अपरं कारणमाहुरनादिनिधनत्वे—'परमर्षिवचनतो'ऽपि । अपिर्गम्योऽत्र हेतुसमुच्चायकतया । यद्वा—द्रव्यषट्कस्य तत्स्वरूपस्य च कुतः प्रामाण्यतेत्याहुः—'परमे'ति । यद्वा—अनादिनिधनत्वसाधने किमालम्बनं ? कारणविरहे तु वस्तुन एवाभावापत्तेरित्याहुः—'परमे'ति, परमेति च अकलङ्कितज्ञानसम्पन्नत्वेनाप्ततासूचनायैषाम् । तथा चाविप्रतारकवचनाद् जीवानामनादिनिधनतेति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपरं चास्य स्वतन्त्रप्रमाणत्वाभिमतौ कारणविरहेत्यस्य विशिष्टता वाच्या सत्त्वे सति कारणविरहात् इति । तत्र यत्र यत्र सत्त्वे सति कारणविरहत्वं तत्रानादिनिधनत्वं, यथा पराभ्युपगत ईश्वरः आकाशादिर्वा । परमर्षिवचनं च–' जीवे अणाइनिहणे ' इति, ' नित्यावस्थितान्यरूपाणी 'ति, ' जीवेणं भंते ! किं सासए असासए ? गोयमा ! दव्वदूठयाए सासए पज्जवट्ठयाए असासए ' इत्याद्यात्मकम् । कारणविरहोपन्यासप्रामाण्यायैतद्वचने चाभिप्रेते—

' अमओ य होइ जीवो कारणविरहा जहेव आगासं । समयं च हो अणिच्चं मिम्मयघड–तंतुपडमाई ' ।। इति । अमयः–न किम्मयोऽनुपादान इत्यर्थः । कुतः ? कारणविरहात् । मृदादिवत् परिणतियोग्यकारणाभावाद्, दृष्टान्तं यथैवाकाशम् । विपर्यये समयम्–उपादानजन्यं ' चो ' व्यतिरेकव्याप्तिसमुच्चयाय अनित्यं भवति । दृष्टान्तं तत्र मृन्मयो घटस्तन्तुमयः पट इति दृष्टान्तद्वयम् । आद्यस्य परिणामविशेष उपादाने उत्पत्तिविशेषोऽन्यस्य क्रियाविशेष इति तु स्वयमभ्यूह्यम् । तथा चानादिनिधनत्वं सिद्धमेव जीवानाम् । स्पष्टमप्याहुः—

' कारण अविभागाओ कारण अविनासओ य जीवस्स । निच्चत्तं विन्नेयं आगासपडाणुमाणाओ ।। इति । अत्र कारणाविभागः पटादेस्तन्त्वादिर्यथा कारणं तथा नैवमस्य । तथा कारणाविनाशः कपालं घटस्य कारणं विनश्यति च न तथात्र, कारणस्यैवाभावात् । तत आकाशवद् नित्य एव स इत्यादि ऋषिवाक्यमपि च । आप्तोपज्ञमनुल्लङ्घ्यमदृष्टेष्टविरोधकम् । तत्त्वग्राहितयोत्पन्नं मानं शाब्दं प्रकीर्तितम् ।।१।। इति लक्षणादविरोध स्यादित्याहुः–भणितदोषसद्भावात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपादितदोषसम्भवादन्यथेति तु ज्ञेयम् । यद्वा–परमर्षीणां प्रामाण्येऽनादिनिधनत्वे वा योज्यमेवं अदोषसम्भवात् निर्दोषत्वात्तेषां निर्दोषत्वाद्वाऽस्यार्थापत्त्यान्यथापक्षस्य सदोषत्वमनूदितम् । यद्वा–भणितदोषसद्भावादनादिनिधनत्वानभ्युपगमेऽभ्युपगन्तव्यमिदं इति स्वतन्त्रं प्रमाणत्वेन व्याख्येयम् । उपसंहरन्त आहुः–' तस्मादि 'ति । अनादिनिधनास्तेऽपि नेश्वरकल्पा एवेत्युक्तम्–' सर्वेऽपि ' अपि शब्दान्न केवल ईश्वरः । यद्वा–जीवत्वं ह्यनादिनिधनत्वाविनाभावि, तच्च सर्वेषामसुमतामिति सर्व एव तथा इत्ययोगव्यवच्छेदकैवकारार्थकोऽपिरितिज्ञेयम् । नैतद् वचनमात्रमिति ज्ञापनाय ' सिद्धमिणं 'ति । अनेन निरस्तास्ते य आहुः—

' पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ' ॥१॥ इति । ' निर्दोषं काञ्चनं चेत् स्यात् परीक्षाया बिभेति किम् । सदोषं काञ्चनं चेत् स्यात् परीक्ष्य किं प्रयोजन 'मिति परिहारात् । अत एव चोक्तं पूज्यैरेवान्यत्र–'पक्षपातो न मे वीरे न द्वेषः कपिलादिषु । युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः ' ॥ इति । यथैव चात्र धर्मादीनामनादिनिधनत्वमसाधि जीवावसानानाम् , तथैव पुद्गलास्तिकायस्यापि ज्ञेयम् , समानयोगक्षेमत्वात् । न च दृश्यन्त एव घटादयो विनश्यमाना इति प्रत्यक्षविरोध इति । तत्र पर्यायस्यैव, मृदस्तु तथैवावस्थानात्, उच्यते-सैवेयं मृद् याऽऽसीद् घटः , स एवायं तन्तुव्रजो य आसीत् पट इति । पठ्यते चात एव–पर्ययन्तीति पर्यवा इति । द्रव्यपर्याययोरभेदे कथं पर्यायाणां केवलानां विनाशः , अवस्थानं वा द्रव्यस्य केवलस्येति चेत् । कथञ्चिद् भेदवादस्याप्यभ्युपगमात् , सर्वं चैतद् ' अर्पितानर्पितसि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्धे 'रितिनियमात् । अत एव च द्रव्यार्थतया शाश्वतत्वप्रतिपादनेऽपि भगवद्भिराख्यातः स्याच्छब्दः । यत उक्तम्–'दव्वट्ठयाए सिय सासए' इत्यादि भगवत्याम् ।

एवं च पञ्चानामपि धर्माधर्माकाशासुभृत्पुद्गलानां तथा तथा निजस्वभावतोऽनादिनिधनत्वं सिद्धम् । **अत्र शब्दार्थ एवम्–तेन तेन** प्रकारेण धर्मादीनां प्रत्येकविभिन्नस्वभावत्वावेदनाय द्विर्वचनोक्तत्वात् यथा यथा तेषामधुना सत्ता तथा तथैव निजानां–स्वेषां धर्मादीनां स्वभावः–स्ववर्त्तनम्, नेमे वर्त्तन्तेऽन्यतः, किन्तु स्वयमेव, तस्माद् अनादिनिधना इति । प्रत्येकं वाऽऽयोज्यमेतत् 'तथा तथे'ति । द्विर्वचनं तु प्रतिक्षणं वर्त्तनयुक्तताज्ञापनाय । यद्वा–अन्योन्यपरिणामाभावज्ञापनाय 'तथा तथे'ति । सर्वदा सर्वेषामेव स्वस्वभावेन वर्त्तनं पर्यायापेक्षयापि वृत्तिताज्ञापनायैव व्याख्यायमानत्वात् नाविशेषः । अथ पञ्चानामप्येषां सर्वथा नित्यत्वे स्युरेवाप्रतिहता अनेके दोषाः, नचाभ्युपगताः सूरिभिः । यत उच्यते—

'य एव दोषाः किल नित्यवादे, विनाशवादेऽपि समास्त एव । परस्परध्वंसिषु कण्टकेषु, जयत्यधृष्यं जिनशासनं ते ।। क्रमाक्रमाभ्यां नित्यानां युज्यतेऽर्थक्रिया नहि । एकान्तक्षणिकत्वेऽपि युज्यतेऽर्थक्रिया नहि ।। जीवानाश्रित्य च–सत्त्वस्यैकान्तनित्यत्वे कृतनाशाकृतागमौ । स्यातामेकान्तनाशेऽपि कृतनाशाकृतागमौ ।। आत्मन्येकान्तनित्ये स्यान्न भोगः सुखदुःखयोः । एकान्ताऽनित्यरूपेऽपि न भोगः सुखदुःखयोः ।। तथा च–यदा तु नित्यानित्यत्वरूपता वस्तुनो भवेत् । यथात्थ भगवन्नैव तथा दोषोऽस्ति कश्चन ।।' [वीतराग०] इति वचनादित्याहुः कथञ्चित् पर्यायापेक्षयाऽनित्यत्वज्ञापनाय वर्त्तनमप्येतेषाम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'नवरं वट्टंति कज्जकारणभावेण'त्ति । तत्र 'नवरं'ति विशेषः को वक्ष्यमाणः । अनेन ज्ञापयन्ति व्यवस्थितमर्यादामेषामाचार्याः । ज्ञापयिष्यते साऽग्रतः वर्त्तन्ते–वर्त्तमानावस्थतामनुभवन्ति । वर्त्तमाननिर्देशश्च धातोः सम्बन्धे प्रत्ययाः' [५।४।४१] इति सूत्रेण त्रिकालविषयतायामप्यविरुद्धो ज्ञेयः । यद्वा–अनुभूतवर्त्तनापरिणामस्यातीतत्वाद् , अनुभविष्यद्वर्त्तमानतापरिणामस्य भविष्यत्वात् , साम्प्रतस्यानुभवस्य वर्त्तमानत्वाद् , वर्त्तमानताविनाभाविनी वर्त्तना त्रिकालिक्यपीति सुदूरमवमत्योचुः 'वर्त्तन्त' इति । उच्यते च प्रयोगज्ञैः–बभूव भवति भविष्यति वा सुमेरुः । यद्वा–त्रिकालगोचरतां ज्ञापनायैव एषामेवं व्यपदेशो दृश्यते चार्षेऽपि–'नो कप्पई'त्यादिष्वयं न्यायः अनेन प्रतिक्षिप्तमेतत् यदुत–पूर्वमनादिनिधना इति प्रतिपाद्यास्तिकायात् कथं वर्त्तन्ते इत्यधुना प्रतिपादयन्ति, वर्त्तनाया वर्त्तमानत्वात् , तस्याश्च सादिसान्तत्वाद् , अनादिनिधनत्व–सादि सान्तत्वयोश्च स्पष्ट एव विरोधः, प्रारब्धापरिसमाप्तक्रिया प्रबन्धस्यैव वर्त्तमानत्वात् , अनादिनिधनत्वं त्वप्रारब्धपरिसमाप्तक्रियाप्रबन्धत्व एवेति पातनिकयैव विघृतपूर्वत्वादेतत्समाधानस्य । द्रव्यपर्यायोभयात्मकत्वाद् वस्तुनः, पर्यायापेक्षया प्रारब्धापरिसमाप्तत्वे सत्यपि द्रव्यापेक्षयाऽप्रारब्धापरिसमाप्तत्वस्याविरुद्धत्वात् ।

एकस्मिन्नेव वस्तुनि उभयव्यपेक्षोभयव्यपदेशश्च एकस्यैव स्वरस्य ह्रस्वदीर्घादिभेदेन, एकस्यैव नरस्य स्वपितृपुत्रापेक्षया पुत्रत्वपितृत्वादिभेदेन, पीयमानं मधु मदयतीत्यत्रैकस्यैव मधुपदस्य पानापेक्षया कर्मत्वेन मादनापेक्षया कर्त्तृत्वेनाभीप्सतां वावदूकानां न कथञ्चिदपि विरोधमधिरोहति । अत एवोच्यत आर्षे–'सव्वेव्यक्तिषु नियतं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षणे क्षणेऽन्यत्वमथ च न विशेषः। सत्योश्चित्यपचित्योराकृतिजातिव्यवस्थानात् ॥ एकान्तनित्यानित्यवादपराकरणमप्येवमेव । तथा चोच्यते परमर्षिभिः–'नान्वयः स हि भेदत्वान् न भेदोऽन्वयवृत्तितः। मृद्भेदद्वयसंसर्गवृत्तिर्जात्यन्तरं घटः ॥१॥ इति। अत एव च त्र्यात्मकं वस्तु प्रतिपाद्यतेऽकलङ्कज्ञाननिधिपरमेश्वरप्रतिपादितकषच्छेदतापशुद्धवचनानुसारिभिः यथा–'तेनोत्पादव्ययस्थैर्यं सम्भिन्नं गोरसादिवत्। त्वदुपज्ञं कृतधियः प्रपन्ना वस्तुतस्तु सत्'॥ गोरसादिसदृशता चैवं यथा–'उत्पन्नं दधिभावेन विनष्टं क्षीरभावतः। स्थितं गोरसभावेन तस्माद्वस्तु त्रयात्मकम्'॥ आदिशब्दाच्च–'पयोव्रतो न दध्यत्ति न पयोत्ति दधिव्रतः। अगोरसव्रतश्चोभे तस्माद्वस्तु त्रयात्मकम्॥ घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम्। शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम्॥ इत्यादिग्रहः। घटविनाशस्यैव कपालोत्पत्त्यर्थकत्वात् नोत्पादविनाशयोर्भेदेन सर्वथा विसंस्थुलयितव्यमेतत्, न चैकतमाभ्युपगमे वस्तुस्वरूपं यथास्थं निर्वहति, व्यवहारादिरपि च सिद्ध्यत्येवमेवेत्यलं प्रसङ्गेन।

साभिप्रायं च क्रियापदमिदं 'वर्त्तन्त' इति। तथा च स्वस्वभावत एव वक्ष्यमाणरीत्या वर्त्तन्ते ते, न केनापीश्वरादिना वर्त्त्यन्ते इति; अदृष्टेऽपि तत्कल्पनेऽतिप्रसङ्गात्। न च वाच्यमुक्तमेव यद् दृश्यमानकारणकलापसमुद्भवमपि कार्यवृन्दं किञ्चिदपि कस्यापि भोगसाधनमिति कल्प्यते यथा तत्तददृष्टकारितमिति, न च दृश्यते तत्, न चाभ्युपगम्यते प्रत्यक्षादिविरोधस्तत्रेति चेत्। सत्यमुक्तमयुक्तं तूक्तम्, यतो दृश्यमानकारणानां सादृश्येऽपि कार्याणां वैचित्र्यं यद् दृश्यते, तत्र स्वीकार्यमेव कारणं तथाविधं किञ्चिद् यत् स्याद्वैचित्र्यनिबन्धनम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उक्तं चात एव–' तुल्लफलसाहगाणं तुल्लारंभाण इट्ठविसयंमि । दीसइ य फले विसेसो स कहं अदिट्ठऽभावंमि ॥१॥ त्ति । न चान्यद् वैचित्र्यकारणं कल्पयितुं युक्तम् । तत्र तस्य नामान्तरमेव स्याददृष्टे दृष्टं च नास्त्येव । यद्वा–तथा तत्समागमस्यापि वाच्यत्वेन प्रयोजकं तदेव तदिति ।

ननु तथैवाचेतनस्य क्रियाविकलत्वात् फलदानाभिमुखताऽदृष्टस्याचेतनत्वात् न युक्ता अनधिष्ठितस्य चेतनेनेत्यवश्यं कल्प्यः प्रेरक इत्युक्तमेवेति चेत् । तदप्ययुक्तमेव, यतः स्वोक्रियस्त एव चेतनावत्सम्बद्धमेवादृष्टं फलदतया, न त्वाकाशविवरपूरपूरकादृष्टस्य फलदत्वम् । ईश्वरस्य तु कथमदृष्टाधिष्ठायकत्वं घटामञ्चति, यतो भवता गुणतयैवाङ्गीक्रियते अदृष्टम्, गुणश्च न गुणिनमन्तरेणान्याधिष्ठितो भवितुमर्हति, ज्ञानसुखदुःखादीनामपि तथात्वाप्तिप्रसङ्गात् । स्वसंयुक्तमात्रेण चादृष्टस्य फलदत्वमौषधादिप्रयोगतोऽध्यक्षसिद्धमेव । नहि हरितक्या विरेचनेऽपरं विलोक्यते किञ्चित् प्रेरकम्, न चाचेतनस्य च करोति विरेकम्, तददृष्टस्य संसारिजीवाधिष्ठितस्य फलदत्वमभिप्रेयम् ।

अन्यच्च–यदि अदृष्टाधिष्ठायकत्वं स्यादीश्वरे, स्यादेव कर्मणः स्वतन्त्रफलानुपढौककत्वम्, संसारिणां तु कर्त्तृत्वात्तदधिष्ठायकत्वे दूषणकणिकाया अपि प्रसञ्जयितुमशक्यत्वात् । स्वतन्त्रफलदानप्रत्यलत्वे च कर्मणः स्याद् भक्तिमात्रतैवेश्वर उपचरितकर्तृत्वगानात् । तत एवोच्यते विद्वद्भिः–' अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः । ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ' ॥ इति पूर्वपक्षस्य



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समाधौ–' फलं ददाति चेत् सर्वं तत्तेनेह प्रचोदितम् '–' अफले पूर्वदोषः स्यात् सफले भक्तिमात्रता '॥ इत्यादि । अत्र ' पूर्वदोष ' इति यदुक्तं तदेवम्–नरकादिफले काँश्चित् काँश्चित् स्वर्गादिसाधने । कर्मणि प्रेरयत्याशु स जन्तून् केन हेतुना ॥१॥ इति कर्मणां निष्फलत्वे ईश्वरस्य यादृच्छिकप्रवृत्त्यापत्तेः बहूनामेव नरकादिविधानाच्च स्पष्ट एव दोष इति ।

किञ्च–यदि न करोति कार्यमचेतनं चेतनानधिष्ठितं कार्यं किञ्चित् कथं विलग्नं कर्मैव तावत् संसार्यात्मनि, तदपि तेनैव विहितं चेद् । अहो ! अपूर्वताण्डवाऽऽडम्बरनिपुणता निखिलेशस्य यत् स्वयमदृष्टं संयुज्य पुनस्तदागस्तया फलयत्यपरेषाम् । परे यथा प्रवर्त्तन्ते तथाऽसौ संयोजयत्यदृष्टेनाचेतनेन संसारिण इति चेद् । वरं अब्रवीः, परं सा प्रवृत्तिरयुक्ता युक्ता वा कथं लब्धजन्मा ?स्वयं चेन्, नित्यसत्त्वाऽसत्त्वापत्तिर्निर्हेतुकत्वात् । मुक्तानामपि पुनरावृत्तिराकस्मिकत्वात् प्रवृत्तेः । संसारिविहिता चेत्, चिरं जीव, फलस्यापि तथैव भावात्, यथाहि–कायादियोगा अचेतनाः प्रेरिताः संसारिभिः कर्महेतुकायां प्रवृत्तौ तथा योजयितारोऽदृष्टमपि ते । उपादानज्ञानादिकल्पना च वल्मीकादौ घटादावपि च व्यभिचरितपूर्वेति नोच्छ्वसितुमप्युत्सहते वराक्यत्र ।

न चानीप्सिते दुःखादौ कथं प्रवृत्तिः ? । सुखप्रेप्सुत्वे दुःखद्विट्त्वे सत्यपि च रोगातुर इवापथ्यं विदधत्येव संसारिणो मोहान्धितधियस्तादृशं तादृशम्, यदपेक्ष्योच्यते–' दुःखद्विट् सुखलिप्सुर्मोहान्धत्वाददृष्टगुणदोषः । यां यां करोति चेष्टां तया तया दुःखमादत्ते ॥१॥ उदीरितं च पूज्यैरप्यत एव–' स्वयमेव प्रवर्त्तन्ते सत्त्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्नेत् चित्रकर्मणि । निरर्थकमिहेशस्य कर्तृत्वं गीयते कथम् ' ॥१॥ इत्यादि । प्रवृत्तिरपि सा किं प्राक्तनकर्मफला न वा ? । आद्ये, स्पष्टमदृष्टस्य स्वयं फलदानप्रत्यलत्वमपरापरप्रवृत्तेरेव सुखदुःखविधानविधुरत्वाच्च निरर्थकमसत्यमेवान्यस्य कर्तृत्वगानम् । अन्त्ये, सर्वासामाकस्मिकत्वं किं न प्रवृत्तीनां, तथा च दोष उक्तपूर्व एव ।

यदि च ' यं तु कर्मणि यस्मिन् स न्ययुङ्क्त प्रथमं प्रभुः । स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः ' ॥१॥ इत्यादिवचनादादिप्रवृत्तिरेव तत्कर्तृकेति गीयते । तदाप्यसमञ्जसमेव, पूर्वोक्तदोषानतिवृत्तेः । कृतकृत्यता च नेशस्य स्यादेवं वर्णितातिप्रबन्धेनासमाप्तकामनस्य तथात्वे, यावज्जीवजातेऽपि भावात् तस्य । स्वभावतस्तथाप्रवृत्तिस्तस्य चेत्, अधुनापि कथं नादिसर्गः सर्गो वा ? स्वभावच्युतिनान्तरीयकत्वात् पदार्थच्युतेः । उक्तं च पूज्यपादैरेवान्यत्र–' आदिसर्गेऽपि नो हेतुः कृतकृत्यस्य विद्यते । प्रतिज्ञानविरोधित्वात् स्वभावोऽप्यप्रमाणकः ॥१॥ इत्यलं विस्तरेण ।

अधुना प्रकृतप्रकरणस्यैतदर्थत्वात् तस्यैव विवरिष्यमाणत्वात् कथं वर्तन्ते इत्युचिवांस–' कज्जकारणभावेण 'त्ति । तत्र कार्यत्वम्–उत्पत्तिमत्त्वं, कारणत्वं चान्वयव्यतिरेकानुविधायित्वम्, अवश्यक्लृप्तनियतपूर्ववृत्तिमत्त्वमप्येतदेव, ताभ्यां वर्तन्त एते । भावशब्दो भावार्थ एव । करणतृतीया चेयम् । तेन वर्तना, नान्यथा, किन्तु कार्यकारणभावाभ्यामेव । एकवचनं च प्रतिनियतकार्यकारणभावज्ञापनाय । यतो यदेव धर्मास्तिकायादिद्रव्यं नभोपेक्षया नभसोऽवगाहनात्तस्मिन्नवगाहनस्य च स्वाव्यतिरिक्तत्वात् कार्यभूतं तदेव गतिस्थितिपरिणतजीवपुद्गलोपचितोपग्रहदानापेक्षया कारणमिति । यद्वा–कार्यं च कारणं च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कार्यकारणे, तयोर्भावः कार्यकारणभावः, तेन हेतुना वर्त्तन्त इत्यनुशीलनीयः सरलः पन्थाः। तथा चाऽऽकाशस्य धर्माधर्मासुमत्पुद्गलानामवकाशदानात् कारणत्वं, परेषां च तद्ग्रहणेन तथापरिणमनात् कार्यत्वम्। शक्तिरूपेण वा भूतपूर्वापि शक्तिव्र्यक्तिरूपेणोद्भूता याऽऽकाशस्य तत्कार्यम्। कारणं च निमित्ताख्यं, धर्माद्या अनादितो जीवाद्याश्चेति परस्परं कार्यकारणभावः। धर्माधर्मयोरप्याकाशवदेवोह्यम्। इयाँस्तु विशेषः–यद्गतिस्थितिजीवपुद्गलापेक्षया तयोः परस्परं कार्यकारणभावः। आकाशस्य तु गतिमत्त्वाभावाद् धर्मास्तिकायापेक्षया गतिनिमित्ता अधर्मापेक्षया च स्थितिनिमित्ता नास्ति यतः तदभावात् गतिनिवृत्तिनान्तरीयकजायमानस्थितिपरिणामोपष्टम्भकत्वादेव अधर्मास्तिकायस्य। गतिश्च तस्य सर्वव्यापकत्वादसम्भविन्येव।

अनेन प्रतिक्षिप्तमेतद्–जीवपुद्गलानां स्थित्युपष्टम्भको यथा अधर्मास्तिकायः तथा धर्माकाशयोरपि स्वस्वस्थाने स्थितिमत्त्वात् कथं नाऽधर्मोपष्टम्भकत्वमिति। अन्यथा अलोकेप्याकाशस्थितिसद्भावात् तत्राप्यधर्मस्वीकारेण लोकव्यवस्थाविलोपापत्तेः। अनेन स्वस्वभावप्राप्तिलक्षणाया गतेराकाशेऽपि सत्त्वादुत्पादव्ययध्रौव्ययुक्तत्वाद् वस्तुमात्रस्यालोकेऽपि धर्मोपगमप्रसङ्गो निरस्तः। तथा जीवपुद्गलयोः परस्परं कार्यकारणभावः। स चैवं भाव्यः–जीवा हि ज्ञानलक्षणा ज्ञेयं च पुद्गलादि। धर्मादीनां त्वितरोऽपि विद्यते कार्यकारणभाव इति न विवक्षितास्ते। तथा परिणमन्ते पुद्गलास्तथा तथा जीवप्रयोगतः। उच्यते चात एव–'उप्पाओ दु विगप्पो पओगजणिओ अ वीससा चेव'त्ति। वैस्रसिकस्यापि पर्यायस्य पारम्पर्येण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदुद्भवत्वाविरोधात् । तथा च पञ्चानामप्यस्तिकायानां परस्परं कार्यकारणभावेन वर्त्तनमव्याहतमेव । हेतुता चाऽत्र स्वस्वशक्तेरेव करणत्वात् ।

ननु चैवं सति स्यादेवानन्तकालातिक्रमेण परिवर्त्तनस्वभावत्वात् पदार्थानां ' लवणाकरे पदार्था लवण 'मिति न्यायादितरेतरद्रव्यत्वापत्तिः अस्तिकायचतुष्टयाद्यवशेषता च । यद्वा–धर्मादीनामधर्मादितया अधर्मादीनामपि धर्मादितया च परिणामोऽन्नशरीरन्यायेनेति चेद्, अत्राहुः'भवे ण परसरूवे'त्ति । 'भवे'त्ति भवेयुर्न, अश्रद्धायां पञ्चमीविधानात् नैतत् श्रद्धातुमपि शक्यम् । किं तत् ? 'परस्वरूपा' इति । परे–धर्मादेरधर्माद्याः तेषां स्वरूपमिव स्वरूपं येषां ते परस्वरूपा 'उष्ट्रमुखादय' इति समासः । नहि भवंति धर्मादितया परिणममानानामप्यधर्मादीनां परस्परमन्योन्येषां स्वरूपं यतः । यद्वा–तत्साहश्ये तद्व्यपदेशात् सोऽयं गकार इत्यादिवत् परेषां स्वरूपं येषां ते परस्वरूपा इति व्यधिकरणो बहुव्रीहिः । भवति च ' एकार्थं चानेकं च ' इत्यत्र चकारस्यैकार्थमित्यतोऽपिग्रहणात् अयमपि साधुः । पुँल्लिङ्गता चास्तिकायापेक्षया ' एए अणाइनिहणा ' इत्यत्रापिं तथैवापेक्षितम् ।

प्रथमं तावत् पञ्चानामप्यस्तिकायानां मध्ये नैको न्यूनः सन्नलंभविष्णुर्लोकस्थितिः, धर्माधर्माभृते गतिस्थित्यभावेन पर्यायपराभृत्स्यभावादुत्पादव्ययध्रौव्यवियुक्ततापत्तेः गतिस्थित्योरेवाभावाद्वा । आकाशस्याभावे तु कुत्रापि न स्यात् स्थानं धर्मादीनाम्, जीवपुद्गलानां चाभावे गतिमदादिशून्यत्वात् स्पष्टैव धर्मादीनां स्वभावहानिः, तन्न विनैकेनापि शेषाः सर्वे सन्तोऽपि निर्वाहयन्ति लोकस्थितिं, तन्नैव भवेयुः परस्वरूपा इति यथार्थमेव । यद्वा–न कारणं तेषां स्वरूप-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विप्लवकरं नूतनस्वरूपोत्पादकं वा, यतः स्युरेते परस्वरूपाः । कारण-विरह–कारणविभागाद्याश्चात्रानुसन्धेया हेतुतया । तथा च परस्वरूपाऽभवनज्ञापनेन तथा तथा निजस्वभावतो वर्त्तनं प्रमाणितम्, तत्प्रमाणनाच्च एते अनादिनिधना इति सुसिद्धं कृतम् । तथा च ये ये निजस्वभाववृत्तिमन्तस्ते ते अनादिनिधनाः, यथा पराभिमता आकाशाद्या ईश्वराद्या वा, तथा तथा निजस्वभाववृत्तिमन्तश्चेमे, ततस्तथा । व्यतिरेके घटाद्याः, कृत्रिमा हि ते तथा तथा भावेनेति नादिनिधना न यतः, सिद्धं च धर्मादीनां जीवादीनां च तथा तथा निजस्वभावेन वर्त्तनमिति । पर्यायविलोपापत्तिश्च नवरमित्यनेन पराकृता ।

तथा च नैकान्तनित्यताभ्युपगमेन जैने रजनीभोजनं भजनीयमित्यादिवत् नागमविरुद्धतापि साध्यस्य । 'गम्ययपः कर्माधारे'[सिद्ध०] इत्यनेन पञ्चम्यां तदर्थे तसि चैवं व्याख्या वर्त्तन्त इत्यस्य घण्टालालान्यायेनोभयत्रापि वाक्ये सम्बन्धमनुयोज्य, अन्यथा तु भवनं भावः क्रियारूपधात्वर्थमात्रे घञ्, स्वस्य भावः तथा तथा वर्त्तनमिति व्युत्पत्तौ 'गुणादस्त्रियां हेतो'[सिद्ध०] रितिसूत्रेण हेतौ पञ्चमी, तथा च तथा तथानिजस्वभावादित्यर्थः सम्पद्यते, तथापि न कश्चन विरोधः । तथा तथा वर्त्तनं च धर्मादीनां नान्यकृतम् । नहि जीवपुद्गलादीन् आलम्ब्यैव धर्मादीनां गत्युपष्टम्भकस्वभावता जाता, नवाऽऽकाशाशादीनामवगाहनोपष्टम्भस्वभावता, किन्तु स्वभावसिद्धैव व्यज्यते तैः । तथा जीवानामुपयोगस्वभावता पुद्गलानां मूर्त्तस्वभावताऽपि च स्वस्वभावादेव । तथा चाकृत्रिमत्वात् स्वभावस्य, भावा अपि तेऽकृत्रिमा एव ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथवा 'तथा तथा निजस्वभावादि'ति पूर्वोक्तरूपेणैवैतेषां स्वयं भावाद् वर्त्तनादित्यर्थः। तथा चानुत्पत्तिकत्वे सति सद्भावादित्यर्थः। ये ये चानुत्पत्तिमत्त्वे सति सन्तः ते तेऽनादिनिधनाः। दृष्टान्तास्तु पूर्वोक्ता एवानुसन्धेयाः। पक्षेषु चात्र 'नवर'मित्यादि बाधितलक्षणबाधनिराकरणाय। कार्यकारणभावेन तथा तथा वृत्तावपि न ते अन्यस्वरूपा यतः, ततो नैषां तथा तथानिजस्वभाववर्त्तनं बाधाकरम्। अत्र हि पर्यायाणां विधेयतानुज्ञानात् न ते कृताः परमेश्वरेणेत्यनुसन्धेयम्। तस्य विवक्षितस्य परैः, पुरस्ताद् निराकरिष्यमाणत्वाद्, जीवादीनां च यथायथं पर्यायविधायकत्वे दोषाभावात्। एवं तु कथञ्चित् कर्तृत्ववादाभ्युपगमोऽपि न दोषाय। अत एवोच्यतेऽभियुक्ततमैः—

'कर्त्तायमिति तद्वाक्ये यतः केषाञ्चिदादरः। अतः तदानुगुण्येन तस्य कर्त्तृत्वदेशना ॥१॥ परमैश्वर्ययुक्तत्वात् मत आत्मैव वेश्वरः। स च कर्त्तेति निर्दोषः कर्तृवादो व्यवस्थितः ॥२॥ शास्त्रकारा महात्मानः प्रायो वीतस्पृहा भवे। सत्त्वार्थसम्प्रवृत्ताश्च कथं तेऽयुक्तभाषिणः ॥३॥ अभिप्रायस्ततस्तेषां सम्यग् मृग्यो हितैषिणा। न्यायशास्त्राविरोधेन यथाह मनुरप्यदः ॥४॥ इत्यादि। अत्र 'तद्वाक्य' इति विश्वस्य–भुवनस्य गोप्तेत्यादिवाक्ये औपनिषदीये, 'केषाञ्चिद्' इत्यभावितयथार्थपरमार्थानां मार्गाभिमुखादीनाम्, 'तस्य' इतीश्वरस्य,'स च कर्त्ते'ति जीवस्य चेतनत्वेन समस्तवादिभिरपि कर्तृत्वेनाविगानेन प्रतिपत्तेः। यदाश्रित्य प्रतिपाद्यते–'जीवं विना चाप्यकर्तृणी'ति।

यद्वा–जीवानामेवाभिलाषात् प्रयत्नवत्त्वाच्च कर्तृत्वम्। तथा च पुद्गलानां सत्यपि कर्तृत्वे तदभावान्न विवक्षिता कर्तृता। पाठान्तरे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तु ' साक्षात्कर्त्ते 'ति । तत्र ईश्वरस्यौपचारिकं कर्तृत्वं पूर्वं ' ईश्वरः परमात्मैव तदुक्तव्रतसेवनात् । यतो मुक्तिस्ततस्तस्याः कर्ता स्याद् गुणभावतः ॥१॥ ' गुणभावत ' उपचारमाश्रित्य विगतकर्ममलत्वेन सर्वदाऽस्थास्नुत्वात् साक्षात् कर्तृत्वाभावः, भवेच्चान्यथा केषाञ्चिदेव मोचनाद्रक्तद्विष्टताप्रसङ्ग इतीत्युक्तम् । तदनासेवनादेव यत् संसारोऽपि तत्त्वतः । तेन तस्यापि कर्तृत्वं कल्प्यमानं न दुष्यति ॥इत्यादि तद्वन्नाय-मिति ज्ञापनाय साक्षादिति । कर्तृत्वं च जीवानां तथा तथा बन्धोदयो-दीरणानिकाचननिर्जरापेक्षं समस्तपृथिव्यादितयोत्पन्नपूर्वत्वात् । एवं च श्रुत्युदितमशेषमपि घटते ।

तथा हि–भवत्येव जन्तुः संसार्यपि चेतनालक्षणभावप्राणवान् । उपादानं हि स एव तस्याः, ततस्तस्य प्रवर्तते आहारजिघृक्षारूपा श्रद्धा, तत आहारग्रहणाच्छरीरपरिणामरूपं स्वं हृषीकाणि वा, ततः श्वासलक्षणो वायुरिन्द्रियाभिव्यक्तिश्च शनैः शनैर्ज्योतिरादिशब्द-वाच्या, ततो भाषामनसी इत्येवं क्रमः । तथा ' ॐ ब्रह्मा देवानां प्रथमः सम्बभूवे 'त्यपि ज्ञानप्राधान्याभिप्रायेण संसारिजीवाभिधान-मेव । ततश्च ' द्वे विद्ये ' इति सिद्धसंसारिभेदेनाऽऽत्मद्वैविध्यप्रति-पादनम् । तथा ' भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्नि-श्चन्द्रश्च मृत्युर्धावति पञ्चम ' इत्यपि संसारिजीवस्यादृष्टवतोदृष्टस्य-विहितधर्मस्य वोद्देशः । उच्यते चार्षानुसारिभिरपि—

' न तिर्यग् ज्वलत्येव यज्ज्वालजिह्वो, यदूर्ध्वं न वाति प्रचण्डो नभस्वान् । स जागर्ति यद्धर्मराजप्रतापः स एकः परात्मा गतिर्मे जिनेन्द्रः ॥ इमौ पुष्पवन्तौ जगत्यत्र विश्वो–पकाराय दिष्ट्योदयेते वहन्तौ । उरीकृत्य यत्तुर्यलोकोत्तमाज्ञां, स एकः परात्मा गतिर्मे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिनेन्द्रः ॥ संसार्यात्मता च जिनेन्द्रस्याऽघातिचतुष्कस्य यावद्भव-भावितया स्पष्टैव । तथैव 'स ईक्षते मे लोकान् लोकपालान्नु सृजा' इति सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् तमभ्यतपदि'त्यादि श्रुत्युदितं गर्भजजीवोत्पत्तिप्राधान्यात् संवदत्येव । यत उच्यते—'सप्ताहं कललं विद्यात्सप्ताहमेव बुद्बुद' मित्यादिर्गर्भवृद्धिप्रकारः । तथा 'तदाण्डं निरवर्त्तते' त्याद्यपि मात्रोजःपितृवीर्यापेक्षयौपचारिकं व्यावर्ण्यमानं न कथञ्चनापादयति विरोधम् । अन्तर्यामित्ववर्णनमस्य जन्मभिरनन्तानन्तैरखिलयोनिस्पर्शो न कथञ्चनाप्यसङ्गतिमावहति । यदुच्यते—'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवीशरीरं यः पृथिवीमन्तरोऽमयत्येषत आत्मान्तर्याम्यमृतः । योऽप्सु तिष्ठन् । य आदित्ये तिष्ठन् । यो दिक्षु तिष्ठन् । यश्चन्द्रतारके तिष्ठन् । य आकाशे तिष्ठन् । यस्तमसि तिष्ठन् । यस्तेजसे तिष्ठन् । यः सर्वेषु भूतेषु तिष्ठन् । यः प्राणे तिष्ठन् । यस्त्वचि तिष्ठन् । यो विज्ञाने तिष्ठन् । यो रेतसि तिष्ठन्' । इत्यादि । तत्र क्वचिद्योनिप्राधान्येन, क्वचिदाधारप्राधान्येन, क्वचिदुपयोगप्राधान्येन, क्वचिदाधारोपष्टम्भप्राधान्येनैवं वर्ण्यते । परं संसारिजीवापेक्षमेतन्नानुचितिमञ्चति कथञ्चनापि । 'सव्वे भावा जीवेहिं पुट्ठपूव्वा अणंतसो' इत्याम्नायात् । एवमेव च 'विश्वतश्चक्षुरुत विश्वतोमुख' इति । तथा 'यो लोकत्रयमाविश्य बिभर्त्यव्ययमीश्वर' इत्यादीन्यप्यौपनिषदीयवाक्यानि यथायथं संसारिजीवस्य कर्तृतां साक्षाद्ब्रुवन्तीमाश्रित्य योज्यमानानि नाधिरोहयन्ते विरोधम् । 'विश्वस्य कर्त्ते'त्याद्यपि नीतिप्रवर्त्तक—युगमधर्मनिवारक-पुरुषविशेषापेक्षयैव वाच्यानि । तत एव च सत्स्वपि चतुर्दशसु भुवनेषु 'भुव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नस्ये 'ति निर्दिष्टमेकवचनान्तेन एकभुवनोपकर्तृत्वं तस्य, सङ्गच्छते च तदुपरितनोक्तरीत्येति प्रतिपादितं निर्दोषः कर्तृवाद इति। 'शास्त्रकारा महात्मन' इत्यादि तु सम्यग्दृष्टेः सरलः पन्थाः। 'सर्वत्रे 'ति ज्ञापनेनाचार्याः तथा योजकानामेव महिमानमेवमाविश्चक्रुः। तथा चैतावता पर्यायाणामनित्यत्वेऽपि द्रव्यतया नित्यत्वाद् अनादिनिधना एते इति साधितम्। अथ तथातथेत्यादितः प्रसाध्यानादिनिधनतां अविनाशादन्यथा परिणत्यभावाच्च पुनर्विशेषतोऽनिधनतां साधयन्त आहुस्तेषाम्।

यद्वा-पर्यायाणां व्ययित्वात्तेषां च 'एगदविअंमि जे अत्थपज्जवा वयणपज्जवा वावि। तीआणागयभूया तावइयं तं हवइ दव्वं॥१॥ ति 'उप्पायठिइभंगाई हंदि दवियलक्खणं एयं 'ति च [सम्मति०] वचनाद् द्रव्यैकदेशता तथा चैकदेशविनाशाभ्युपगमात् स्पष्टः सर्वविनाशाभ्युपगमापत्तिरित्यापाद्येत परेण, तत्र द्रव्यस्य कथञ्चित् पर्यायभिन्नत्वेन तद्भिन्नपर्यायव्यपगमेऽपि तस्याव्यपगमः, अन्यथा पर्यायानामेवानुपादानतयोत्पादाभावादित्यभिप्रेत्य स्पष्टतरमाहुर्नित्यतां लोकस्य पञ्चास्तिकायात्मकस्य प्रकरणानुसारिणीम्—

> नत्थि य अभावो जायइ तस्संतीए य नियमविरहाओ।
> एवमणाई एए तहातहापरिणइसहावा॥३॥

'अपि चे 'त्यभ्युच्चये साध्यसिद्धेः। यद्वा—प्रथमगाथया उत्पत्तिमत्त्वेन संसाध्याऽनादितां लोकस्य अनया निधनाभावं प्रतिपादयन्ति, तदर्थमेव च 'अपि चे 'ति। तथा च न केवलं तथा तथा स्वभावात् परस्वरूपापत्त्यभावादनादिता, किन्त्वभावाभावादपीत्यर्थः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्वा–पूर्वगाथायां परस्वरूपानापत्तिज्ञापनेन साधितमवस्थितत्वं तथापि मा भूत् सावधिकनियतत्वलक्षणमवस्थितत्वमित्यनाद्यपर्यवसानस्वरूपां नित्यतां साधयितुमनादिनिधनताविशेषणता अनेन तस्य हेतोरित्यपि चेति । तथा च परस्वरूपानापत्तावपि अभावाभावात् इत्येवंरूपो हेतुः सम्पन्नः । पर्यायाणां स्वतः पर्यायान्तरप्राप्त्यभावान्नास्ति परस्वरूपापत्तिः, तथापि जायते एवाभावो वाय्वादीनामभावाभावेऽपि च जलादिरूपतया परिणतेः न परस्वरूपानापत्तिरिति योग्य एव विशिष्टो हेतुः । प्राग् व्याख्याने तु तथातथानिजस्वभाववृत्तिमत्त्वसाधनाय तदुपन्यासान्न चर्च्यमस्ति किञ्चिदिति ।

यद्यप्यन्योन्याभावस्यास्ति भावात्मकता, तथापि ध्वंसादौ तथात्वाभावात् नाभावाभावत्वस्य पूर्वप्रोक्ततथातथास्वभावहेतोरविशेषश्चिन्त्यः । प्रतीयते हि घटध्वंसो न घटो, घटाभावो न, घटध्वंसः, अन्योऽन्याभावस्य वा घटापेक्षयाऽन्योऽन्याभावान्वितत्वात् पूर्वोक्तः प्रसङ्गः हेतोर्न चिन्त्यतामेति । यद्वा–पूर्वं पदार्थस्य भावाभावात्मकत्वाद् भावप्राधान्येन हेतुता, अधुना त्वभावप्राधान्येनेति विज्ञेयं विबुधैः । भावाऽभावोभयात्मकता च भावस्य । तथाऽनङ्गीकारे घटपटाभावयोर्भिन्नत्वेन स्पष्ट एव घटस्य पटताप्रसङ्गः । अपेक्ष्य चैतमेव पठ्यते परममुनिभिः मिथ्यादृशां बोधस्याज्ञानता ‘ सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवदि ’त्यत्र ‘सदसदविसेसणाओ भवहेउ जदिच्छिओवलंभाओ । नाणफलाभावाओ मिच्छादिट्ठिस्स अन्नाणं ’ ॥१॥ [ विशेषा० ] इत्यत्र च । इत्यलमतिप्रस्तुतेन ।

यतोऽभावो न जायते इत्यनादिताऽनिधनता वा ? । आद्ये, सत्त्वे सत्यभावाभावात् । अन्त्ये तु पक्षे यथाश्रुतमेव । यस्य यस्य च सत्त्वे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्यभावाभावः स सोऽनादिरेव, यथेश्वरादिः। तथा यस्याभावाभावः सोऽनिधन एव, यथाकाशादिर्गगनकुसुमाभावादिर्वा। न च नश्यति गगनकुसुमाभावस्तदुत्पत्तिनान्तरीयकत्वात् तस्य। न च भवति सैवेत्यनिधनतैव तस्य। अथ कथं न भवत्यभाव इति चेद्? आहुः— 'तस्संतीए य नियमविरहाओ'त्ति। शान्तिः—उपरमस्तेषां पूर्वोक्तानामस्तिकायानां शान्त्यामुपरमेऽभ्युपगम्यमानायामिति शेषः। नियमो —लोकप्रसिद्धव्यवहारो लोकस्थितिर्वा 'नियमः स्यात् प्रतिज्ञायां निश्चये यन्त्रणे व्रते' [अनेकार्थ०] इत्यत्र यन्त्रणस्यापि ग्रहात्। तस्य तस्या वा विरहः—विनाशोऽसाङ्गत्यं तस्मात्, चकारः पूर्वहेतुसिद्ध्यै हेत्वन्तरताऽस्य ज्ञापनाय। इदमत्र तत्त्वम्-यदि धर्मास्तिकायादीनामभ्युपगम्यते विरामो, न केनापि निर्वहति लोकव्यवहारो लोकस्थितिर्वा, कारणविरहादिना पुनरुत्पादाभावात् तदन्तरेण च गत्याद्यभावात्, तदभावे दृश्यमानस्य व्यवहारस्य स्थित्या वाऽनुपपत्तिरेवेति।

अपरे तु स्त्रीत्वनिर्देशस्य प्राकृतशैलीप्रभवत्वं व्याख्याय 'तस्सत्वादि'ति धर्मादीनां विनाशाभावे हेतुमाहुः, सामान्यस्य हेतुत्वाद्विशिष्टस्य च साध्यत्वात् न च साध्यहेत्वोरैक्यप्रसङ्गः। यद्वा— वर्त्तमानकालीनधर्मादिसत्त्वस्य हेतुतामास्थाय त्रिकालिकाभावाभावं तेषां साध्यते इति न कथञ्चनापि नोद्यम्। नियमश्चैवम्—नासतो विद्यते भावो नाभावो विद्यते सतः। उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥१॥ इति। तथा च यस्य त्रिकालेऽपि स्याद्विनाशः सोऽर्हति न वर्त्तमानसत्तां, द्रव्यार्थिकनयापेक्षया च प्रस्तुतप्रकरणारम्भात् पर्यायाणां तेन पृथगनभ्युपगमान्न पर्यायैः सम्पादनीया अनैकान्तिकता। यद्वा-तेषामप्यभिमतैव सत्ता प्रमाणेन तेषां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कारणरूपद्रव्यस्य सदा सत्त्वात् तदव्यतिरिक्तत्वाच्च पर्यायाणाम् । उच्यते चात एव–' उप्पायठिइभंगाइं हंदि दवियलक्खणं एयं 'ति । सत्त्वं च नियमविरहादिति, चकारश्चात्रापि पूर्ववद्धेत्वन्तरसमुच्चयाय । परं न भवत्यभाव इत्यस्यैव सिद्ध्यै हेतोरेकत्वात् ।

अन्ये तु 'तस्सत्ताए य विगमविरहाओ 'त्ति पाठमाहुः । साध्यहेत्वोरैक्यप्रसङ्गश्च विगमस्य ध्वंसरूपत्वात्, अभावस्य चाभावव्यवहार्यत्वात्, कार्यकारणभावापेक्षया भिन्नत्वमनुसन्धाय वारणीयः । केचित्तु ' तस्सत्ताए य विरहाओ 'त्ति प्राहुः । परे तु ' तस्संतीए य तिगमविरहाओ 'त्ति पाठमवलम्ब्य सन्नेव स्त्रीत्वविवक्षायां सती, तेषां धर्मादीनां सती तत्सती, तत्सत्यास्तद्वर्त्तमानताया इत्यर्थः । भावप्रधाननिर्देशश्चात्र। नोन्तस्तु प्राकृतशैल्यां तादृशस्यैव वर्त्तमानायां भावान्नायुक्तः । कथं चैतदित्युक्तम्–' अतिगमविरहादि 'ति । तत्र अतिगमनं–निरन्वयभावेन विनाशः, तद्विरहात्–तस्याभावात् । चकारोऽत्रानुकूलतर्कत्वसूचनायोत्तरस्य पदस्य । यतो यत् सत् तन्न विनश्यत्येव निरन्वयं, सतो नाशायोगात् । अन्यथा सत्त्वाविशेषान्नश्येत् त्रिभुवनमपि, नाशकारणान्यपि नैव सन्ति । न च विलोक्यतेऽपि द्रव्यनाशः । स्वभावपरिवर्त्त एव च नाशपदार्थः । स चापि स्वभावादेवेति नास्ति निरन्वयो नाशो द्रव्यस्य, तदभावे च सत्त्वेन गगनकुसुमादिवैलक्षण्यात् सदा सत्त्वमेव, सहेतुकस्यैव कादाचित्कत्वात् इत्याहुः ।

इतरे तु 'तस्संतीए य तिगमविरहाओ' इत्यस्य विशिष्टहेतावेव तात्पर्यमाहुः । अर्थश्च पूर्वव्याख्यानुसार्येव । परं सत्त्वे सत्यतिगमविरहात् अभावाभवनसिद्धिः। पर्यायव्यवच्छेदाय विशेष्यदलं, अभा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वच्छेदाय च सत्यन्तम्, अभावाभवनस्य सताऽनाश इत्यर्थकत्वात्, सामान्यविशेषरूपेण साध्यहेत्वोर्भेदात् ध्वंसस्य कारणताशून्यत्वस्य वा साध्यतामाश्रित्येत्याहुः । अथ चैवं धर्मादीनां तत्त्वतोनुपादानत्वेनाऽनादिनिधनतां गमयन्त्याचार्याः । नहि धर्मादीनामस्ति कारणमुपादानाह्वम्, घटादीनामस्त्येवेति तेन तथा नाकाशादीनां च तदिति अनादिनिधना एते धर्माद्याः, आकाशादीनां पक्षैकदेशभूतानामपि दृष्टान्तत्वं नानुचितं, प्रतिवादिभिः तथैव तत्प्रतिपत्तेः, प्रतिपत्त्यास्पदं च व्याप्तेर्दृष्टान्त इति त्वखिलवादिसम्मतः पन्थाः । अन्यथा तु वह्निमान् धूमात् महानसवदित्यत्रापि भवेदेव वादिनां कान्दिशिकत्वम् । सङ्क्षेपतो निगमयन्त आहुः–'एवमणाई'इत्यादि । तत्र 'एव'मिति पूर्वोक्तरीत्या तथा तथा निजस्वभावात् परस्वरूपानापत्तेरभावाभावात्तत्सत्त्वात् नियमविरहात् इत्याद्यदुष्टहेतुसाम्राज्यसिद्धेः । किमित्याहुः–अनादयः अस्तिकाया इति तु प्रकृतमेव ।

ननु च प्रागनादिनिधनत्वं प्रतिज्ञायोपसंहारे कथमूचिवांसोऽनूचाना अनादय इत्येवेति चेत् । सत्यम्, ज्ञापनायैवैवं न्यायविशेषस्य 'कत्थइ देसग्गहण' मित्यस्य व्यपदेशः । परे त्वनादितैवानिधनत्वे मूलमितिज्ञापनाय । कर्मसंयोगस्य तु प्रवाहतोऽनादिता नैकव्यक्तिकी । अत्र तु द्रव्याणामेकस्वरूपेणैवानादितायाः पूर्वं साधितत्वात् सुविस्तरम् । केचित्तु प्रागनादिनिधना इत्यत्र प्रासङ्गिकमेवानिधनत्वमुद्दिष्टम्, अनादिताया एव प्रकृतत्वाद् । अत एव च द्वितीयविंशिकासूत्राधिकारे 'लोगाणादित्तमेव बोद्धव्व' मिति । प्रकरणोपसंहारे 'इय तंतजुत्तिसिद्धो अणाइमं एस हंदि लागु 'त्ति । तथा प्रकरणोपक्रमेऽपि 'अणाइमं वट्टए इमो लोगो'त्ति च प्रतिपादितवन्तः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा च अप्रकृतपरित्यागेन प्रकृतमेव संहरणीयमुपसंहार इति नियमानुरोधाद् अनादृत्य इत्येव ।

अपरे तु 'एए अणाइनिहणा' इत्यत्र निधनाभावग्रहः । 'नवि य अभावो जायइ' इत्यत्र निधनाभावसाधनं च वस्तुस्वरूपसिद्ध्यर्थमप्रकृतमपि प्रकृतानुप्रकृतं प्रतिपादितम्, अनुपक्रान्तमपि महान्तो हि परोपकारमात्रप्रवणान्तःकरणतया लाघवार्थमुपयोग्यप्रकृतं प्रकृतानुप्रकृतं वा प्रतिपादयन्त्येव । अत व्याख्याविधानप्रस्तावे 'तइओ निरवसेसो' इत्यनेन निर्युक्तिप्रतिपादितप्रकृताद्युपगमेऽपि तृतीयोऽनुयोगविधिर्व्यधायि व्याख्याप्रकारधुराधौरेयैः श्रीमद्भिः । क एवंविधा? इत्याहुः–'एते' इति ।

ननु च लोकस्य प्रकृतत्वात् 'लोगाणादित्तमेवे'त्यनेन 'अणाइमं वट्टए इमो लोगो' इत्यनेन च कथमेते इति निर्देशः, एत इत्यनेन तु पञ्चानामस्तिकायानामेवानादित्वसिद्धिपरामर्श इति चेत्। सत्यम्, मा विस्मार्षीः 'पंचत्थिकायमइओ'त्ति पूर्वमेव प्रतिपादितम् । सत्यम्, परं कथमेवं भिन्ननिर्देश? इति चेद्, अवयवावयविनोः कथञ्चिदनन्यत्वज्ञापनाय । यथाहि–अन्येषां विनष्टा कपालयुगल्युत्पादयति घटम्, नैवमत्र । किन्तु सैव तथा परिणमते, यतो व्यपदिश्यते च–'सेयं कपालयुगली'ति । तथा अत्रापि लोकत्वव्यपदेशेन पञ्चानामपि समुदितानां नावयवस्वरूपमन्यथा भवतीति । अथवा नाऽत्र मृन्मयो घटस्तन्तुमयः पट इत्यादिवद् भिन्नोऽवयवी कोऽप्यस्ति, किन्त्ववयवा एव तथा व्यपदिश्यन्ते समुदिताः, यथा नाङ्गुलीर्विरहय्य हस्तश्चूतादीन् परित्यज्य वा वनस्पतिः, मुक्त्वाऽथवा गजादीन् सेना, तथा धर्मादिभिन्नो न कोऽपि लोकः, किन्तु त एव हस्तादिवत् धान्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राशिवत् समुदिताः तथा व्यपदिश्यन्ते । तथा ' पंचत्थिकायमइओ ' इत्यत्र ' अस्मिन् ' इत्यनेन मयटो विधानेऽपि न क्षतिः । मा भूदेकान्तनित्यताऽऽग्रह इत्याहु :—' तहातहापरिणइसहावा ' इति ।

ननु च प्रागेव प्रतिपादितं 'वर्तन्ते कार्यकारणभावेने'त्यनेन पर्यायानित्यत्वप्रतिपादनेनैव उत्पादादित्रययुक्तत्वं, पुनः किमनेनेति चेत् । सत्यम्, प्रतिपादितं तदेवोपसंह्रियते सूरिभिरत्र । ननु समुदितं संह्रियतां अनादि तथा तथा परिणतिस्वभावा इति । सत्यम्, तथैवास्ति परामर्शः, केवलं बन्धानुलोम्येन निर्देशोऽनया रीत्या, परमादिमभिप्रेयतां दुर्नयानां शिक्षायै निबद्धत्वादेतत्प्रकरणस्य, अनादितायाः स्पष्टः परामर्शः, पातनिका ज्ञापितेष्टसिद्धये चान्यस्येति सुधीभिरूह्यम् । परे तु द्विविधा हि पर्यायाः स्वभावविभावभेदेन । तत्र प्राग् ' वट्टंति कज्जकारणभावेणे 'त्यनेन विभावपर्यायप्रतिपादनद्वारा नित्यता ज्ञापिता । अत्र तु स्वभावपर्यायद्वारा सैव प्रतिपादितेति न पौनरुक्त्यम् । स्वभावपर्याययोश्च सर्वथा भेदाभावान्नोपक्रान्तेत्यस्मिन्नुपसंहारोऽन्यस्यायुक्तः । यद्वा—स्थूलधीगम्यकार्यकारणत्वादिकान् पर्यायानाख्याय प्रागधुना तत्स्वभावपर्यायान् सूक्ष्मतरधीगम्यानुद्दिशन्ति सूरयः । प्रथमे वा केवला यौक्तिका अधिकृताः । अत्र तु श्राद्धिका इति भेदेनोपन्यासः । भवति चाधिकारिपार्थक्येन भिन्नत्वं व्याख्यानस्य । तत एव च ' निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानत ' इत्यभिगमप्रकारानुपाख्याय तार्किकान्, ' सत्सङ्ख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च ' इत्यनेन श्राद्धान् प्रत्युपाख्यायि सूरिभिस्तत्त्वार्थसारसूत्रे तत्त्वार्थे पूज्यैरपि । 'तत्प्रकृतिदेवताधिमुक्तिज्ञान'मित्यादावभिमतमेवेति नात्रैवमुपन्यासो दोषायेत्यलं प्रसङ्गेन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा तथेति । यथा द्रव्यत्वं न व्याहन्यते तथा–ध्रौव्यापरित्यागप्रकारेणेत्यर्थः । यथाहि–जीवः स्वकर्मोदयात् नानागतिषु पर्यटन्नपि न जीवत्वनिबन्धनं चेतनापरिणामं पारिणामिकं वा जीवत्वं परित्यजति, न तथाऽत्रापि धर्मादयोऽस्तिकायास्तथा तथा स्वभावपर्यायपरावृतिमाचरन्तोऽपि नारूपत्वादिधर्मादिस्वभावतां पारिणामिकं वाऽजीवत्वं परित्यजन्तीति तथोच्यन्ते ।

अनेन य आहुः–अजीव इति विशेषलक्षणप्राधान्याज्जीवस्य चोपयोगलक्षणत्वाच्चेतनाशून्याः पदार्था इत्येवार्थो योग्यः, न तु जीवत्वशून्या इति । जीवनं हि आयुःकर्मप्रभावात् प्राणधारणमुच्यते, तन्निषेधादजीवत्वे व्याख्यायमाने स्पष्टं सिद्धानामप्यजीवत्वप्राप्तिः, आख्यायते च सिद्धा अपि जीवतया 'संसारिणो मुक्ताश्च' इति वचनात् । ते निरस्ता वेदितव्याः । यतो जीवनं प्राणधारणलक्षणं तदौदयिकं, परं 'जीवभव्याभव्यत्वादीनि च' इत्यत्र त्वप्रत्ययस्य 'द्वन्द्वादौ' इति न्यायात् प्रत्येकमभिसम्बन्धाद् वर्ण्यमानं पारिणामिकं जीवत्वमुद्दिश्य प्रसज्यप्रतिषेधेऽपि बाधाभावात् । न प्रसक्तं तदित्यभिधानमपि नैव युक्तं, प्रथमं जीवत्वस्य व्युत्पादितत्वात् स्वानुभवसिद्धत्वाद्वा जीवत्वस्य तथा प्रसक्तावपि विरोधासिद्धेः । पर्युदासे तु वाच्यमेव न किञ्चिदित्यलमप्रस्तुतचर्चया ।

परिणमनं परिणतिः–पूर्वावस्थापरित्यागेनावस्थान्तरसङ्क्रमः । भावे स्त्रियां क्ति [सिद्ध०] रिति क्तिः । यद्वा–परिणम्यते–परावर्त्यते द्रव्यमनयेति परिणतिः। पर्यायाणां द्रव्यादभिन्नत्वादेव, यदुच्यते–"दव्वं पज्जवविजुयं दव्वविजुया य पज्जवा णत्थि "त्ति । तथा च करणे क्तिः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'क्रियांक्ति 'रित्यनेनैव भावाकर्त्रोरित्यधिकारात् द्रव्यस्यानुस्यूतरूपस्य तथा तथाऽवस्थान्तरप्राप्तिः । अत एव चोच्यते–' दवए दुयए दोरवयवो विगारो गुणाण संदावो 'त्ति । गुणानां च पर्यायत्वं स्पष्टमेव स्पष्टितं द्रव्यपर्यायार्थिकोभयतया नयज्ञापनेन, भिन्नत्वे गुणार्थिकस्य तृतीयस्यापि स्यादेव वाच्यता । तथा च यत्र गुणपर्याययोरुभयोर्ग्रहणं युगपद् भवति, तत्र तक्रकौण्डिन्यन्यायेनेत्यनुसन्धेयमनुसन्धानधौरेयैः । अवस्थान्तरप्राप्तेरेव च परिणतित्वं ' नार्थान्तरगमो यस्मात् सर्वथैव न चाऽऽगमः । परिणामः प्रमासिद्ध इष्टश्च खलु पण्डितैः ' ॥१॥ इत्यादिनाऽनेकत्र साधितमेव विद्वद्भिः ।

अनेन परिणाममात्रपरावृत्तिद्वारा द्रव्यविनाशमभीप्सतो वैशेषिकादेर्निरस्तमेव मतम् । एवं हि क्षणिक एव पर्यवसानात् निषण्णोऽवस्थितमनुष्यदेहेऽपि भेदबुद्धेरवश्यं स्वीकार्यत्वात्, भिन्नं हि परिणाममुभयत्र नवपुराणादि भावस्य च प्रतिक्षणं भावादर्पितयाचनादिः सोऽहमित्यादिः सोऽयमित्यादिश्च प्रतिदिनक्रियमाणप्रामाणिकव्यवहारनिश्चयोऽपि विशरारुतां व्रजेत, व्रजेयुः शिष्टा अपि समेऽशिष्टतां मृषावादित्वप्रसङ्गात्, यथाज्ञाताभिधाय्येव च शिष्टः, अन्यथा तु विप्रतारकाणां वेदाभ्युपगन्तॄणां स्यादुच्छिष्टतापादयित्री शिष्टता, शिष्टानां ब्राह्मणानां चाण्डालिकमातृकत्वादिवत् । किञ्च–तथातथेति योगाच्च एकाश्रयता पर्यायाणामनन्तानामपीति तु स्वयमूह्यम् । तथातथापरिणतिश्चासौ नेतरकर्तृकेत्युदाहृतम्–स्वभावेति । यद्वा–नेयमारोपिता माणवकेऽग्नित्वाद्यारोपवत्, किन्तु स्वाभाविकैवेत्युदितम्–स्वभावेति । अनेन च तथातथापरिणत्यापादनमपीश्वरकर्तृकं द्रव्याणां परमाण्वादीनां द्रव्याकर्तृकत्वेऽपि कर्तृकतासाधकमिति परि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यञ्य प्राचीनपथमपरमपि कल्प्यमानं न क्षमावहमित्यावेदितम्। सृष्टेः प्राग् द्रव्याणां तथातथापरिणत्यभावे उत्पादविनाशादिपर्यायव्यपेतत्वेन द्रव्यत्वघाव्यताया एवाभावात्।

यदि च तदा वर्त्तन्त एव तानि स्वयं तथातथा तदा को विद्वेषः? पश्चाद्यदीश्वरः परिणमयति तथातथा तानीति। उच्यते–दुग्धादीनां दध्यादिभावश्च दृश्यत एव स्वयम्, तत्र द्रव्याणां यथार्हं तथातथापरिणतिस्वभावत्वं श्रद्धातुं दुष्करं बुद्धिमताम्। ईश्वरस्यापि च तथातथापरिणतिस्वभावत्वं स्वीक्रियत्ते, तदैव तस्यापि युक्ता वदितुं द्रव्यता तस्य। स्वयं तथा वर्त्तने को विद्वेषश्च इतरेषां तथातथावर्त्तने?, येन प्रकल्प्यते परमेश्वरस्य परमकलङ्कभूता कर्त्तृता, कार्यत्वादिहेतुवृन्दं चासिद्धप्रतिबन्धं विशेषविरुद्धसाध्यसाधकं च। यतो यथा भवद्भिः कार्याणां सकर्त्तृकत्वदर्शनमात्रेण कल्पितसंस्थानवत्त्वादिना पृथ्व्यादेः सकर्त्तृकत्वं साध्यते, वृक्षाङ्कुरादिकार्यगणं प्रत्यक्षविरुद्धमपि श्रद्धान्धतया, तथा किं नालोक्यते सर्वत्र शरीरप्रयत्नसद्भावः कार्यमात्रे?, आलोक्यते, कथं नेश्वरस्य सशरीरताप्रसङ्गः, न कर्मवत्ताप्रसङ्गश्च?। ततः कथञ्चनापि नैव निवारयितुं शक्यः।

यच्च शरीरक्रियायां शरीरान्तराभाव इति नोद्यते, तदपि लैङ्गिकशरीरस्वरूपानवगममूलमेव। यद्वा–अस्तु कर्मवाँस्तु निखिलप्राणिगणस्तथाऽवेक्ष्यते इति किं न तत्त्वाभ्युपेयते, अभ्युपगमे च स्पष्टैव संसारिवदकर्त्तृकता संसारिणां वा सकर्मणामेव कर्त्तृता। यदपि चोच्यते–विशेषविरुद्धेन किं क्रियते इत्यादि, तदप्यनेन परास्तमेव। हेतुव्यावर्त्तनेन कर्तृताया अपि व्यावृत्तेः। मृद्दिकारस्यापि घटस्य बुद्धिमत्कर्त्तृकत्वसिद्धेर्वल्मीकविधायिन्या अप्युदेहिकायास्तथाविधबु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्व्यभावात् घटाकर्तृकत्वसिद्धिवत् इत्यलमधुना, पुरस्तात्तस्यैव विवरिष्यमाणत्वात् ।

अत्रावसरे वादी भद्रं न पश्यतीतिन्यायात्तथास्वभावतोऽनादितां लोकस्य साधितां सूरिभिर्निशम्याऽन्तरा प्रत्यवतिष्ठेतेति तदारेका-मारचय्य पूज्या निवारयन्ति तां गाथया चतुर्थ्या—

इत्तो उ आइमत्तं तहासहावत्तकप्पणाए वि ।
एसिमजुत्तं पुव्विं अभावओ भावियव्वमिणं ॥४॥

तत्र 'इत्तो' इत्येतस्मात्, कस्मादिति चेद् ? वक्ष्यमाणात् पूर्वम-भावप्राप्तिलक्षणाद् दोषात् हृद्वर्तितया च तस्य समीपतरत्वाद् एतदा निर्देशो न दुष्टः पूर्वं बुद्ध्याऽऽरचय्यैव ग्रन्थकारा रचयन्ति ग्रन्थमिति नियमाच्च हृद्वर्तित्वमपि न विरुद्धं तस्य । यद्वा–सप्तमीतसि अत्रेति पदार्थः । एत्तो इत्यस्येदम आद्यादित्वाच्च न सप्तमीतसो दुर्लभता, ' इतोतः कुतः सर्वविभक्ति 'ष्विति चेत इति । सिद्ध्यति, त्तोदो तसो वेति त्तो आदेशे 'इत एद्वा संयोगे' इति भवत्येव प्राकृते 'एत्तो' इति । तथा चात्र लोकानादित्वप्रकरणे इत्यर्थः सम्पद्यते । तुः प्रथ-मपक्षे आदिमत्त्वापादनस्यायुक्ततरताज्ञापनायाऽवधारणेऽपरत्र तु पूर्वप-क्षोत्थानसूचनाय । व्यावर्त्तयति हि सः सिद्धान्तमिति । किमारेकयति वादीत्याहुः–'आदिमत्त्वम्' आदिः–पूर्वोक्तलक्षणः, स विद्यतेऽस्येति आदिमान्, तस्य भाव आदिमत्त्वं स्वल्पार्थे त्वविधानमेतत् । द्रव्याऽ-पेक्षयाऽऽदिमत्त्वमभिप्रेयते चादिनेति तु प्रकरणादेवावसेयम् । यतो नहि पर्यायापेक्षयाऽऽदिमत्त्वं निषिद्धं सूरिभिः, यदापाद्येत वादिना, स्वीकृतस्यापादनायोगात् सम्मतेऽर्थे विवादाभावात् । अत एव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समानयोगक्षेमस्य न पर्यनुयोग इति हि नियमितं विद्वद्भिः। केन हेतुनाऽऽपादयति स तत्त्वमिति द्वापरस्य तदभिप्रेतं हेतुमाहुः—'तहा-सहावत्तकप्पणाए वि 'त्ति। तथा स्वभावत्वकल्पनयाऽपीति।

यथाहि—भवन्तो धर्मादीनां तथास्वभावतामाश्रित्य साधयन्त्यनादितां लोकस्य पञ्चानामस्तिकायानां वा, तथास्वभावे पर्यनुयोगाभावाद्। अहमपि तं तान् वा तथास्वभावात् कल्पयामि—यथाऽसन् असन्तो वा ते प्रादुर्भवन्ति, पूर्वोक्तादेव हेतोश्च। नैवात्र वाच्यमस्ति भवताम्, अवकाशस्यैवाभावादिति। तथा चादिमाँल्लोकः पञ्चास्तिकाया वा, तथास्वभावात्, अग्नेर्दाहकतावत्। नहि अग्नेः कथं दाहकतास्वभावो, नाऽपामिति पर्यनुयोगः पर्यनुयोगप्रवणैरपि वादिभिः कर्तुं पार्यते। तथा चासिद्धप्रतिबन्धो हि स्याद् भवद्धेतुः। यद्वा—सत्प्रतिपक्षितमनुमानं स्याद् हेतुसाध्यव्याप्तिसिद्धावपीति वाक्यमिप्रायः। अपिश्चान्यथानुमानस्यादूष्यतां साधयति, अनेन हेतुना साध्यमानमादिमत्त्वं वक्ष्यमाणदोषादनुमानविरोधग्रस्तत्वेन साध्यस्य बाधितं तथाऽन्यान्यपि वावदूकव्यागूर्णानां हेतूनामप्यसिद्धतादिग्रस्ततैवेति सूचितम्। तथा च अपिः सम्भावने। असत्यपि दूषणे 'नहि वदतो वक्त्रं वादिनो वक्रं भवती'ति न्यायात् सम्भाव्यते अदः, परं न तेनापि बाधितं स्यादनुमानमिदमप्रतिहतशक्तिकं, वज्रवद् दुर्भेद्यत्वादिति तत्त्वम्।

किमित्याहुः—'एसिमजुत्त 'त्ति। एषां—धर्माद्यानामस्तिकायानां तन्मयत्वाल्लोकस्य च। यतः प्रकृतः स एव। पञ्चानामस्तिकायानां तु लोकस्य तन्मयत्वादुत्क्षेपः। 'अयुक्तम्'-युक्तिशून्यम्, आदिमत्त्वमिति तु प्रकृतमेव। कथमयुक्तता धर्मादीनां लोकस्य वा आदिमत्त्वे?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्याहुः–' पुव्विं अभावओ 'त्ति । पूर्वम्–आदितयाऽभिमतात् कालात् आदौ, अभावात्–अविद्यमानत्वात् । अयमत्र भावार्थः– यदादिश्यते आदिः, तदा नास्त्येव लोकोऽस्तिकाया वेति कथं तेषां तस्य स्वभावता ? सत्येव वस्तुनि स्वभावस्य विद्यमानत्वाद्, अन्यथा तस्य स्वभावत्वस्यैवाभावात् । न चाऽसतां तथास्वभावता युक्ता, तथास्वभावतास्वीकारादेव चादौ प्राप्तं तेषां लोकस्य वा तत्पूर्वकालविद्यमानत्वमिति । तथा च स्पष्टैव वाद्यभिमतहेतोर्विरुद्धता, तथास्वभावत्वलक्षणहेतुसद्भावादेव लोकस्यास्तिकायानामादित्वाभावप्राप्तेः । अस्योद्घटितार्थतां ज्ञापयन्त आहुः–

' भावियव्वमिणं 'ति । एतत्–पूर्वोक्तवाद्यभिमतपक्षस्य परिफल्गुत्वम्, भावयितव्यं–चिन्तनीयं 'भूण् अवकल्कने' इति वचनात् । भुवो विचारार्थता सहजविचारगम्यतैतत्पक्षबाधज्ञापनाय च भावयितव्यमिति । यद्वा–उपहासेन 'शक्तार्हे खल्वर्थाश्चे'ति सूत्राद्वाऽऽदिपक्षस्य विचारणीयतां ज्ञापयन्ति । तथा च परिफल्गुरेवायं पक्ष इति भावः । अथवैवं योजनीयम्–पूर्वमभावादेषामादिमत्त्वमयुक्तमेतद् भावयितव्यमिति ।

अन्ये तु साङ्ख्यानां पूर्वपक्षत्वमत्राभिप्रेत्य वदन्त्येवं यदुत– साङ्ख्यास्तावत् सत्त्वरजस्तमोगुणमयीमभ्युपगच्छन्ति प्रकृतिं प्रधानाव्यक्तशब्दवाच्यां नित्यस्वरूपाम् । ततश्च बुद्ध्यादिक्रमेण पूर्वप्रतिपादितेन अहङ्कारादिपञ्चभूतान्तां सृष्टिमभ्युपगच्छन्ति । अचेतनाया अपि प्रकृतेश्च जगदुद्भूतिकारणत्वं पुरुषविशेषस्य तु ' असङ्गोऽयं पुरुष ' इति वचनान्नाङ्गीकुर्वन्ति कर्तृतां, किन्तु ' प्रधानसृष्टिः परार्थं स्वतोऽप्यभोक्तृत्वादुष्ट्रकुङ्कुम (वहन) वत् अचेतनत्वेऽपि क्षीरवच्चे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्टितं प्रधानस्य '[ साङ्ख्य० ] इति सूत्रयुगलेन प्रधानस्य विश्वविधायकत्वाभ्युपगमस्तेषां, तान् प्रतीदमाहुराचार्याः—

यद् यदि नित्या प्रकृतिः किं नार्वाक् पुरा वा न विदधे सृष्टिं सा ?, अनपेक्षितकारणस्य नित्यस्य कारणस्य कार्यविधानावश्यकत्वात्। न च सृष्टिसर्जने प्रकृतेरपेक्षाऽपरस्यात्मनः, अकर्तृत्वाभ्युपगमाद् बुद्ध्यादीनां च कार्यरूपत्वात् सत्यां तस्यां कार्यस्यैवानुत्पादाद्, अनियतं इष्यते च जगत औत्पत्तिकत्वम्, तदिदमितो दुस्तटीव्याघ्रन्यायमापन्ना भवन्त इत्युषः सूरीनाहुः—साङ्ख्या निरीश्वराः, सेश्वरस्य तु ईश्वरवादनिराकरिष्यमाणत्वेनैव निराकृतिभावात्। यत् प्रकृतिरेव तथास्वभावा यत् तदोत्पादयति जगन्नान्यदेति ब्रुवतः साङ्ख्यानाहुः पूज्याः—

यत् यदि प्रकृतिर्नित्यस्वरूपिका, उत्पादयति च जगत् कदाचिदेव। तथा च स्पष्टैव तस्या अनित्यता, कर्तृत्वस्वभावहानेः। स्वभावव्यये हि पदार्थान्तरतापत्तिरेव, अन्यथा कपालीभावापन्नस्यापि घटस्य जलाहरणाद्यनुपयोगितायामपि स्यात् स्वीकार्या सत्ता प्रत्यक्षविरुद्धाभ्युपगमविरुद्धा च इत्यभिप्रेत्य सूरीणामभिप्रायं व्याख्यानयन्त्येवम्— अत्र लोकाऽनादित्वप्रकरणे, तुः पूर्वपक्षोपस्थापनार्थः। प्रकृत्या इत्यध्याहार्यम्, तथा स्वभावत्वकल्पनयापि-कदाचिदेवोत्पादयति जगदित्येवंभूतस्वभावकल्पनयापि, अपिना पूर्वप्रतिपादितदुस्तटीव्याघ्रन्यायस्मारणम्। अभिमतमेषां साङ्ख्यानां जगत आदिमत्त्वम् अयुक्तम्, अवधारणफलत्वाद्वाक्यस्यायुक्तमेवेत्यर्थः।

कुतः ? इत्याहुः—पूर्वमभावात्। यदा हि भवन्त उदीरयन्ति जगतः प्रारम्भावस्थां, ततः किमिति प्रकृत्या न चक्रे तत्। नहि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदा सा नाऽभूत् ?, तथात्वे तस्या अनित्यत्वापत्त्या तत्कारणं किञ्चिदन्वेषणीयं स्याद् भवताम्। तथा चाभ्युपगतहानिः स्पष्टैव। यदि चाऽभूत् नित्यत्वात्तस्याः, तदा तस्या जगत्करणस्वभावत्वात् कथं न तयोत्पादितं जगत् ?। तथा चेत् स्पष्टैव प्रकृतिनित्यतावद् जगतोऽपि नित्यतापत्तिः। पश्चाज्जायते जगदित्यङ्गीकारे च स्पष्टैवोपपत्तिहीनता पक्षस्येत्येतद्विचारयितव्यं भवद्भिरित्युक्तं भवति।

न च कथं पूर्वमभावादित्येवं नुन्नमनुन्नबोधैः सूरिभिः पश्चादपि तत्करणस्यापादनीयत्वादिति वाच्यं, तथाऽऽपादयितुं शक्यत्वेऽपि प्रकृतेऽनादितासिद्ध्यर्थमेवोद्योगः सूरीणामिति नार्थः पश्चात्तदापादनेन। नहि निरर्थकं नोदनं नोदनाविदामनुन्नशोभायै भवतीत्याहुः। अत्रापि भावयितव्यमिति तूपहासगर्भमेव। यतो यो न बुद्ध्यते स्वाभ्युपगतव्याघातकं वचनम्, स कथं न भवति भावितनयमार्गाणां हास्याय, इत्येवं सामान्येन साधितेऽनादित्वे लोकस्य, सामान्यवादिनं साङ्ख्यान् वा निरीश्वरान् निराकृत्य परमैश्वर्यराजितपरमेश्वरभक्ता निरन्तरा उत्तिष्ठन्त एव यदुत—यद्यनादिनिधनो लोकः तदभिन्ना अस्तिकाया वा तथा परमैश्वर्यसम्पन्नपरमेष्ठिसाधकं प्रमाणं विलीयेत वृक्षोच्छ्रायेण मूलमिव, दृश्यमानकृत्यैव तस्य प्रमीयमानत्वात्। उच्यते च–'प्राणाय नमो यस्य सर्वमिदं वशे यो भूतः सर्वस्येश्वरो यस्मिन् सर्वं प्रतिष्ठितं' इति 'इन्द्रेहविश्वाभुवनानि येमिरे इन्द्रेश्वाना स इन्द्र' इति 'तथाभूतस्य जातः पतिरेक आसी'दित्यादि। अनुमीयमानता च तस्य स्पष्टैव 'संसारमहीरुहस्य बीजाये' त्यनेन 'ॐनमः सर्वभूतानि विष्टभ्य परितिष्ठते' इत्येतेन 'जगतां हेतुमीश्वर' मित्यनेनेत्येवमुत्थितान् वादिनः पूर्वमेव स्थापितस्वपक्षानाहुराचार्याः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नो परमपुरिसपहवा पओयणाभावओ दलाभावा।**
**नत्तस्सहावयाए तस्स य तेसिं अणाइत्तं ॥५॥**

'नो 'त्ति निषेधे 'अमानोनाः प्रतिषेधे' इति वचनात्। न च पर्यायशब्देषु लाघवगौरवचर्चेति नियमात् न नञ्नोशब्दयोश्चर्चा। किमित्याहुः—'परमपुरिसपहव 'त्ति। परा—उत्कृष्टा मा—लक्ष्मीर्ज्ञानादिका शोभा वा यस्येति परमः 'गोश्चान्ते' [२।४।९६] इति ह्रस्वः। यद्वा—'पॄश् पालनपूरणयो' रिति क्र्यादिको धातुः, तस्मात् सृपॄप्रथिचरिकडिकदेरम [३४७] इत्यौणादिकेऽमे परम इति। तथा च पालयति भक्तान् जगन्ति वा, पूरयति वा स्वात्मना विश्वं सर्वव्यापकत्वादिति परमः—उत्कृष्टः, पुरुषः परमपुरुषः। परमपुरुषयोर्व्यभिचारित्वादुत्कृष्टपदार्थान्तरसंसार्यात्मनो विशेषणविशेष्यभावः। सम्भवति व्यभिचारे सम्भवे च विशेषणस्यार्थवत्ता। तत्र विशेषणस्यान्यत्र विद्यमानत्वे सम्भव उच्यते, विशेष्ये च विशेषणाभावे व्यभिचारः, अत्र चोभयमप्यस्तीति भाव्यमेव विशिष्टेन। पुरि शयनाद्वा पुरुषः, पृषोदरादित्वाद्। व्युत्पत्तिमात्रं परमेतत् जगदेव वा पूः, अन्यथा परमेश्वरस्य शरीरग्रहाभावान्न स्यादेव पुरुषता।

यद्वा—आत्मवाचक एवाऽयं पुरुषशब्दः 'पुरुषस्त्वात्मनि नरे पुन्नागे' [अनेकार्थ सङ्ग्रहे] इति वचनात्। तथा च परमः पुरुष—आत्मा परमपुरुषः। अत्र चैकपदव्यभिचारेऽपि विशेषणम्। आत्मा च परमतेऽपि पठ्यते एव विविधो 'जीवेनात्मने' ति 'परमात्मे' त्यादिनिर्देशात्। स्वमते तु बहिरात्मान्तरात्मभेदभिन्नत्वेऽपि नात्र परमशब्देन अन्यत्रेव बाह्यान्तरात्मनोर्व्यवच्छेदः, परकीयमतेनैव परमपुरुषव्याख्यानात्। तत एव च पूर्वं पालयति पूरयतीत्यादिव्युत्प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तावपि नास्माकं स्वागमविरोधापात उपरि । तादृशात् परमपुरुषात् प्रभवः–उत्पत्तिर्येषां ते परमपुरुषप्रभवाः 'भूऽऽयदोऽल्' [५।३।२३] इति भावेऽल्प्रत्ययः । तथा च प्रभवनं–विद्यमानतयाऽऽविर्भावः प्रभवः ।

अनेन असतामेषां तथाभावं पूर्वपक्षयन्ति । अत्र द्विविधा अपि वादिनः सङ्गृहीता एकत्र । 'अपायेऽवधिरपादान' [२।२।२९] मिति जातायामपादानसञ्ज्ञायाम् 'पञ्चम्यपादाने' [२।२।६९] इति पञ्चमी । तथा च परमपुरुषोपादाना नैतेऽस्तिकाया इति तु प्रकृतमेव । वक्ति च 'सर्वं खल्विदं ब्रह्मे'ति सर्वान्तःपातिनां घटपटादीनामपि ब्रह्मोपादानता । अन्यत्र तु परमपुरुषेण प्रभव उत्पत्तिरिति करणतृतीयैव । पञ्चमी वा 'गम्ययपः कर्माधारे' [२।२।७४] इत्यनेन । तथा च परमपुरुषमाश्रित्य प्रभव इत्यर्थः । तथा न परमात्मा जगत उपादानकारणं, किन्तु निमित्तकारणमेव । नहि चेतनं भवत्यचेतनस्योपादानम् । केशादिदृष्टान्तश्च कारणानभिज्ञतामूल एव । आत्मन्यविकृतेऽपि जरादिना केशादीनां विकारोपलब्धेः । यच्च यदुपादानं तत्तस्मिन् विक्रियमाणे विक्रियामवाप्नोति, यथा मृद्विकारे घटस्य । न चैवमत्रेति नोपादनता युक्ता ब्रह्मणः, किन्तु निमित्ततैवेति । प्रोशन्ति उभयमपि सङ्गृहीतं ज्ञेयमेतत् ।

यद्यप्यस्तिकायज्ञानमेव तेषां न, अरूपिज्ञानस्य केवलिनामेव भावात् । छद्मस्थप्रणीताश्च त्वदीया आगमाः, तदनुसारिणां च कथमरूपिज्ञानं श्रद्धानं वा स्याद्, आत्मनस्तु स्वानुभूतत्वेन यथा तथा प्ररूपणं श्रद्धानं च नानर्हम् । न चास्तिकाया धर्माद्यास्त्रयस्तथा, परं लोकस्याभ्युपगमात्तैस्तस्य चास्तिकायात्मकत्वात् प्रतिपादितं सूरिभिरेवम् । नह्यन्येनाप्रतिपन्ने धीमद्भिर्वस्तुस्वरूपमन्यथाख्येयमिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वा एवमुपन्यासः । ब्रह्माण्डाद्युपगमाच्चार्थान्तरतया शब्दान्तरतया वाऽभ्युपगता एवैते परैः । यद्वा–स्वपक्षमाश्रित्योदितमुदितबोधभानुभिर्भगवद्भिः । इत्यलं प्रसङ्गातिप्रसक्तेन ।

अथ किं न परमपुरुषप्रभवा अस्तिकायाः ? यतः पामरा अपि ब्रुवन्त्येव-यद् यथा परमेश्वरस्य विधातुः रुचिः तथाऽभूद् भवति भविष्यति चेति । तत्रान्येषां पामरानुसारितामुपेक्ष्य ' विधिर्विधानं नियतिः स्वभावः, कालो ग्रहा ईश्वर कर्म दैवम् । भाग्यानि कर्माणि यमः कृतान्तः, पर्यायनामानि पुराकृतस्य ' ॥१॥ इति वचनात् ' कत्थ वि कम्माइ हुंति बलियाइं 'ति परमसुनिवचनात् ' कर्मादेस्तत्स्वभावत्वे न किञ्चिद् बाध्यते विभो 'रितिवचनाच्च कर्मणो नामान्तरमपेक्ष्य वा तामुपेक्ष्य तात्त्विकपरीक्षया परीक्षयितुमाहुः– ' पओयणाभावओ 'त्ति ।

अत्र प्रथमं तावदवधेयमिदम्–यत् प्रेक्षावत्प्रवृत्तिः प्रयोजनवत्तया व्याप्ता ' प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते ' इति ' नाभिसमीक्ष्य यत् कार्यं स न कोऽपि यः प्रवर्त्तते ' इति च वचनात् । तथा च प्रेक्षावच्छिरःशेखरस्य भगवतोऽवश्यं विश्वनिर्माणे वाच्यं प्रयोजनम् । न च वाच्यं सामान्यप्रेक्षावद्विषयकोऽयं नियमः, न चैतावता व्यभिचारिता लक्ष्यमात्रव्यापकत्वनियमाल्लक्षणस्य, लक्ष्यं चात्र सामान्यप्रेक्षावल्लक्षणमिति । यतो यथा भवद्भिः संस्थानविशेषमात्रेण सामान्यकार्यव्याप्तौ सत्यामपि अनिर्णीतसंस्थानस्यापि जगतः संस्थानवत्त्वमभिप्रेत्य तदपेक्षया कर्त्तृत्वं गीयते, तथा तस्य प्रेक्षावत्त्वेन भाव्यमेव प्रयोजनेन । अस्तु चेदाहुः-प्रयोजनाभावा 'दिति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्रेदं तत्त्वम्–'प्रवर्त्तते यदर्थित्वात्तत्तु साध्यं प्रयोजन'मिति-नियमात् प्रवृत्तिमात्रस्य च सप्रयोजनताप्राप्तौ सुप्तमूर्छितप्रवृत्तौ स्याद् व्यभिचार इति यदर्थित्वादित्यस्य साभिप्रायताव्याख्यानेन प्रेक्षावत्प्रवृत्तेः सफलत्वनियमेन 'फलानुमेयाः प्रारम्भा मतिमता'-मिति नियम्यते, प्रवृत्तिमान् प्रेक्षावाँश्च भगवानिति। स्वीकार्यैव तस्य प्रयोजनवत्ता। सा च तस्य नास्त्येव, तथास्वीकारे कृतकृत्यत्वबाधः सम्पद्यमानो न निवारयितुं शक्यते। यद्वा–प्रयोजनमभीष्टम्, तच्च सरागस्यैव भवभृतामेव वा। न चायं तथेति प्रयोजनाभावसिद्धिः। सिद्धे च तस्मिन् किमिव तस्य भवेत् कर्तृता। अत एव चोच्यते–'अदेहस्य जगत्सर्गे प्रवृत्तिरपि नोचिता। न च प्रयोजनं किञ्चिदि'ति।

अनेनैतदपि प्रतिक्षिप्तम्–यथा वणिक्पुत्रस्य प्रयोजनाभावेऽपि स्वस्य भवत्येव व्यवहारादौ प्रवृत्तिः, तथाऽत्र भवन्ती केन निरुध्येतेति। तस्य हि श्रेष्ठिनो नाथवत्तास्ति, तथाऽस्य नहि येन प्रवर्त्तेत। श्रेष्ठिनस्तु स्वातन्त्र्यादस्ति सा तु सप्रयोजनेत्यापन्नमकृतकृत्यत्वमवीतरागत्वम्। तत एवोक्तं 'स्वातन्त्र्यान्न पराज्ञया' इति। अत्र हि नकारस्य डमरुकमणिन्यायेनोभयत्र सम्बन्धः। प्रवृत्तिरिति तु प्रकृतम्। कर्मणा जीवात्मकृतेनेश्वरस्य परवत्ता चेद्, वरमीश्वरस्यैश्वर्यमन्यदीयसुकृतदुष्कृते, न स्वस्य, यत्परवत्तापादानम्।

अनेनैतदपि निरस्तं यत्–संसार्यदृष्टेन परमेश्वरस्य शरीरग्रहणमिति। सति हि सम्बन्धेऽदृष्टस्य स्याच्छरीरग्रहणसम्भवात्। तथा चादृष्टसम्बद्धत्वाद् व्याहन्यते ईश्वरत्वं कृतकृत्यत्वं कर्मापेतत्वं च। तथास्वीकारे तु किमपराद्धं संसारिभिः, यत्ते स्वादृष्टेन तत्तन्न कुर्वीरन्निति स्वीक्रियते। ननु च किं लालप्यते परमेश्वरमहिमापलापिभि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवद्भिः प्रलापिभिः—यत् नास्ति प्रयोजनमित्यादि । यतोऽस्त्येव प्रयोजनवत्ता तस्य प्राणिनां सुखदुःखसर्गादौ, क्रीडादि तदर्थमेव च प्रवृत्तिः । न च सरागता तयाऽऽपादयितुं शक्या भवद्भिः । क्रीडाया ऐश्वर्यनिबन्धनत्वाद्, दृश्यत एव च लोकेऽपि—यथा यथैश्वर्य-वृद्धिस्तथा प्रचुरीभावः क्रीडायाः । सरागता तु तस्य—

'ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः । ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टय' ॥१॥ मिति वचनान्न लेशतोऽपि सम्भाविनी । प्रयोजनवत्तापि सामान्यप्रवृत्तिसाध्यमात्रतालक्षणा, न तु स्वेच्छा-पूर्विकेति । अन्यच्च—दुःखबहुलीभावापन्नान् प्राणिनः कुर्वतस्तस्य स्पष्टं भावितात्मनां वैराग्यापादनलक्षणं प्रयोजनम् । न च तथाविधे प्रयोजने न सरागत्वापत्तिः । भवतामपि श्रीजिनेश्वरेषु तथाप्रवृत्ति-सद्भावादवश्यं सरागत्वप्राप्तेः ।

किञ्च—प्राणिनां बद्धकर्मापनयनाय च तस्य प्रवृत्तिः न कथञ्च-नापि दूषयितुमलमीश्वर ईश्वरोऽपि, तन्नायोग्यतेश्वरस्येति चेद् । आः ! परमपुरुषप्रणीतपरमपथावगणनतिरस्कृतसम्यग्विलोचनपरमपवित्रप-रमपुरुषपावित्र्यप्रमोषमूषकपरमज्ञाननिचयाभिहताखिललोकालोकग-तान्धकरणान्धतमसततेर्भगवतोऽपि कलङ्कदाने न चिन्तयस्युचितानु-चितम्, यतः स्वीकृतमेव भवता क्रीडाया दुर्गतिगमनप्रस्थानानुकूल-प्रवृत्तिमदैश्वर्यान्वितात्मदृशामुदाहरणेन सरागता । तथा चाख्यायते नाचिकेताख्यानेऽपि—

यतस्तत्र त्रिषु दीयमानेष्वपि वरेषु नैच्छत् स तान् किन्तु मृत्योरभावमेव । तथा 'न वा अरे ! पत्युः कामाय पतिः प्रियो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवत्यात्मनस्तु कामाय पतिः प्रियो भवति, यावन्न वा अरे! देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति, न वा अरे! भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति, न वा अरे! सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति, आत्मा वा अरे! द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे! दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदित ' [ बृहदा० ] मिति ।

अत्रात्मविचारस्य परमश्रेयोभूततया निर्दिष्टत्वाद् आः भवदभिमतेश्वरस्याऽपूर्वचातुरी यद् विहायात्मरमणतां क्रीडाप्रियता जाता। यच्चोच्यते–सरागता न तस्य भवति, क्रीडावाँश्च भवतीश्वर इति तु माता मे वन्ध्येतिवद् वदतो व्याघातकं गगनकुसुमसौरभ्य–वन्ध्यास्तनन्धयाङ्गोपाङ्गप्राशस्त्य–शशशृङ्गशोभातिशय–मण्डूकजटाजेतृत्ववर्णनमिव निरन्तरसुहृत्प्रत्येयम्। वीतरागता हि यस्य भवत्यवितथा, स कथं क्रीडाप्रियो भवति, क्रीडाया रागनिबन्धनत्वनियमात्। न च प्राणिनां सुखदुःखोभयदानं क्रीडार्थं सज्जनानाम्, कथमन्यथा जगत्यपि स्यात् कोऽपि कस्याप्यपकारी। यतः सर्वो हि जन्तुः सर्वस्य स्वस्वकर्मानुसार्येव विधत्ते दुःखं, दत्ते च दुःखं हसति नापेक्षते वा यः, स नार्हति सज्जनपर्षदि प्रवेशमपि। न च भवदभिमत ईश्वरः करोति पश्चात्तापमादितोऽज्ञानेन विहितस्याज्ञानिन एव तस्य युक्तत्वात्।

अत एवोक्तं चौलुक्यचूडाचन्द्राञ्चितचरणैः–' क्रीडया चेत् प्रवर्तेत रागवान् स्यात् कुमारवत् ' इत्यादि। तन्न क्रीडा भवति तस्य प्रयोजनमिति युक्तमुक्तं 'प्रयोजनाऽभावात्'। यच्चोक्तम्–'दुःखबहुलीभावे'त्यादि। तदपि कदाग्रहनिबिडतामेव व्यनक्ति वक्तुः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्तृत्ववादगताम् । यतः किं न स्यादेवं सति दुर्जनो व्याधो मात्स्यिको वा वैराग्यकारणं सताम् । तथा च किं तेऽपि न स्युर्वैराग्यकारणतया सज्जनताभाजः ? । यद्वा–बहूनां दुःखभावादनल्पाशुभध्यानापादितदुर्गदुर्गतिबन्धानामल्पतमानामेव वैराग्यभावात् कथं नाऽऽयव्ययविचारशून्यता भवदभिमतेश्वरस्य ।

किञ्च–यदि वैराग्याय सतां करोतीतरान् दुःखिनः, का हि श्रेष्ठता तस्य वक्तुं शक्येत साक्षरपर्षदि । किञ्च–यदि वैराग्योत्पादनमपि तस्य प्रयोजनभूतं स्यात्, तर्हि किमिति न करोति सर्वांस्तद्वतः ?, किं वा न पर्याप्त जन्मजरामरणैः स्वाभाविकैः ? यत् नवीननवीनतरानिष्टसम्प्रयोगेष्टवियोगरोगादि करोति । किञ्च–नेश्वरस्य तत्सामर्थ्यम् ?, यन्न करोति जन्मतो वैराग्यवतो जनान् सर्वान् । यतो न कोऽपि विदध्यात् पापमेव, यथा दुःखभावो मोहमदिरामत्तता च न कस्यापि भवेद् , येन तेषां वैराग्याय जनानां स्याद्युक्तं दुःखीकरणम् ।

अन्यच्च–कथं दुःखीकरणे पापिनामितरेषां च सर्वेषां वैराग्यभावो न सम्पद्यते । तथा च स्पष्टैवेश्वरस्य न प्रेक्षापूर्वकारिता, यन्न सिद्धमिष्टं तस्य । किञ्च–यदि दुःखीकरणं वैराग्योत्पादनप्रयोजनकमभिमन्यते, तर्हि स्पष्टं सुखीकरणं निष्प्रयोजनम् । तथा च न तदीश्वरविहितम् । ततश्च स्वतः समुद्भूतं सुखित्वं जन्तूनामिति । प्रशस्यतमा भवदीश्वरस्येश्वरता ?, सत्यापिता च भवद्भिरपि पामरानुसृतिरनूनैवाहता । यतः पामराः प्राणिन एवमेव व्यवहरन्ति यदुत–ऋद्ध्यादौ प्राप्ते विवाहादिके वा व्यवहारे सुखकारणे वदन्ति–अस्माद्भिर्विहि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तम्, लेखयन्त्यपि च। तथैव रोगादौ जाते, जातेऽथवा स्वजनमरणे वाऽनुचिते वा कार्ये तथाविधे वदन्ति लिखयन्ति वा यद्–ईश्वराभिरुचिरेतादृशी नात्राऽस्मत्कृतिः काचिदिति।

यच्च श्रीमतां विनाशितसमूलरागद्वेषभावानामखिलपापस्थानपरिहारदेशनादक्षप्रवृत्तिमतां श्रीजिनानां नावबुद्धं गुणगणशतभागीयमपि वर्णनं, कथमन्यथा दुःखपरिहारपरायणानामखिलजन्तुजातानां परमकारुणिकानामभयदापनपटूनां साम्यं जगद्दुःखीकरणमात्रज्ञापितसत्त्वेन भवदभिमतोच्छिष्टतमेश्वरेण साम्यं सत्या इव वेश्यया। यत उच्यते परममुनिभिर्भवादृशानेवाधिकृत्य वीतरागस्तुतौ—

त्वच्छासनस्य साम्यं ये मन्यन्ते शासनान्तरैः। विषेण तुल्यं पीयूषं तेषां हन्त हतात्मना॥ 'मिति। यच्च न्यगादि दृढतरकर्तृत्वाऽऽग्रहग्रहग्रथिलतावेदकं वचो 'बद्धकर्मापनयने' त्यादि। तदप्यनभिज्ञतमतासूचकमेव। यतस्तथा सर्व एव प्राणिगणो विशेषतश्च व्याधादयो विशेषतरं च संसारमोचका उपकारिणो जगताम्। यतस्तेऽपि विनाशयन्ति यान् यान् प्राणिगणान् तान् तान् मोचयन्त्येव स्वस्वकर्मभ्यः। नहि तेऽपि प्राणिगणान् तादृशान् व्यापादयितुं शक्नुवन्ति, यैर्न विदधिरे पापम्।

स्यादेतत यदि ते स्वतन्त्रं विदध्युः। न चास्ति तेषां स्वातन्त्र्यम्, 'ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वे'ति वचनात्, 'यो लोकत्रयमाविश्ये'ति वचनाद्वा तेषां परमेश्वरप्रेरितत्वादिति चेद्, आः बलवत्तरता मोहमहीभृतो यत्प्रभावादाचर्यते बिडालाचारः। पश्यति हि स दुग्धं, न तु यष्टिम्। तथा भवन्तोऽपि स्वपक्षसिद्धिमलीकां, न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तु समूलकाषंकषणमीश्वरप्रयोजनस्य। कथमिति चेद् ? विचारयत स्वयं तेषां व्याधादीनामीश्वरप्रेरणयैव वधादीन् विदधतां कथं यज्ञादिविधायिनामिव स्यात् पापलेशः ? । भावे च तस्य चालनीन्यायेन कस्यापि पापात्मत्वाभावात् केभ्यो योग्यमर्पणं दुःखस्य, अनर्पणे प्राप्ते च तस्य किं हि प्रयोजनं भवदभिमतेश्वरस्य भवदभिमतरीत्या, कश्च जगत्यामप्युपकार्यपकारिव्यवहारः, सर्वस्यैव परमेश्वरविहितत्वात्। प्रेरकत्वे च तस्य स्पष्ट एव तेषामप्यनपायीभावः। तथा च पूर्वोक्तः फलाभावस्तदवस्थ एव। ततश्च केवेश्वरकर्तृता ? ।

केचित्त्वाहुः—जगज्जन्तूनां सुखोत्पादाय प्रवर्तते स, तथा च कृपार्थता तत्प्रवृत्तौ, न च सा दोषास्पदमिति। तदप्यनालोचितमेव रमणीयम्। यतः केषाञ्चित्तद्दाने कथं तस्य स्वरूपावस्थां लभतेऽरक्तद्विष्टता ?, दुःखस्य च तथाभावे स्वाभाविकत्वस्वीकारावश्यकतया को विशेषो ? यन्न स्यात् सुखमपि स्वाभाविकम्।

यच्चोच्यते—स्वाराद्धनृपोत्तमवत् सेवकेभ्यो यथार्हसुखदानप्रवृत्त ईश्वरो न रागादिदोषभाक्। तदप्यचार्वेव। यतः सोऽपि किं यथा—तथैव प्रवर्त्तते, किञ्चिदालम्ब्य वा कारणम्। आद्ये, दृष्टान्तवैषम्यम्। नृपोत्तमो हि न यथा तथा प्रवर्त्तते, किन्त्वाराधनानिपुणतादर्शनजातपीवरान्तःकरणतया। अन्त्ये च, किं तद् यदालम्ब्य विधत्तेऽसौ सुखिनो जनान्, भजनं सुकृतं वेति विकल्पयुगली अवतरति। आद्ये, स्पष्टैव नृपोत्तमादिवद् रक्तद्विष्टताप्रसक्तिः। नहि अरक्तो दातुं प्रभवति फलं 'नाप्रसन्नात् फलं प्राप्य'मितिनियमात्।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ननु कथमेतत् सङ्गच्छते ? सङ्गतौ चास्य कथं भवतां वीतरागाराधनं तु सुदूरापास्तम्, तस्य कदापि प्रसन्नीभावाभावात्, भावे वा देवत्वलोपस्वीकारात् इति चेत्। सत्यम्, यदि हि स्वाभाविकं कर्तृत्वमिष्येत, तदेव तु न, किन्तु आराधकभावापेक्षयैव तत्। दृष्टश्चैष न्यायो वह्निमन्त्रादौ। न हि वह्न्यादयो रक्ता अपनयन्ति शीतं, द्विष्टा वा कुर्वन्ति दाहं, किन्तु स्वभाव एवैष तेषाम्। एवमत्रापि। न च नृपादयोऽप्यरक्ताः प्रयच्छन्ति फलम्। वर्ण्यते चात एव नीतिप्रधाने चाणाक्यादौ राज्ञामनुवर्तनाय विचित्रो विधिः।

किञ्च–यदि कोऽपि जीवहिंसादिकं महापातकं करोति तस्य सेवां तस्य भजनेनैवापैति पापं न वा ?। आद्ये, स्पष्टाऽन्यायिता तस्यौत्कोचिकाधिकारिवत्। प्रान्त्ये, न तर्हि भजनस्य साफल्यम्, तन्न भजनं कारणतयाऽऽलम्बयितुं युक्तं सुखीकरणे जीवानाम्।

यदि चाऽऽश्रीयते सुकृतमिति द्वितीयपक्षः, तदा पूर्वप्रतिपादितन्यायेन तस्यैव विधायकत्वं सुखस्य। स्वतन्त्रो हि कर्ता स्यात्, सुखविधौ च स्वतन्त्रं च कर्मैव प्राप्तम्, तेनैवेश्वरो प्रेर्यते संसारिणां सुखविधौ। तन्न सुखविधानप्रयोजनमपि सङ्गच्छते तस्य। न च वाच्यं संसारिजन्तुविषयिका करुणा प्रवर्त्तयति तमिति कृपारूपप्रयोजनवत्त्वात् तस्य न प्रयोजनाभावः सिद्ध 'इत्याश्रयासिद्ध'इत्यसिद्धो हेतुरिति। का नाम कृपा ? यदि दुःखभारोदितव्यथापरिकरितान्तरात्मनां दुःखप्रजिहीर्षेति, तदादौ दुःखस्य स्वाभाविकत्वप्राप्ते 'भवगतिमूला शरीरनिर्वृत्तिः। देहादिन्द्रियविषया विषयनिमित्ते च सुखदुःखे' इति नियमादनुभवाच्च शरीरादेः कर्मफलस्य प्राप्ता स्वयं सत्ता। तथा च किमीश्वरेण कार्यं कार्यम्। यदि च कृपैव कार्यम्, तर्हि कथं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दौर्गत्यादि दुःखम्, यदि तदपि तत्कृतम्, सत्या कृपालुता यामपेक्ष्योच्यतेऽन्यत्र—

भवसम्भवदुःखकरं निष्कारणवैरिणं सदा जगतः । कस्ते व्रजेच्छरण्यं सूरिः श्रेयोर्थमतिपापम्'॥ तथा 'कृपयाऽथ सृजेत्तर्हि सुख्येव सकलं सृजेत्॥ दुःखदौर्गत्यदुर्योनि-जन्मादिक्लेशविह्वलम्। जनं तु सृजतस्तस्य कृपालोः का कृपालुता?'॥ इत्यादि। कथं चासौ न विधत्ते सर्वानपि दयापात्राणि?। न च तस्य सामर्थ्यं नास्ति तादृशं, कर्मापेक्षत्वे कैव कृपा?। नहि अधमर्णो ददाति ऋणमिति वितनुते उत्तमर्णायोपकारम्। यच्च संसारिणा कृतं सुकृतं, जात एवोत्तमर्णोऽन्यथा कर्मणो वैफल्यप्रसङ्ग इत्यादि पूर्वमावेदितमेव। यदि चोच्यते—आदौ सर्वे विहिताः समाना जीवाः, पश्चात्ते स्वस्वकर्मानुसारेणाऽन्यथाभावमापन्नाः। तत्रापि प्रथमं तावदापन्नेश्वरस्याशक्तिः। अन्यथा कथमसन्मार्गे प्रवर्त्तयितुं ददाति। नहि सुशिक्षकोऽचिन्त्यशक्तियुक्तः सन् विद्यार्थिनोऽसन्मार्गे ददाति प्रवर्त्तयितुं, प्रवर्त्तन्ते च ते यत्तत्र, न शिक्षकस्य समग्रसामर्थ्यान्वितता शक्यते वक्तुमस्तीति। सत्यां च शक्तौ वैचित्र्यकारणं स्पष्टमेवान्यत् किञ्चिद्वाच्यम्। यत उच्यते—

'तुल्ये सति सामर्थ्ये किं न कृतो वित्तसंयुतो लोकः। येन कृतो बहुदुःखो जन्मजरामृत्युपथि लोकः'॥ इति। यदि चेच्छा तस्य तादृशीति आपन्नैव प्रयोजनशून्यता। इच्छापि चाऽन्येषां दुःखीकरणरूपा नार्हतीश्वरस्य। इच्छासद्भावे च कथं कृतार्थता वीतरागता च भानूदयेनेव चन्द्रप्रभान्धकारतत्योर्नाधिरोहेतां विरोधम्?। यदि स्वभाव एवैष तस्य, तर्हि स्पष्ट एव प्रयोजनाभावः। निराकरिष्यते च सूरिभिः सोऽपि यथापि ग्रन्थान्तरे।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'अथ स्वभावतो वृत्तिरवितर्क्या महेशितुः । परीक्षकाणां तद्दैष परीक्षाक्षेपडिण्डिमः' ॥ इति परीक्षाक्षेपडिण्डिमता च कर्मणामेव तथास्वभावत्वस्वीकारे जगतो वा न किञ्चिन् मुखवक्रत्वादिविकारगमनं स्याद्, ईश्वरे च स्पष्टैव दोषाणामस्खलिता संहतिरापतन्ती नैव निवारयितुमपि पार्यते समर्थेनापि वादिना। अन्यच्च– स्वभावे च जगत्कर्तुस्तादृशे, अधुना जगदकरणात्तद्धानिः । तथा चानीश्वरता । अनादित्वाच्च तस्य तत्स्वभावस्याप्यनादितापत्तौ स्पष्टैवानादितेश्वरत्ववद् जगतोपीति प्रसङ्गानुप्रसङ्गेन सृतम् । अनेन 'नाऽसावेकाकी रेमे साहाय्यमीक्षाञ्चक्रे तथाऽहं नामा बभूवे'त्यादयो वादा अपि निरस्ता एव वेदितव्याः, सर्वेषां प्रयोजनाभावोपपादनेनैव गतार्थत्वात् ।

अथ द्वितीयं दूषणमाहुः–'दलाभाव'त्ति । एतच्च–ईश्वरेच्छानिमित्तमेव जगदिति वादिनो ब्रह्ममात्राभ्युपगमेनान्यद्रव्यानभ्युपगमप्रवणानद्वैतान् वोद्दिश्य ज्ञेयम् । यद्वा–द्रव्यमाश्रित्यैवाऽत्र विवादात् । यतो निर्णीतमेव तावद् यद्यदि द्रव्यमनादितयाऽङ्गीक्रियेत द्रव्यस्य पर्यायरहितत्वादापन्नैव पर्यायाणामनादितेति 'दलाभावा'दिति । यद्वा–पञ्चास्तिकायात्मकत्वाल्लोकस्य, तस्य विधेयतायां प्रक्रियमाणायां दलाभाव इत्यस्यैव दूषणता । यतोऽनादिनिधनता कारणविभागनाशाभावादिना तस्य साधितेति ।

तत्र 'दलं शस्त्रीच्छदेऽर्धपर्णयोः । उत्सेधवद्वस्तुनि च [ अनेकार्थसंग्रहे ]'इति । दलं–वस्तु, तच्च यद्यपि द्रव्यगुणपर्यायाणामन्यतमद् भवति, तथापीह प्रकरणादेव द्रव्यं गृह्यते, पारिभाषिको वा दलशब्दो द्रव्यवाचकतया प्रसिद्ध एव । तथा च कश्चित् कोशे 'शस्त्रीच्छदेऽप्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्रव्ये पत्रे' इति सत्त्वेऽपि न विरोधः। दल्यतेऽन्तःप्रवेशेनाभेदेनावस्थानादित्यौणादिके अप्रत्ययेऽभीष्टरूपसिद्धेः। यद्वा-दलयति–स्वाधीनान् विदधाति गुणान् पर्यायाँश्चेति दलं-द्रव्यं 'लिहादेरच्' इत्यचि रूपसिद्धिः। तस्याऽभावादविद्यमानता, लोकेऽपि सिद्धं हि एतद् यदुत– 'विनाऽऽधारं च नाधेयं' तथा 'सत्यां भित्तौ चित्रकार्यं चतुरस्यापि शोभते' इत्यादि। ततश्च परमेश्वरस्य सृष्टिविधाने यदि न स्याद् दलमेव, कथमसौ विदध्यात् किञ्चिदपि?। यदि चोपेयते द्रव्यसत्ताऽऽपन्नैवाऽनादिता। न च द्रव्यं पर्यायरहितम्, काञ्चिदप्यवस्थामास्थायैव द्रव्यस्यावस्थाननियमात्। परमन्यदेतत्।

यदि च जीवादयः परमाण्वादयश्च नाभ्युपगम्यन्ते, किं कुर्यात् परमैश्वर्यसम्पन्नोऽपि परमेश्वरः?। यदि चाभ्युपगम्यते विनापि दलं विदध्यात् सर्वमिति, स्पष्टो व्याप्तिविरोधः, द्रव्यस्यैव तथातथाविधानदर्शनाद्। विशेषत्वे च तस्याऽस्तु लोकसंस्थानस्यैव कल्पितस्य घटादिसंस्थानाद् वैशिष्ट्यं, येनादृष्टविरोधिनी च न प्रसज्येत कल्पना। दलविधाने च पूर्वं तावन्न किमपि प्रमाणं, दलस्य क्वचिदपि विधानादर्शनेन तस्यानादिताया अवश्यमभ्युपगन्तव्यत्वात्। यद्वा–नैव जीवादयो विधातुं योग्याः, कुतो? दलाभावात्–तद्योग्योपादानकारणाभावादित्यर्थः। असति चोपादाने, नैव भवति कार्यं किञ्चिदपि। सति चोपादानसद्भावाङ्गीकारे, पारम्पर्येणापन्नैवाऽनादिता लोकस्य, विभिन्नस्वभावानामुपादानानां लोकवाच्यतानपायात्।

अनेन च 'सोऽद्भ्यः पुरुषं समुद्धृत्यामूर्छयत् तथा रयिं प्राणं चासृजत् तथाऽहङ्कारात् समजायते'त्यादिकाः श्रुतिप्रवादा निरस्ताः, निरस्ताश्च यवनाद्या अपि, परमेश्वरेच्छया बभूव पृथिव्याऽऽदीत्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिवादिनः, तैरुपादानकारणानङ्गीकारात्। अङ्गीकारे च स्पष्टैव तस्येश्वरस्येव-स्वाभाविकत्वादनादिता। कुम्भकारवद् विशेषाकृतिमत्तापादनमपीश्वरस्य प्रयोजनाभावादित्यनेन पूर्वं प्रतिक्षिप्तमेव। उच्यते च परैरपि-सतोऽसतो भवनं न युक्तमिति 'नासतो जायते भाव' इत्यादिना, तथा कथमसतः सज्जायेतेति 'सत्त्वेव सौम्येदमग्र आसीदेकमेवाद्वितीय'मित्यादिना च।

यदि चोच्येत स्वभाव एवैतादृश ईश्वरस्य यद्-विना प्रयोजनं दलं च विधत्तेऽसौ लोकमिति। तत्राऽऽहुः-'तत्तस्सहावयाए तस्स व तेसिं अणाइत्तं'ति। 'तत्तत्स्वभावतायां' स स स्वभावो यस्य विहाय कर्मादिहेतून् वैचित्र्यकरणम्, आदिः सर्गः करणीयः, स्फुलिङ्गा इव वह्नेर्निष्काशनीया जीवात्मानः, स्वभावात् पूर्वोक्तद्वयं वा प्रयोजनदलाभावेऽपि निर्माणं लोकस्येति विविधस्वभावाङ्गीकारस्यावश्यकत्वात्तत्तदिति द्विर्निर्देशः स्वभावनिर्देशश्च, प्रयोजनादौ पूर्वमेव निरुत्तरीभावापन्नत्वाद् वादिनस्तत्तत्स्वभावस्य भावस्तत्ता तस्यां स्वीक्रियमाणायाम्। यद्वा-हेतौ पञ्चमीयं व्याख्येया। तथा च नेदमघटमानकं, विना प्रयोजनं दलादि वा परमेश्वरस्य लोकविधानं, तत्तत्स्वभावत्वात्तस्य।

ननु स्वीकरोति तथा चेद् वादी किं स्याद् दूषणं?, स्वभावे पर्यनुयोगाभाव इति सर्ववादिपर्षत्संमतत्वात्। सत्यं, मा त्वरिष्ठाः, आहुरेतस्मिन् पक्षेऽपि यत् 'तेसिं अणाइत्त'मिति कथं?, यतः यो यत्स्वभावः स कुरुते एव स्वकार्यम्। यथाऽग्निरुष्णतास्वभावः। तत्तत् स्वभावश्चाभ्युपगम्यते परैरीश्वरस्तथा। यदीश्वरोऽनादिः, तर्हि प्राग्वैवाऽस्तिकायानामप्यनादिता। एतदेवाहुः-तस्येव-भवदभिमतस्येश्वरस्येव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेषामस्तिकायानां धर्मास्तिकायादीनामनादित्वं किं नेति चिन्त्यं ? मध्यस्थेनान्तरात्मना भवता । नाऽत्र तत्त्वविचारप्रस्ताव आग्रहः श्रेयान्। अत्रास्तिकाया इत्यनादितेति च पूर्ववदेवानुसन्धेयमभिसन्धिमता । न च वाच्यमपरकारणसाकल्य एव कार्योत्पत्तिः, नहि सद्भावेऽप्यग्नेर्विना दाह्यं दहति, तथात्रापीश्वरस्य यदि भवतीतरकारणसंयोगस्तदैव स करोति व्याख्यातगुणो विश्वम्। न चैवमनादिः सम्पत्तिरस्यैषां वेति चेत् । स्पष्टैवाकर्तृता तस्यैवमितरकारणप्रेरणया प्रवर्त्तनात्। नहि अग्निरप्युष्णतालक्षणं स्वभावं करोत्यनैयत्येन, दाहश्च यदि स्वभावभूतःतस्य भवेत् , किमिति स्वमेव न दह्यात्। तथा च यद्यनैयत्येन विश्वविधानात् न विश्वेश्वरस्यैष स्वभावः, स्वीक्रियमाणे वाऽन्यस्मिन् कारणे पूर्वोक्तदोषध्रौव्यमेव ।

अथोच्येत विश्वेश्वरस्य तथाभूत एव स्वभावो यदुत–अनैयत्येन करोति विश्वमितरकारणनैरपेक्ष्येणेत्याशङ्क्याहुः

न सदेव यऽस्सभावो को इह हेऊ तहा सहावत्तं ।
हंता भावगयमिणं को दोसो तस्सहावत्तं ॥७॥

सदैव च–नित्यमेव च अस्य–समग्रलोकप्रतिपन्नत्वेनाध्यक्षसिद्धस्य हृद्विवर्तितया वा वादिप्रवादिप्रत्यक्षस्य लोकस्य, भावो–भवनभावः सत्त्वेत्यर्थः, नास्तीहास्मिन् निर्णयेऽभ्युपगमे वा, कः इति प्रश्ने, लोकस्य यथोक्तोत्पादादिप्रसाधको हेतुः प्रतिबद्धः पदार्थः कारणं वा। यद्वा–नहि अतत्स्वभावः स यः पूर्वं प्रतिपादितः प्रयोजनाद्यभावेऽपि विश्वनिर्माणरूपो यतः स्याद् । यदि तथाविध एव तस्य स्वभावः किमित्यधुना न विधत्ते 'नित्यं सत्त्वमसत्त्वं वाऽहेता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रन्यानपेक्षणा 'दिति नियमात्। कादाचित्कत्वं हि कारणलब्धात्मलाभानामेव भवति। कारणसद्भावश्च पूर्वमेव निरस्तः।

किञ्च—यद्युत्पादयति विश्वमेष स्वभावात् तर्हि कथं नाशोऽस्य? यदि च स्वाभाविकोऽसौ, कथं नोत्पादः स्वाभाविकः स्यात्? न चेष्यते एवं भवतेति निषिध्यतेऽयं पक्षः। यद्वा—' न सदेव तस्सभाव 'त्ति पाठः। तदपेक्षया सदैव—नित्यं तत्स्वभावो—जगदुत्पादनस्वभावो न भवतीश्वरः। तत्र को हेतुर्नैव कोऽपि यदि निभाल्यते मध्यस्थदृशा। यद्वा—पूर्वगाथया सम्बन्ध्यैवं व्याख्येयम्—यदीश्वरस्य तथा स्वाभाव्यमुक्तं जगतामुत्पत्तौ तन्न, कथमिति? उक्तं सदैव च भावोऽस्य प्राप्नोति, तस्य सादात्विकत्वेन तत्स्वभावस्यापि तथात्वं ध्रौव्यं, यदि वोच्यते तत्रापि तथास्वभावत्वमेव हेतुः, तदपि न युक्तियुक्तं इत्यादि—

— अपूर्णा —

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# आगमोद्धारक-ग्रंथमालाना प्रकाशनो

१ सर्वज्ञशतक सटीक महोपाध्याय श्री धर्मसागरजी म०
२ सूत्रव्याख्यानविधिशतक ,, ,,
३ धर्मसागरग्रन्थसंग्रह ,, ,,
४ औष्ट्रिकमतोत्सूत्रप्रदीपिका ,, ,,
५ तात्त्विकप्रश्नोत्तराणि आगमोद्धारकश्री
६ आगमोद्धारक-कृतिसंदोह ,, भा. १-२-३-४-५-६-७।
७ न्यायावतार सटीक ,,
८ अधिकारविंशिका वृत्ति ,,
९ लोकविंशिका वृत्ति (खण्ड १-२) ,,
१० आगमोद्धारकश्रीनी श्रुतोपासना
११ कुलकसंदोह श्रीपूर्वाचार्यकृत
१२ संदेहसमुच्चय श्रीज्ञानकलशसूरिनिर्मित
१३ जैनस्तोत्रसंचय भा० १-२-३। श्रीपूर्वाचार्यकृत
१४ गुरुतत्त्वप्रदीप श्रीचिरन्तनाचार्यकृत
( उत्सूत्रकन्दकुद्दालापरनाम )
१५ शतार्थविवरणम् गणि श्रीमानसागरजीकृत
१६ धर्मरत्न प्रकरण टीका (हिंदी अनुवाद) आ. श्रीदेवेन्द्रसूरिजी म०
१७ महामंत्रनां अजवाळां

प्राप्तिस्थान

श्री जैनानन्द-पुस्तकालय, गोपीपुरा, सुरत.

For Private And Personal Use Only